028 योगशास्त्र

शिवसंहिता

प. ३० ली.

B. 9.
27

ईंद्रजी म्हतुना भगवानलालेन काश्यां संगृहीतम्
सगाख्यां योगाकृत भाक्ति सं १८२७

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

भा॰पा॰ १

ॐ श्रीगणेशाय नमः नमामि जगदुत्पत्तिहेतवे वृषकेतवे क्लेशकर्मविपाकादिरहिताय हिताय च ॥ नत्वा पतंजलिमृ
षिं वेदव्यासेन भाषिते संक्षिप्तस्पष्टबह्वर्था भाष्ये व्याख्या विधास्यते इह हि भगवान्पतंजलिः शिक्षितस्य शास्त्र प्रा
स्य संक्षेपतस्तात्पर्यार्थं प्रेक्षावत्प्रवृत्त्यंगं श्रोतृजनसुखावबोधार्थमादाविदं सूत्रं रचयांचकार अथ यो
गानुशासनं तत्र प्रथमावयवमथशब्दं व्याचष्टे अथेत्ययमधिकारार्थो येषु त्वयोक्ति इति ननु नत्वानंतर्यार्थः
अनुशासनमिति हि शास्त्रमाह अनुशिष्यतेनेनेति व्युत्पत्त्या न चास्य प्रमदप्राग्घटनं प्रवृत्तिः अपि तु तत्व
ज्ञानविख्यापयिषानंतरं जिज्ञासाज्ञानयोस्तु स्यात् यथाम्नायते तस्मात् शांतो दांत उपरतस्तितिक्षुः समाहित

ॐ श्रीगणेशाय नमः यस्त्यक्त्वा रूपमाद्यं प्रभवति जगतोनेकधानुग्रहाय प्रक्षी
णक्लेशराशिर्विषमविषधरोनेकवक्त्रः सुभोगी सर्वज्ञानप्रसूतिर्भुजगपरिकरः
प्रीतये यस्य नित्यं देवोहीशः स वो व्यात्सितविमलतनुर्योगदो योगयुक्तः अथ यो

तो भूत्वात्मन्येवात्मानं पश्येदित्यादि शिष्यप्रश्नतपश्चरणरसायनाद्युपयोगानंतर्यस्य च संभवेपि नाभिधानं शि
ष्यप्रतीतिप्रवृत्त्योरनुपयोगात् प्रामाणिकत्वे योगानुशासनस्य तदभावेप्युपेयत्वात् अप्रामाणिकत्वे च तद्भा
वेपि हेयत्वात् एतेन तत्त्वज्ञानचिख्यापयिषयोरनंतर्याभिधानं परास्तं अधिकारार्थत्वे तु शास्त्रेणाधिक्रिय
माणस्य प्रस्तूयमानस्य योगस्याभिधानात् सकलशास्त्रतात्पर्यार्थव्याख्यानेन शिष्यः सुखेनैव बोधितश्च प्र १
वर्तितश्च भवतीति निःश्रेयसस्य हेतुः समाधिरिति हि श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धम् १ ॥

ननु किं सर्वसंदर्भगतोऽप्यथशब्दोधिकारार्थः तथा सत्यथातो ब्रह्मजिज्ञासेत्यादावपि प्रसंग इत्यत आह अथ यमिति
ननु हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातन इति योगियाज्ञवल्क्यस्मृतेः कथं पतंजलेर्योगशास्त्रकर्तृत्वमित्याशंक्य
सूत्रकारेणानुशासनमित्युक्तं शिष्टस्य शासनमनुशासनमित्यर्थः यदायमथशब्दोधिकारार्थस्तदेदं वाक्यार्थः
संपद्यत इत्याह योगानुशासनं शास्त्रमधिकृतमिति ननु व्युत्पाद्यमानतया योगोत्राधिकृतो न तु शास्त्रमित्यत आह
वेदितव्यमिति सत्यं व्युत्पाद्यमानतया योगः प्रस्तुतः स तु न द्विविषयेण शास्त्रेण करणेन व्युत्पाद्यः करणगोचरश्च व्यु
त्पादकस्य व्यापारो न कर्मगोचर इति कर्तृव्यापारविषयतया योगविषयस्य शास्त्रस्याधिकृतत्वं वेदितव्यं शास्त्र

अथेत्ययमधिकारार्थः योगानुशासनं शास्त्रमधिकृतं वेदितव्यं योगः समाधिः

व्यापारगोचरतया तु योग एवाधिकृत इति भावः अधिकारार्थस्य चाथशब्दस्यान्यार्थं नीयमानोदकुंभदर्शनमिव
श्रवणं मंगलायोपकल्पत इति मंतव्यं शब्दसंदेहनिमित्तमर्थसंदेहमपनयति योगः समाधिः युज समाधावित्यस्मा
द्व्युत्पन्नः समाध्यर्थो न तु युजिर्योग इत्यस्मात्संयोगार्थ इत्यर्थः ननु समाधिरपि वक्ष्यमाणस्यांगिनो योगस्यांगं न हि
चांगमेवांगीत्यत आह स च सार्वभौमः चत्वार्योगाद्भिन्नं भिनत्ति भूमयोवस्था वक्ष्यमाणा मधुमती मधुप्रतीका वि
शोका संस्कारशेषा ताश्चित्तस्य तासु सर्वासु विदितः सार्वभौमश्चित्तनिरोधलक्षणो योगस्तदंगं तु समाधिर्नैवं भूतः
व्युत्पत्तिनिमित्तमात्राभिधानं चैतद्योगः समाधिरिति अंगांगिनोरभेदविवक्षामात्रेण प्रवृत्तिनिमित्तं तु योगशब्दस्य
धी चित्तवृत्तिनिरोध एवेति परमार्थः

यो॰वा॰ वृत्तयोऽनात्मान्यात्माश्रया इति अतस्तन्निरोधोऽप्यात्माश्रय एवेति योगशब्दार्थं निरूप्य तन्निरासायाह चित्तस्य धर्म इति चित्तशब्दोऽन्तः
२ करणं बुद्धिमुपलक्षयति नहि कूटस्थस्य नित्यचितिशक्तेरपरिणामिनी ज्ञानधर्मा भवितुमर्हति बुद्धिस्तु भवेदिति भावः
स्यादेतत्सार्वभौमश्चेद्योगः हंत भोः क्षिप्तमूढविक्षिप्तास्वपि चित्तभूमयोस्ति च यस्य कस्यचिद्वृत्त्या वृत्तिनिरोधोऽप्यस्ति
तत्राऽपि योगत्वप्रसंग इत्याशंक्याह योपादेयभूमीरूपत्वस्यति क्षिप्तमित्यादि क्षिप्तं सदैव रजसा तेषु तेषु विषयेषु
क्षिप्यमाणमत्यंतमस्थिरं मूढं तु तमःसमुद्रेकान्निद्रावृत्तिमत् विक्षिप्तं क्षिप्ताद्विशिष्टं विशेषोऽस्थैर्यबहुलस्य कादा
चित्कः स्थैर्या सा चास्य स्थैर्यबहुलत्वात् सिद्धिकी बाधर्माणव्याधित्याद्यंतरायजनिताऽवा एकाग्रमेकता

चित्तस्य धर्मः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः तत्र विक्षिप्ते चेतसि
विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते यस्त्वेकाग्रे चेतसि ०॥

नं निरुद्धसकलवृ
त्तिकं संस्कारमात्रशेषं चित्तं निरुद्धं तत्र क्षिप्तमूढयोः सत्यपि यस्य कस्यचिद्वृत्त्या वृत्तिनिरोधे पारंपर्येण चित्ते श्रेय
त स्हेतुभावाऽभावात् तदुपघातकत्वाच्च योगपक्षाद्बहिष्कृतत्वमिति न तयोर्योगत्वं निषि द्धं विक्षिप्तस्य तु
कादाचित्कसद्भूतविषयस्थैर्यशालिनः संभाव्येत योगत्वमिति निषेधति तत्र विक्षिप्ते चेतसि समाधिः कादा
चित्कः सद्भूतविषयस्य चित्तस्य स्थैर्यमात्र योगपक्षे वर्तते कस्माद्यतस्तद्विपक्षविक्षेपोपसर्जनीभूतः विपक्षत्व
गीतगतस्य हि स्वरूपमेव दुर्लभं प्रागेव कार्यकरणं नखलु दहनांतर्गतं बीजं चिरं तनुरं प्रायव स्थितमुपमप्यंकुराय
कल्पत इति भावः यदि विक्षेपोप सर्जनीभूतः समाधिर्न योगः कस्तर्हि इत्यत आह यस्त्वेकाग्रे चेतसि इति भूत २
मितिसमारोपितमर्थं निवर्तयति भिद्रावृत्तिरपि स्वालंबने तमसि भूते भवत्येकाग्रेत्यत उक्तम् ०॥

दर्ये चाविद्याख्य
सद्भिति श्रोऽमर्थं नितरां नाविर्भूतसत्त्वं तमः समुद्रेकस्त्वश्रोऽभवत्तस्य क्लेशहेतुत्वादिति द्योतनं हि तत्त्वज्ञानमागमाद्वा
ऽनुमानाद्वा भवदपि परोक्षरूपत्वान्न साक्षात्कारवतीमविद्यामुच्छिनत्ति द्विचंद्रदिङ्मोहादिष्वनुच्छेदकत्वाद्दत आ
ह प्रद्योति प्रशास्तोहि प्रकर्षद्योतनपसाक्षात्कारं सूचयति अविद्यामूलत्वादस्मितादीनां क्लेशानां विद्यायाएव चाविद्यो
च्छेदरूपत्वात् विद्योदिते क्लेशसमुच्छेदो विरोधित्वात् कारणविनाशाच्चेत्याह क्षिणोतिचेति अतएव कर्मरूपाणि व
बंधनानि श्लथयति कर्म चात्रापूर्वमभिमतं कार्ये कारणोपचारात् श्लथयति स्वकार्याद्वसादयति वृत्य

सद्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्लथयति निरोधमभिमु
खं करोति स संप्रज्ञातो योग इत्याख्यायते स च वितर्कानुगतो विचारानुगत आनंदा
नुगतोऽस्मितानुगत इत्युपरिष्टात् प्रवेदयिष्यामः सर्ववृत्तिनिरोधे त्वसंप्रज्ञातः स
माधिः तस्य लक्षणाभिधित्सयेदं सूत्रं प्रवर्तते योगश्चित्तवृत्तिनिरोधः २

तिहि सति मूल
प्र
लेनच्छिन्ना कट्टति किंच निरोधमभिमुखं करोत्यभिमुखी करोति स च संप्रज्ञातश्चतुःप्रकार इत्याह स चेति अ
संप्रज्ञातमाह सर्वेति रजस्तमोमयी किल प्रमाणादिवृत्तिः सात्त्विकीं वृत्तिमुपादायासंप्रज्ञाते निरुद्धा असं
प्रज्ञाते तु सर्वासामेव निरोध इत्यर्थः नदि दृभूमिद्वये समाप्तायामधुमत्यादयो भूमयस्ताः सर्वास्ता सुविदितः
सार्वभौम इति सिद्धं द्वितीयं सूत्रमवतारयति तस्य लक्षणेति तस्येति पूर्वसूत्रोपात्तं द्विविधं योगं परामृशति यो
गश्चित्तवृत्तिनिरोधः निरुध्यंते यस्मिन् प्रमाणादिवृत्तयोऽवस्थाविशेषे चित्तस्य सोऽवस्थाविशेषो योगः २॥

यो॰भा॰ ३

वासना

ननु संप्रज्ञातस्य योगस्याव्यापकत्वादलक्षणमिदम् न हि तत्र सात्त्विकी चित्तवृत्तिर्निरुध्यत इत्यत आह सर्वशब्दाग्रह-
णादिति यदि हि सर्वचित्तवृत्तिनिरोध इत्युच्येत भवेदव्यापकं संप्रज्ञातस्य हि क्लेशकर्मविपाकाशयपरिपन्थी चित्तवृ-
त्तिनिरोधस्तु तमप्यस्ति रजस्तमसोर्निरोधात् चित्तवृत्तिनिरोधस्य च तत्र भावादित्यर्थः कुतः पुनरेकस्य
चित्तस्य क्षिप्तादिभूमिसंबन्धः किमर्थं चैवमवस्थस्य चित्तस्य वृत्तयो निरोद्धव्या इत्याशङ्क्य प्रथमं तावदवस्थासंब-
न्धे हेतुमुपन्यस्यति चित्तं हीति प्रख्याशीलत्वात्सत्त्वगुणं प्रवृत्तिशीलत्वाद्रजोगुणं स्थितिशीलत्वात्तमोगुणं प्रख्या-
ग्रहणमुपलक्षणार्थं तेनान्येऽपि सात्त्विकाः प्रसादलाघवप्रीत्यादयः सूच्यन्ते प्रवृत्त्या च परितापशोकादयो रा-

सर्वशब्दाग्रहणात्संप्रज्ञातोऽपि योग इत्याख्यायते चित्तं हि प्रख्याप्रवृत्तिस्थितिशील-

जसाः प्रवृत्तिविरोधी तमोवृत्तिधर्मः स्थितिः स्थितिग्रहणाद्गौरवावरणदैन्यादय उपलक्ष्यन्ते एतदुक्तं भवति एक-
मपि चित्तं त्रिगुणनिर्मिततया गुणानां च वैषम्येण परस्परविमर्दवैचित्र्याद्विचित्रपरिणामं सदनेकावस्थमुपपद्य-
त इति क्षिप्तादयोऽस्य भूमयः संभवन्त्यवान्तरावस्थाभेदवर्तीं दर्शयति प्रख्यारूपं हीति चित्तरूपेण प-
रिणतं सत्त्वं चित्तसत्त्वं तदेवं प्रख्यारूपतया सत्त्वप्राधान्यं चित्तस्य दर्शितं तत्र चित्तसत्त्वात्किंचिद्रजस्तमः-
समीपहीनमिथः समे च भवतः तदैश्वर्यं च विषयांश्च शब्दादयस्तान्येव प्रियाण्यस्य तत्तथोक्तं सत्त्वप्राधान्यानुव-
लु चित्तं तत्त्वप्रणिधित्सद्यितत्त्वस्य तमसाभिहितत्वादणिमादिकमेव तत्त्वमभिमन्यमानं तत्प्रणिधित्सति प्र- ३
स्थि णिधत्ते च तत्त्वं रजसात्क्रियमाणं तत्राप्यलब्धं तितक्षिप्तमात्रं भवति प्रार्थ्यमानेषु पुनरस्य स्वरसवाही प्रेमा-
निरूढ एव तदनेन विक्षिप्तं चित्तमुक्तम्

क्षिप्तं चित्तं दर्शयित्वा मूढमपि सूचयति तदेव तमसेति यदा हि तमो रजो विजित्य प्रवर्तते तदा चित्तसत्त्वावरकं तमः समुत्सारणेऽशक्त-
त्वाद्रजसस्तमःस्थगिते चित्तमधर्माद्युपगच्छति अज्ञानं च विपर्ययज्ञानं अभावप्रत्ययालम्बनं च निद्राज्ञानमुक्तं ततश्च
मूढावस्थापि सूचितेति अनैश्वर्यं सर्वत्रेच्छाप्रतीघातः अधर्मादिव्याप्तं चित्तं भवतीत्यर्थः यदा तु तदेव चित्तसत्त्वमाविर्भू-
तसत्त्वमपगततमःपटलं सरजस्कं भवति तदा धर्मज्ञानवैराग्यैश्वर्याण्युपगच्छतीत्याह प्रक्षीणेत्यादि मोहस्तमस्तदेव
चावरणं प्रकर्षेण क्षीणं यस्य तत्तथोक्तं अत एव सर्वतो विशेषाविशेषलिङ्गमात्रालिङ्गपुरुषेषु प्रद्योतमानं तथापि तद्ध-
र्मैश्वर्याय चक्रत्याने प्रवृत्त्यभावादित्यत आह अनुविद्धं रजोमात्रया रजसः प्रवर्तकत्वादणिधर्मादिरित्यर्थः न

प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति तदेव तमसानु-
विद्धमधर्माज्ञानावैराग्यानैश्वर्योपगं भवति तदेव प्रक्षीणमोहावरणं सर्वतः प्रद्योत-
मानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्योपगं भवति तदेव रजोलेशमलापेतं स्व-
रूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगं भवति ॥

इदानीं संप्रज्ञातस-
माधिसंपन्नयोर्मधुभूमिकप्रज्ञाज्योतिषोर्मध्यमयोगिनोश्चित्तसत्त्वं संगृहीतं संप्रत्यतिक्रान्तभावनीयस्य ध्यायिन-
स्तुरीयस्य चित्तावस्थामाह तदेव चित्तं रजोलेशान्मलादपेतमत एव स्वरूपप्रतिष्ठमभ्यासवैराग्यपुटपाकप्रबन्धवि-
धूतरजस्तमोमलस्य हि बुद्धिसत्त्वतपनीयस्य स्वरूपप्रतिष्ठस्य विषयेभ्यः प्रत्याहृतस्यावसितो विकारस्तयाखं कारि- कार्ये
णो विवेकख्यातिः परं कार्यमवशिष्यत इत्याह सत्त्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघध्यानोपगं भवति धर्म-
मेघश्च वक्ष्यते ॥

अत्रैव योगिजनप्रसिद्धिमाह तदिति सत्त्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघपर्यन्तं प्रसंख्यानमित्याच क्षते ध्यायिनः चित्तसामानाधिकरण्यं च धर्मधर्मिणोरभेदविवक्षयाद्रष्टव्यं विवेकख्यातेर्हेयत्वेहेतुं चितिशक्तेरुपादानेहेतुं निरोधसमाधिसंपादयितुं चितिशक्तेः साधुतामसाधुतां च विवेकख्यातेर्दर्शयति चितिशक्तिरित्यादि सुखदुःखमोहात्मकत्वमशुद्धिः सुखमोहावपि विवेकिनं दुःखाकुरुतः अतो दुःखवद्धेयौ तथा चातिसुन्दरमप्यन्नं विषसंपृक्तमिति तेन तदपि हेयमेव विवेकिनः सेयमशुद्धिं तन्न चितिशक्तौ पुरुषे नास्तीत्युक्तं शुद्धा चानन्ता चेति ननु सुखदुःखमोहात्मकशब्दादीन्विषयांश्चेतयमाना तत्तदाकारापन्ना कथं विशुद्धा तदाकारपरिग्रहपरिवर्जने च कुर्वतीकथमनन्तेत्यत उक्तं दर्शितविषयेति दर्शि

तदयं प्रसंख्यानमित्याचक्षते ध्यायिनः चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयं० नमो भगवते वासुदेवाय नमो नमः

तो विषयः शब्दादिर्यस्यै सा तथोक्ता भवेदेतदेवं यदि बुद्धिवच्चितिशक्तिर्विषयाकारतामापद्येत किं तु बुद्धिरेव विषयाकारेण परिणता सा अतदाकारायै चितिशक्तये विषयमादर्शयति ततः पुरुषश्चेतयत इत्युच्यते ननु विषयाकारं बुद्धिमनारूढायाः चितिशक्तेः कथं विषयवेदनं विषयाकारेण हि वा कथं न तदाकारा परिणतिरित्यत उक्तं अप्रतिसंक्रमेति प्रतिसंक्रमः संचारः स चित्ते नास्तीत्यर्थः स एव कुतो यस्मादस्तीत्यत उक्तं अपरिणामिनीति न चितेस्त्रिविधोऽपि धर्मलक्षणावस्थालक्षणः परिणामोऽस्ति येन क्रियायोगात्परिणता सती बुद्धिसंयोगेन परिणमेत चितिशक्तिः असंक्रान्ता या अपि विषयसंवेदनमुपपादयिष्यते तस्मिन्हि चितिशक्तिः शोभनेति विवेकख्यातिस्तु बुद्धिसत्त्वात्मिका अशोभनेत्युक्तम्० ॥ ४

कर्मादृष्टम्

अतश्चितिशक्तेर्विपरीतेति यदा च विवेकख्यातिरपि हेया तदा कैवल्यकथा दूरं च तरणं दोषबहुलानामिति भावः ततस्तद्धेतोर्निरोधस्य आधेयत्वतो युज्यत इत्याह अतस्तस्यामिति ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः अथ निरुद्धाऽशेषवृत्ति चित्तं कीदृशमित्यत आह तदवस्थमित्यादि स निरोधोऽवस्था यस्य तत्तथोक्तं निरोधस्य स्वरूपमाह स निर्बीज इति क्लेशाः सहिताः कर्माशया जात्यायुर्भोगबीजं तस्मान्निर्गत इति निर्बीजः अस्यैव योगिजनप्रसिद्धामन्वर्थसंज्ञामादर्शयति न तत्रेति उपसंहरति द्विविधः स योगश्चित्तवृत्तिनिरोध इति संप्रत्युत्तरसूत्रमव

अतो विपरीता विवेकख्यातिरित्यतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि तदवस्थं चित्तं संस्कारोपगं भवति स निर्बीजः समाधिः न तत्र किंचित्संप्रज्ञायत इत्यसंप्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध इति तदवस्थे चेतसि विषयाभावाद्बुद्धिबोधात्मा पुरुषः किंस्वभावः इति० ॥

तत्तदाकारपरिणतवृत्तिबोधक

तात्पर्यमाक्षिपति तदवस्थे चेतसीति किमाक्षेपे तत्तदाकारपरिणतबुद्धिबोधात्मा खल्वयं पुरुषः सदानुभूयते ननु बुद्धिबोधरहितो नोऽस्य पुरुषस्य बुद्धिबोधः स्वभावः सवितुरिव प्रकाशः न च संस्कारशेषे चेतसि सोऽस्ति न च स्वभावमपहाय भावो वर्तितुमर्हतीति भावः स्यादेतत् संस्कारशेषामपि बुद्धिं कस्मात्पुरुषो न बुध्यत इत्यत आह विषयाभावादिति न बुद्धिमात्रं पुरुषस्य विषयोऽपि तु रूपार्थवती बुद्धिः विवेकख्यातिविषयभोगौ च पुरुषार्थौ तौ च निरुद्धावस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः०
नमो भगवते वासुदेवाय नमः नमः शिवाय०

सूत्रेण परिहरति तदा द्रष्टुः स्वरूपेवस्थानं स्वरूपद्वयारोपितं प्रांतश्चोरम् द्रष्टुः स्वरूपं निर्वर्तयति पुरुषस्य हि चैतन्यं
स्वरूपमनौपाधिकं ननु बुद्धिबोधः स्पंतादिरूपश्चोपाधिकोहि स्फटिकस्येव स्वाभाविकधवलत्वस्य जपा
कुसुमसन्निधानोपाधिरक्तिमा तत्र चोपाधिनिवृत्तावपि न निवृत्तिरिति प्रसंगादिति भावः स्वरूपस्य त्वा भेदेपि
भेदं विकल्प्य अधिकरणभावकरू इति अयमेवार्थो भाष्यकृता घोत्यते स्वरूपप्रतिष्ठेति तदानीं निरोधावस्थायां न
व्युत्थानावस्थायामिति भावः स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठिता स्वरूपे चितिशक्तिः निरोधावस्थायां प्रति

तदा द्रष्टुः स्वरूपेवस्थानं स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये व्युत्थानचि
त्तेतु सति तथापि भवंती न तथा कथं तर्हि दर्शितविषयत्वात् ३ वृत्तिसारूप्यमितरत्र
व्युत्थाने याः चित्तवृत्तयः तदविशिष्टवृत्तिः पुरुषः ० ॥

ष्ठितेति परिणामिनी स्यात् व्युत्थाने वास्व
रूपप्रतिष्ठाने व्युत्थाननिरोधयोरविशेष इत्यत आह व्युत्थानचित्ते त्विति न जातु कूटस्थनित्या चितिशक्तिः स्वरू
पात् च्यवते नेन तथा निरोधे तथैव व्युत्थानेपि न खलु शुक्तिकायां अप्रमाणविपर्ययज्ञानगोचरत्वेपि स्वरूपोदय
व्ययौ भवतः प्रतिपत्तानु तथा भूतमप्यतथात्वेनाभिमन्यते निरोधसमाधिसमये त्वसंप्रज्ञातोपि व्युत्थानमेवेति
सूत्रांतरमवतारयितुं पृच्छति कथं तर्हीति यदि तथा भवंती न तथा केन तर्हि प्रकारेण प्रकाशत इत्यर्थः हेतुपदा
मध्याहृत्य सूत्रं पठति दर्शितविषयत्वात् वृत्तिसारूप्यमितरत्र इतरत्र व्युत्थाने याश्चित्तवृत्तयः शांतघोरमूढा ५
स्ताभिरविशिष्टा अभिन्ना वृत्तयो यस्य पुरुषस्य स तथोक्तः सारूप्यमित्यत्र सशब्दः एकपर्यायः एतदुक्तं भवति ०

जपाकुसुमस्फटिकयोरिव बुद्धिपुरुषयोः सन्निधानादभेदग्रहे बुद्धिवृत्तीः पुरुषे समारोपयन् शांतोस्मि दुःखितोस्मि मूढो
स्मीत्यध्यवस्यति यथा मलिने दर्पणतले प्रतिबिंबितं मुखं मलिनमारोप्य शोचत्यात्मानं मलिनोस्मीति यद्यपि पुरुषस
मारोपोपि शब्दादिविज्ञानवत् बुद्धिवृत्तिर्यद्यपि च प्राकृतत्वेनाचिद्रूपतया नानुभाव्यस्तथापि बुद्धेः पुरुषत्वमापाद्य
न पुरुषवृत्तिं विनानुभवद्वावभासते तथा चायमविपर्ययोप्यात्मापि पर्ययवानिवाभोक्तापि भोक्तेव विवेकख्या
तिरहितोपि तत्सहित इव विवेकख्यात्यां प्रकाशते एतच्च चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमि
त्यत्र सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोग इत्यत्र चोपपादयिष्यते एतच्च मतांतरेपि सिद्धमित्या

तथा च सूत्रम् एकमेव दर्शनम् ख्यातिरेव दर्शनमिति चित्तम् ० ॥ ०

ह तथा चेति पंचशिखाचार्यस्य सूत्रं एकमेव दर्शनं ख्यातिरेव दर्शनमिति ननु कथमेकं दर्शनं यावता बुद्धेः शब्दा
दादिविषया विवेकविषया च वृत्तिः प्राकृततया जडत्वेनानुभाव्या दर्शनं ततोन्यत् पुरुषस्य चैतन्यमनुभवो दर्शनमि
त्यत आह ख्यातिरेव दर्शनमिति एवं दर्शनमिति उदयव्ययधर्मिणी वृत्तिः ख्यातिर्लौकिकीमभिप्रेत्य एतदुक्तमेकमे
वेति चैतन्यं तु पुरुषस्य स्वभावो न ख्यातिः तत्तु न लोकप्रत्यक्षगोचरोपि त्वागममात्रानुमानगोचर इत्यर्थः तदनेन व्यु
त्थानावस्थायां मूलकारणमविद्यां दर्शयता तद्धेतुकः संयोगो भोगहेतुः स्वस्वामिभावोपि सूचित इति तमुपपाद
यन्नाह चित्तं स्वं भवति पुरुषस्य स्वामिन इति संबंधः ० ॥

भा॰वा॰
६

ननु चित्तजनितमुपकारं भजमानो हि चेतनश्चित्तस्येशिता न चास्य तज्जनितोपकारत्वं भवत्यसंबंधादनुपकार्यत्वाच्च
त्संयोगात्तदुपकारभागित्वे परिणामप्रसंगादित्यत आह । अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेनेति न पुरुष
संयुक्तं चित्तमपि तु तत्सन्निहितं सन्निधिश्च पुरुषस्य न देशतः कालतो वा तदसंयोगात् किंतु योग्यतालक्षणोऽस्ति च पुरुष
स्य भोक्तृशक्तिश्चित्तस्य भोग्यशक्तिः तदुक्तं दृश्यत्वेनेति शब्दाद्याकारपरिणतस्य भोग्यत्वेनेत्यर्थः भोगश्च यद्यपि शब्दा
द्याकारा वृत्तिश्चित्तस्य धर्मस्तथापि चित्तचेतनयोरभेदसमारोपाद्वृत्तिसारूप्यात्पुरुषस्येत्युक्तं तस्माच्चित्तेनासंयोगेऽपि
तज्जनितोपकारभागिता पुरुषस्यापरिणामिता चेति सिद्धं । ननु स्वस्वामिसंबंधो भोगहेतुरविद्यानिमित्तः अविद्या तु

अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः ॥
तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिः संबंधो हेतुः ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य

किंनिमित्ता न खलु निर्निमित्तं कार्यमुत्पद्यते यथाहुः स्वप्नादिवदविद्यायाः प्रवृत्तिस्तस्य किंकृतेति शंकामुपसंहा
रव्याजेनोद्धरति तस्माच्चित्तवृत्तिबोधे शांतघोरमूढाकारचित्तवृत्त्युपभोगे अनाद्यविद्यानिमित्तत्वादनादिः संयो ॰
गो हेतुः अविद्यावासनयोश्च संतानो बीजांकुरसंतानवदनादिरिति भावः स्यादेतत्पुरुषो हि पाकोऽपि दृश्यते
न च वृत्तिनिरोधो वृत्तीरविज्ञाय शक्यो न च सहस्रेणापि पुरुषायुषैरेता इमाः कश्चित्परिगणयितुमसंख्याताश्च
कथं निरोद्धव्या इत्याशंक्य तासामियत्तास्वरूपप्रतिपादनपरं सूत्रमवतारयति ताः पुनर्निरोद्धव्या बहुत्वे सति चि

क्लिष्टा

त वृत्तयः पंचतय्यः क्लिष्टाः वृत्तिसमूहोऽवयवी एकः तस्य प्रमाणादयोऽवयवाः पंच ततस्तदवयवापेक्षया पंचतयी पंचावयवा वृत्तिर्भवतीत्याशयः वृत्तय
श्चैत्रमैत्रादिचित्तभेदात् बहव इति बहुवचनमुपपन्नं एतदुक्तं भवति चैत्रो वा मैत्रो वाऽन्यो वा कश्चित्सर्वेषामेव तेषां वृत्तयः पंच
तय्य एव नाधिका इति चित्तस्येति चैकवचनं जात्यभिप्रायं चित्तानामिति तु द्रष्टव्यं तासामवांतरविशेषमनुष्ठानोपयोगिनं द
र्शयति क्लिष्टाक्लिष्टा इति अक्लिष्टा उपादेयाः क्लिष्टा निरोद्धव्या अत्र विपरीतेन वैराग्येणेति अस्य व्याख्यानं क्लेशहेतु
का इति क्लेशा अस्मितादयो हेतवः प्रवृत्तिकारणं यासां वृत्तीनां तास्तथोक्ता यद्वा पुरुषार्थप्रधानस्य रजस्तमोमयीनां हि वृ
त्तीनां क्लेशकारित्वेन क्लेशा एव प्रवृत्तिः क्लेशक्लिष्टं तत्रास्तमस्तीति क्लिष्टा इति यत एव क्लेशोपार्जनार्थमसूयाप्रवृत्तिर

वृत्तयः पंचतय्यः क्लिष्टाक्लिष्टाः ५ क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः
ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः

तत एव कर्माशयप्रचये क्षेत्रीभूताः प्रमाणादिना
खल्वर्थं प्रतिपन्नार्थमवसायं तत्र सक्तो द्विष्टो वा कर्माशयमाचिनोतीति भवंति धर्माधर्मप्रसवभूमयो वृत्तयः क्लिष्टा इति
अक्लिष्टा व्याचष्टे ख्यातिविषया इति विधूतरजस्तमसो बुद्धिसत्त्वस्य प्रशांतवाहिनः प्रज्ञाप्रसादः ख्यातिस्तया विषयि
ण्या तद्विषयं सत्त्वपुरुषविवेकमुपलक्षयति तेन सत्त्वपुरुषविवेकविषया यतो अत एव गुणाधिकारविरोधिन्यः का
र्यं भरणं हि गुणानामधिकारो विवेकख्यातिपर्यवसानं च तद्धितिच यतो ऽधिकाराणां गुणानामधिकार्यं विरुंधंतीति अत नि
स्ता अक्लिष्टाः प्रमाणप्रभृतयो वृत्तयः स्यादेतत् वीतरागजन्मादर्शनान्न क्लिष्टवृत्तय एव सर्वे प्राणभृतो न च क्लिष्टवृत्तिप्रवाहे
भवितुमर्हंत्यक्लिष्टा वृत्तयो ॰

भा-वा-
७

तथामूर्खभावेपिकार्यकारिताविरोधिमध्यपातित्वात्तस्मात्क्लिष्टानाम्[illegible]क्लिष्टाभिर्निरोधसंस्कारांश्चवैराग्येण
रोधेतिप्रमोरथमानमित्यतआह क्लिष्टप्रवाहेति आगमानुमानाचार्योपदेशपरिशीलनलब्धजन्मानीत्याभ्याससंवैरा
ग्येक्लिष्टच्छिद्रमंतरेणतत्रपतिताःस्वयमक्लिष्टाएवयद्यपिक्लिष्टप्रवाहपतिताः नखलुशालग्रामेकिरातशतसंकी शवरग्रामे
र्णेप्रतिवसन्विप्राग्रणीःकिरातोभवति अक्लिष्टच्छिद्रेष्विति निदर्शनं क्लिष्टानांतरवर्तितयाचक्लिष्टाभिरनभिभूता
अक्लिष्टाःस्वसंस्कारपरिपाकक्रमेणक्लिष्टाएवतावदभिभवंतीत्याह तथाजातीयकाइति अक्लिष्टाभिर्वृत्तिभिर
क्लिष्टाःसंस्काराइत्यर्थः तदिदंवृत्तिसंस्कारचक्रमनिशमावर्तते आनिरोधसमाधेः तदेवंभूतंचित्तंनिरोधावस्थं

क्लिष्टप्रवाहपतिताअप्यक्लिष्टाःक्लिष्टच्छिद्रेष्वप्यक्लिष्टाभवंति अक्लिष्टच्छि-
द्रेषुक्लिष्टाइति तथाजातीयकाःसंस्काराःवृत्तिभिरेवक्रियंतेसंस्कारैश्चवृत्तयइ-
तिएवंवृत्तिसंस्कारचक्रमनिशमावर्तते तदेवंभूतंचित्तमवसिताधिकारमात्मक-
ल्पेनव्यवतिष्ठतेप्रलयंवागच्छतीति ताःक्लिष्टाश्चाक्लिष्टाश्चपंचधावृत्तयः ५
प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ६

संस्कारशेषंभूत्वात्मकल्पेनावतिष्ठतइत्यापाततःप्र
लयंवागच्छतीतिपरमार्थतः पिंडीकृत्यसूत्रार्थमाह ताइति पंचधेत्यर्थकथनमात्रंननु[redacted]शरवृत्तिव्या
ख्यानंतयपःप्रकारैःस्मरणात् ताःस्वसंज्ञाभिरुद्दिशति प्रमाणविपर्ययविकल्पनिद्रास्मृतयः निर्देशेयथाव
चनंविग्रहश्चार्थेद्वंद्वःसमासइतरेतरयोगः यथानित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरवि
द्येत्युक्तेपिनाद्यमोहप्रलापचक्रादिविभ्रमाव्युदस्यंते एवमिहापिप्रमाणाद्यभिधानेपिवृत्त्यंतरसंभावनाशंकानव ७
व्युदस्येतेति तन्निरासायवक्तव्यंपंचतय्यइति ताएवावृत्तयोनापराःसंतीतिदर्शितंभवति ७॥

उ

तत्रप्रमाणवृत्तिंविभजन्सामान्यलक्षणमाह प्रत्यक्षानुमानागमाःप्रमाणानि अनधिगततत्त्वबोधःपौरुषेयोव्यवहारहेतुः
प्रमातत्करणंप्रमाणं विभागवचनंन्यूनाधिकसंख्याव्यवच्छेदार्थं तत्रसकलप्रमाणमूलत्वात् प्रथमतःप्रत्यक्षंलक्षय
ति इंद्रियेति अर्थस्येतिसमारोपितत्वंनिषेधति तद्विषयेति बाह्यगोचरतयाज्ञानाकारगोचरत्वंनिवारयति चित्तवर्तिनोज्ञा
ध्र नाकारस्यबाह्यज्ञेयसंबंधंदर्शयति बाह्यवस्तूपरागादिति व्यवहितस्यतदुपरागेहेतुमाह इंद्रियप्रणालिकयेति सामान्य
न्य मात्रमर्थइत्येकेविशेषाएवेत्यपरे सामान्यविशेषतद्वदित्यपरेवादिनःप्रतिपन्नास्तन्निरासायाह सामान्यविशेषात्मन
इति नतद्वताकिंतुतादात्म्यमर्थस्यएतच्चैकांतानभ्युपगमइत्यत्रप्र तिपादयिष्यते अनुमानागमविषयात्प्रत्यक्षवि

तत्रप्रत्यक्षानुमानागमाःप्रमाणानि ७ इंद्रियप्रणालिकयाचित्तस्यबाह्यवस्तूपरागात्
तद्विषयासामान्यविशेषात्मनोर्थस्यविशेषावधारणप्रधानावृत्तिःप्रत्यक्षंप्रमाणंफल त्य
मविशिष्टःपौरुषेयश्चित्तवृत्तिबोधः ७॥

अर्थंव्यवच्छिनत्ति विशेषावधारणप्रधानेति यद्यपिसामान्यमपिप्रत्यक्षेप्रतिभासतेतथापिविशेषंप्रत्युपसर्जनीभूत
मित्यर्थः एतच्चसाक्षात्कारोपलक्षणपरंतथाचनिर्विकल्पकस्यापितयोपलक्षितात्भवति फलविप्रतिपत्तिंनिराकरोति फल
पौरुषेयश्चित्तवृत्तिबोधइति ननुपुरुषवर्तीबोधःकथंचित्तगतायावृत्तेःफलंनहिखदिरगोचरव्यापारेणपरशुनापला
शेछिदाक्रियतेइत्यतआह अविशिष्टइति नहिपुरुषगतोबोधोजन्यतेअपितुचैतन्यमेवबुद्धिदर्पणप्रतिबिंबितंबु
द्धिवृत्त्यार्थाकारयातदाकारतामापद्यमानंफलंतच्चतथाभूतंबुद्धेरविशिष्टंबुध्यात्मकंवृत्तिश्चबुध्यात्मिकेतिसामा
नाधिकरण्यायुक्तःप्रमाणफलभावइत्यर्थः ७॥

त

प्रन्या॰
८

तथा

एतत्रोपपादयिष्यामइत्याह प्रतिसंवेदीति प्रत्यक्षानंतरं प्रवृत्यादिलिंगकश्रोतृबुद्ध्यनुमानप्रभवसंबंधदर्शनसमुत्थागमस्यानुमानतंत्वादनुमितस्य चागमेनान्वाख्यानादागमानुप्रागनुमानं लक्षयति अनुमेयस्येति जिज्ञासितधर्मविशिष्टो यमनुमेयस्तस्यतुल्यजातीयाःसाध्यधर्मसामान्येनसमानार्थाः सपक्षास्तैः सह दृष्टत्वेनविरुद्धत्वमसाधारणत्वं च साधर्म्यनिराकरोति भिन्नजातीयाअसपक्षास्तैरसपक्षत्वादन्येनविरुद्धाः सद्भावंतत्सर्वत्र तेभ्यो व्यावृत्तत्वेनसाधारणानैकांतिकत्वमपाकरोति संबध्यतइति संबंधोलिंगमनेनपक्षधर्मतांदर्शयन्नसिद्धतांनिवारयति तद्विषयानन्निबंधनाविबंधनदूत्यस्माद्विषयपदव्युत्पत्तेः सामान्यावधारणेति प्रत्यक्षविषयात्व्यावृत्तिर्नतीति संबंधसंवे

बुद्धेः प्रतिसंवेदी पुरुषइत्युपरिष्टादुपपादयिष्यामः अनुमेयस्य तुल्यजातीयेष्वनुवृत्तोभिन्नजातीयेभ्योव्यावृत्तः संबंधोयस्तद्विषया सामान्यावधारणप्रधाना वृत्तिरनुमानं यथादेशांतरप्राप्तेर्गतिमच्चंद्रतारकं चैत्रवत् विंध्यश्चाप्राप्तिरगतिः आप्तेन दृष्टोनुमितो वार्थः परत्र स्वबोधसंक्रांतये शब्देनोपदिश्यते शब्दात्तदर्थविषया वृत्तिः श्रोतुरागमः ॥

दनाधीनतत्स्मानुमानंविशेषेसंबंधग्रहणाभावेनसामान्यमेवस्वकरसंबंधग्रहणगोचरयतीति उदाहरणमाह यथेति चोद्देत्वर्थोविंध्योऽगतिर्यत्तस्मात्स्याप्राप्तिरतोगतिनिवृत्तौप्राप्तेर्निवृत्तिर्देशांतरप्राप्तेर्गतिमच्चंद्रतारकं चैत्रवदितिसिद्धं आगमस्यलक्षणमाह आप्तेनेति तत्त्वदर्शनकारुण्यादवभिसंबंध आप्तिस्तयान्वितइत्याप्तस्तेनदृष्टोनुमितोवार्थः कृतस्यपरगतनुपादानं तस्यदृष्टानुमितमूलत्वेनताभ्यामेवचरितार्थत्वात् आप्तवितवतिज्ञानसदृशास्य ज्ञानस्यश्रोतृचित्तेसमुत्पादः स्वबोधसंक्रांतिस्तस्यै अर्थरूप दिश्यते श्रोतृहिताहितप्राप्तिपरिहारोपाय

कारुण्य सह

संगृहीतः एतावांस्तु विशेषः त५

यस्यागमस्याश्रद्धेयार्थोवक्तायथायान्येवद्दशद्दाडिमानितानिषट्पूपाभविष्यंतीति नदृष्टानुमितार्थोयथार्थैत्यंवंदेत स्वर्गकामइतिस आगमः प्लवतेनत्वेवंमन्वादीनामप्यागमःप्लवतेतनहितेपिदृष्टानुमितार्थायथाद्वायः कश्चित्कस्यचिद्धर्मोमनुनापरिकीर्तितःसस्वर्वोभिहितोवेदेसर्वज्ञानमयोहिसः इत्यतआह मूलवक्तरीतिमूलवक्ताहितत्रेश्वरोदृष्टानुमितार्थइत्यर्थः विपर्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठं विपर्ययइतिलक्ष्यनिर्देशोमिथ्याज्ञानमितादिलक्षणंयनुज्ञानम्प्रतिभासिरूपंनदूपाप्रतिष्ठमेवातद्रूपप्रतिष्ठं यथा ... संशयोपितज्ञानात्तदूपाप्रतिष्ठताद्विचं देस्तु बाधज्ञानेन नन्वेवं विकल्पोपितद्रूपाप्रतिष्ठतात्द्विपर्ययः प्रसज्येतेत्यतआह मिथ्याज्ञानमितिअनेन

यस्यागमस्याश्रद्धेयार्थो वक्ता न दृष्टानुमितार्थः सआगमः प्लवते मूलवक्तरि तु दृष्टानुमितार्थे निर्विप्लवः स्यात् ७ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ८ सकस्मान्न प्रमाणं यतः प्रमाणेन बाध्यते भूतार्थविषयत्वात्प्रमाणस्य ०॥

हि सर्वजनीनानुभवसिद्धो

बाधकः सचास्तिविपर्ययेनतुविकल्पेतेनव्यवहारानुपंडितरूपालंमेवनुविचारपर्यंतत्रबाधबुद्धेरितिचोदयति सकस्मान्नप्रमाणं नोनरेलोपजाततविरोधिनाज्ञानेनपूर्वबाधनीयमपितुपूर्वेणैवप्रथममुपजातेनानुपजातविरोधिनापरमितिभावःपरिहरति यतः प्रमाणेनेति यत्र हि पूर्वापेक्षापरोत्पत्तिस्तत्रैवं इहतुस्वकारणादन्योन्यानपेक्षे ज्ञाने जायेतेतेनोत्तरस्यपूर्वमनुपमर्द्योदयमनासादयत्तदुपबाधात्मीवोदयोनतुपूर्वस्योत्तरबाधात्मानस्यतदानीमप्रसक्तेस्तस्मादनुपजातविरोधिताबाध्यत्वेहेतुरुपजातविरोधिताचबाधकत्वेतस्माद्भूतार्थविषयत्वात् प्रमाणेनाप्रमाणस्यबाधनंसिद्धम् ॥०॥

आ-भा-
९

मुदाहरणमाह तत्र प्रमाणेनेति अस्य कुत्सितत्वं हानाय दर्शयति सेयं पंचेति अविद्यासामान्यमविद्यास्मितादिषु पंचसु पर्व
स्वित्यर्थः अव्यक्तमहदहंकारपंचतन्मात्रेष्वष्टस्वनात्मस्वात्मबुद्धिरविद्या तमः एवं योगिनामष्टस्वणिमादिकेष्वैश्वर्येष्वप्रे
यः स्वश्रेयोबुद्धिरष्टविधो मोहः पूर्वस्मात्सातिशयः स चास्मितेत्युच्यते तथा योगेनाष्टविधमैश्वर्यमुपादाय सिद्धो भूत्वा दृष्टा
नुश्रविकान् शब्दादीन् दशविषयान्भोक्ष्य इत्येवमास्मिकाप्रतिपत्तिर्महामोहो रागः एवमेतेनैवाभिसंधिं प्रवर्तमानस्य के ना
नचित्प्रतिबद्धत्वादणिमादीनामनुत्पत्तौ तन्निबंधनस्य दृष्टानुश्रविकविषयोपभोगस्यासिद्धेः प्रतिबंधकविषयः क्रो।

तत्र प्रमाणेन बाधनमप्रमाणस्य दृष्टं तद्यथा द्विचंद्रदर्शनं सद्विषयेणैकचंद्रदर्शनेन
बाध्यत इति सेयं पंचपर्वा भवत्यविद्या अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा इ।
ति एत एव स्वसंज्ञाभिस्तमो मोहो महामोहस्तामिस्रोऽन्धतामिस्र इति एते चित्तमलप्रसं
गेनाभिधास्यंते ८ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ९ स न प्रमाणोपारोही न।

धः स तामिस्रास्त्वो द्वेषः एवमणिमादिगुणसंपत्तौ दृष्टानुश्रविकविषयप्रत्युपस्थाने च कल्पांते सर्वमेतन्नंक्ष्यतीति य
स्त्रासः सोऽभिनिवेशोऽन्धतामिस्रः तदुक्तं भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोऽष्टादशधा त
था भवत्यंधतामिस्र इति शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ननु शब्दज्ञानानुपाती चेदागमप्रमाणांतर्गतो विक ९
ल्पः प्रसज्येत निर्वस्तुकत्वे वा विपर्ययः स्यादित्यत आह स नेति न प्रमाणविपर्ययांतर्गतः कस्माद्यतो वस्तुशून्यत्वेऽपि

प्रमाणांतर्गतिं निषेधति शब्दज्ञानमाहात्म्यनिबंधन इति विपर्ययांतर्गतिं एतदुक्तं भवति क्वचिद् भेदे भेदमारोपयति क्वचि
त्पुनर्भिन्नानामभेदं ततो भेदस्याभेदस्य च वस्तुतोऽभावात्तदाभासो विकल्पो न प्रमाणं नापि विपर्ययो व्यवहाराविसंवादादि।
ति शास्त्रप्रसिद्धमुदाहरणमाह तद्यथेति किं विशेष्यं केन व्यपदिश्यते विशेष्यते नाभेदे विशेष्यविशेषणभावो नहि ग
वा गोर्विशेष्यते किंतु भिन्नेन चैत्रेण तदिदमाह भवति च व्यपदेशे वृत्तिः व्यपदेश्यव्यपदेशकयोर्भावो व्यपदेशः वि
शेषण विशेष्यभावोऽयं इति यावत् तस्मिन्वृत्तिर्वाक्यस्य यथा चैत्रस्य गौरिति शास्त्रीयमेवोदाहरणांतरं समु
च्चिनोति तथेति प्रतिषिद्धो वस्तुनः पृथिव्यादेर्धर्मः परिस्पंदो यस्य स तथोक्तः कोऽसौ निष्क्रियः पुरुषः न खलु सां

वस्तुशून्यत्वेऽपि शब्दज्ञानमाहात्म्यनिबंधनो व्यवहारो दृश्यते तद्यथा चैतन्यं पुरु
षस्य स्वरूपमिति यदा चितिरेव पुरुषः तदा किमत्र केन व्यपदिश्यते भवति च व्य।
पदेशे वृत्तिः यथा चैत्रस्य गौरिति तथा प्रतिषिद्धवस्तुधर्मा निष्क्रियः पुरुषः तिष्ठति
बाणः स्थास्यति स्थित इति गतिनिवृत्तौ धात्वर्थमात्रं गम्यते ०॥

ख्यीयेणर्द्धतो भावो नामक९

श्चिद्वस्तुधर्मोऽस्ति येन पुरुषो विशेष्येतेत्यर्थः क्वचित्पाठः प्रतिषिद्धा वस्तुधर्मा इति तस्यार्थः प्रतिषेध्याभावाः प्रति
षिद्धा न वस्तुधर्माणां तद्व्याप्तता भावाभावयोरसंबंधादपृथक्तथा प्रतीतिरिति लौकिकमुदाहरणमाह तिष्ठति बा
ण इति यथा हि पचति छिनत्तीत्यत्र पूर्वापरीभूताः कर्मक्षणप्रचयरूपफलावच्छिन्नाः प्रतीयंते एवं तिष्ठतीत्यत्रा
पि पूर्वापरीभावमेवाह स्थास्यति स्थित इति ननु भवतु पाकवत् पूर्वापरीभूतयावस्थानक्रिया बाणाच्चिन्न
या बाणस्य व्यपदेश इत्यत आह गतिनिवृत्तौ धात्वर्थमात्रं गम्यते गतिनिवृत्तिरेव तावत्कल्पितानस्याभाव
रूपत्वं तत्रापि पूर्वापरीभाव इत्यहो कल्पनाया वैभवं ०॥

आ॰वा॰
१०

व
अभावः कल्पितो भावइव चानुगतश्च सर्वेषु पुरुषेषु गम्यते न पुरुषव्यतिरिक्तो धर्मः कश्चिदित्युदाहरणांतरमाह नत्
पानुत्पत्तिधर्मेति प्रमाणविपर्ययाभ्यामन्यान्विकल्पवृत्तिरिति वादिनो वहवः प्रतिपेदिरे तन्मांति बोधनायोदाह
रणप्रपंच इति मंतव्यं अभावप्रत्ययालंबना वृत्तिर्निद्रा अधिकृतं हि वृत्तिपदमनुवादकं प्रमाणविपर्ययविकल्प
स्मृतीनां वृत्तित्वं प्रतिपत्तीनां कासाम् अविप्रतिपत्तेरनस्तदनुद्यते विशेषविधानाय निद्रायास्तु वृत्तित्वे परीक्षकाणाम्
स्ति विप्रतिपत्तिरिति वृत्तित्वं विधेयं न च प्रकृतमनुवादकं विधानाय कल्पत इति पुनर्वृत्तिग्रहणं जाग्रत्स्वप्नवृत्तीना
मभावस्तस्य प्रत्ययः कारणं बुद्धिसत्त्वाच्छादकं तमस्तदेवालंबनं विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा बुद्धिसत्त्वं हि

तथानुत्पत्तिधर्मा पुरुष इति उत्पत्तिधर्मस्याभावमात्रमवगम्यते न पुरुषान्वयी धर्मः
तस्माद्विकल्पितः स धर्मस्तेन चास्ति व्यवहार इति ९ अभावप्रत्ययालंबना वृत्ति
र्निद्रा १० सा च संप्रबोधे प्रत्यवमर्शात् प्रत्ययविशेषः कथं सुखमहमस्वाप्सं प्रसन्नं
मे मनः प्रज्ञां मे विशारदीकरोति दुःखमहमस्वाप्सं स्त्यानं मे मनो भ्रमत्यनवस्थितम्
नो

त्रिगुणत्वात् यदा सत्त्वरजसी अभिभूय समस्तकरणावरकमाविरस्ति तमस्तदा बुद्धेर्विषयाकारपरिणामाभावादुद्भूतत
मोमयीं बुद्धिमवबुध्यमानः पुरुषः सुषुप्तोऽन्तःसंज्ञ इत्युच्यते कस्मात्पुनर्निरुद्धव्ये वल्पयोरिव वृत्त्यभाव एवं न
निद्रेत्यत आह सा च संप्रबोधे प्रत्यवमर्शानुसोपपत्तिकात्स्मरणात्प्रत्ययविशेषः कथं यदा हि सत्त्वसचिवं तम
आविरस्ति तदेदृशः प्रत्यवमर्शः सुप्तोत्थितस्य भवति सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशारदीकरोति
स्वच्छीकरोतीति यदा तु रजःसचिवं तम आविरस्ति तदेदृशः प्रत्यवमर्श इत्याह दुःखमहमस्वाप्सं स्त्यानं अकर्म १०

स्येममनःकस्मान्नपुनर्भ्रमत्यनवस्थितम् नमःशिवाय०

तदाश्रिताबोधजन्यास्तद्विषयात्यभावकारणविषयाः २

नितांतमभिभूतरजःसत्त्वेन तमःसमुद्रेकेण स्वापे प्रबुद्धस्य प्रत्यवमर्शमाह गाढं मूढोऽहमस्वाप्सं गुरूणि मे गात्राणि क्लांतं मे चित
मलसं मुषितमिव तिष्ठतीति साध्यव्यतिरेके हेतुव्यतिरेकमाह सखल्वयमिति प्रबुद्धस्य प्रबुद्धमात्रस्य न दाश्रिताश्चेन्नि
बोधकाले प्रत्ययानुभवे वृत्त्यभावकस्मरणानुभव इत्यर्थः ननु प्रमाणादयो वृत्त्या न चित्ताधिकरणा निरोध्यं तां समा
धिप्रतिपक्षत्वान्निद्रायास्त्वैकाग्र्यवृत्तितुल्यायाः कथं समाधिप्रतिपक्षतेत्यत आह सा च समाधाविति एकाग्रतु
ल्यापि तामसत्वेन निद्रा सबीजनिर्बीजसमाधिप्रतिपक्षेति सापि निरोद्धव्येत्यर्थः अनुभूतविषयासंप्रमोषः स्मृ

गाढं मूढोऽहमस्वाप्सं गुरूणि मे गात्राणि क्लांतं मे चित्तं अलसं मुषितमिव तिष्ठतीति
सखल्वयं प्रबुद्धस्य प्रत्यवमर्शो न स्यात् असति प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च
तद्विषया न स्युः तस्मात्प्रत्ययविशेषो निद्रा सा च समाधावितरप्रत्ययवन्निरोद्धव्येति
१० अनुभूतविषयाऽसंप्रमोषः स्मृतिः किं प्रत्ययस्य चित्तं स्मरति आहोस्विद्विषय
स्येति ११

ति प्रमाणादिभिरनुभूते विषये योऽसंप्रमोषोऽस्तेयं सा स्मृतिः संस्कारमात्रजन्यं हि ज्ञानस्य संस्का
रकारणानुभवावभासितो विषयः स्मृतिरपि तद्धिक विषयपरिग्रहस्तु संप्रमोषः स्तेयं कस्मात्सादृश्यान्मुषस्तेयइत्य
स्मात्संप्रमोषपदव्युत्पत्तेः यतइर्कं भवति सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाधिगमयंति स्मृ
तिः पुनर्न पूर्वानुभवमर्यादामति क्रामति तद्विषया तदूनविषया वा न तु तदधिकविषया सोयं वृत्यंतराद्विशेषः स्मृ
तेरिति विमृशति किं प्रत्ययस्येति ग्राह्यप्रवणत्वात् अनुभवस्य स्वानुभवाभवात्तज्जः संस्कारोऽपि ग्राह्यमेवस्मार
यतीति प्रतिभाति ० ॥

अनुभवमात्रजनितत्वाच्चानुभवमेवेति विमर्शोपपत्तिः उभयस्मरणमवधारयति ग्राह्यप्रवणतया ग्राह्योपरक्तः प-
रमार्थतस्तु ग्राह्यग्रहणे एव उभयं तयोराकारं स्वरूपं निर्भासयति प्रकाशयति स्वव्यंजकं कारणमंजनमाकारो यस्य स
थोक्तः स्वकारणकार इत्यर्थः व्यंजकमुद्बोधकं तेनांजनं फलाभिमुखीकरणं यस्येति वेत्यर्थः ननु यद्विवरणवि-
चारेण बुद्धिस्मरणयोः सारूप्यं कस्तर्हि भेद इत्यत आह तत्र ग्रहणेति ग्रहणमुपादानं न वस्तुहीनस्योपादानं सं-
भवतीत्यतो नानधिगततत्त्वबोधनं बुद्धिरित्युक्तं ग्रहणकारो ग्रहणरूपं पूर्वं प्रधानं यस्याः सा तथोक्ता विकल्पित ९
ग्राह्यमभेदेपि गुणप्रधानभाव इति ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता इदमेव च ग्राह्याकारस्य ग्राह्यस्य पू-

ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तथाजातीयकं संस्कारमारभते स
संस्कारः स्वव्यंजकांजनः तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति त
त्र ग्रहणाकारपूर्वा बुद्धिः ग्राह्याकारपूर्वा स्मृतिः सा च द्वयी भावितस्मर्तव्या च स्वप्ने
भावितस्मर्तव्या जाग्रत्समये त्व भावितस्मर्तव्येति सर्वाः स्मृतयः प्रमाणविपर्ययवि-
कल्पनिद्रास्मृतीनामनुभवात्प्रभवंति ०॥

किंवेयद्वृत्त्यंतरविषयीकृतत्वमर्थस्य तदनेन वृत्त्यंत-
रविषयीकृतगोचरप्रवृत्तिरित्युक्तं भवति सोयमसंप्रमोष इति ननु अस्ति स्मृतेरपि संप्रमोषः दृश्यते हि पित्रादेरतीत-
स्य देशकालांतरानुभूतस्यानुभूतचरदेशकालांतरसंबंधः स्वप्न इत्यत आह सा च द्वयीति भावितः कल्पितः स्मर्त-
व्यो यया सा तथोक्ता अभावितोऽकल्पितः पारमार्थिक इति यावत् नैयं स्मृतिरपि तु विपर्ययस्तल्लक्षणोपपन्नत्वा-
त् स्मृत्याभासतया तु स्मृतिरुक्ता प्रमाणाभासमिव प्रमाणमिति भावः कस्मात्पुनरेते स्मृतेरुपप्लवा इत्यत आह सर्वाः ११
स्मृतय इति अनुभवः प्राप्तिः प्राप्तिपूर्वा वृत्तिः स्मृतिस्ततः स्मृतीनामुपजन इत्यर्थः ०॥

ननु यद्येवं क्लिष्टानि ते निरोद्धव्याः प्रेक्षावता क्लेशात्मकत्वात् न तु वृत्तयः तत्किमर्थमासां निरोध इत्यत आह सर्वाश्चैता इति
सुगमं निरोधोपायं पृच्छति अथेति सूत्रेणोत्तरमाह अभ्यासवैराग्याभ्यां तन्निरोधः अभ्यासवैराग्ययोर्निरोधे जनयित-
व्ये अवांतरव्यापारभेदेन समुच्चयो न तु विकल्प इत्याह चित्तनदीति प्राग्भारः प्रबंधः निम्नता गंभीरता साधनेति याव-
त् तत्राभ्यासस्य स्वरूपप्रयोजनाभ्यां लक्षणमाह तत्र स्थितौ यत्नोऽभ्यासः तथा च वदे चित्तस्यावृत्तिकस्य राजसतामस-

सर्वाश्चैता वृत्तयः सुखदुःखमोहात्मिकाः सुखदुःखमोहाश्च क्लेशेषु व्याख्येयाः सु-
खानुशयी रागः दुःखानुशयी द्वेषः मोहः पुनरविद्येति एताः सर्वा वृत्तयो निरोद्धव्या
: आसां निरोधे संप्रज्ञातो वा समाधिर्भवति असंप्रज्ञातो वेति अथासां निरोधे
क उपाय इति ११ अभ्यासवैराग्याभ्यां तन्निरोधः १२ चित्तनदी नामोभयतोवा-
हिनी वहति कल्याणाय वहति पापाय च या तु कैवल्यप्राग्भारा विवेकविषयनिम्ना
सा कल्याणवहा संसारप्राग्भारा विवेकविषयनिम्ना पापवहा तत्र वैराग्येण विषय-
स्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाट्यते इत्युभयाधीन-
श्चित्तवृत्तिनिरोधः १२ तत्र स्थितौ यत्नोऽभ्यासः चित्तस्यावृत्तिकस्य प्रशांतवाहिता
स्थितिः तदर्थः प्रयत्नो वीर्यमुत्साहः तत्संपिपादयिषया तत्साधनानुष्ठानमभ्यासः

वृत्तिरहितस्य प्रशांतवाहिता विमलता सात्त्विकवृत्तिवाहितैकाग्रता स्थितिः तदर्थ इति स्थिताविति निमित्तसप्तमी
व्याता यथा चर्मणि द्वीपिनं हंतीति प्रयत्नमेव पर्यायाभ्यां विशदयति वीर्यमुत्साह इति तस्येच्छायोनितामाह तत्संपि-
पादयिषयातदिति स्थितिं परामृशति ०

प्रयत्नस्यविषयमाह तत्साधनेतिस्थितिसाधनान्यंतरंगबहिरंगाणियमनियमादीनि साधनानि चक्षुःकर्तुं व्यापारोनफलं
मोचयइति ननुव्युत्थानसंस्कारेणानादिवासनाग्रथितेनाप्रतिबद्धोभ्यासः कथंस्थितयेकल्पतइत्यतआह सतुदीर्घकाल
नैरंतर्यसत्कारासेवितोदृढभूमिः सोयमभ्यासोविशेषणत्रयसंपन्नःसन्दृढावस्थोनसहसाव्युत्थानसंस्कारैरभि
भूतस्थितिरूपविषयोभवति यदिपुनरेवंभूतमप्यभ्यासंकृत्वोपरमेततः कालपरिवासेनाभिभवेत्तस्मान्नोपरंतव्य
व्यमितिभावः वैराग्यमाह दृष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यं चेतनाचेतनेषुदृष्टविषयेषुवि

सतुदीर्घकालनैरंतर्यसत्कारासेवितोदृढभूमिः १४ दीर्घकालासेवितःनिरंतरा
सेवितःसत्कारासेवितःतपसाब्रह्मचर्येणविद्ययाश्रद्धयाचसंपादितःसत्कारवा
नदृढभूमिर्भवति व्युत्थानसंस्कारेणद्रागित्येवानभिभूतविषयइत्यर्थः १४ दृ॰
ष्टानुश्रविकविषयवितृष्णस्यवशीकारसंज्ञावैराग्यं १५ स्त्रियोन्नपानमैश्वर्य
मितिदृष्टविषयवितृष्णस्यस्वर्गवैदेह्यप्रकृतिलयत्वप्राप्तावानुश्रविकविषयेवितृष्णस्य

तृष्णस्याह स्त्रियइति ऐश्वर्यमाधिपत्यं अनुश्रवोवेदस्ततोधिगतानुश्रविकाःस्वर्गादयस्तत्रापिवितृष्णस्याह
स्वर्गेतिदेहरहितावैदेहाःकरणेषुलीनाःतेषांभावोवैदेह्यं अन्येतुप्रकृतिमेवात्मानंमन्यमानाःप्रकृत्युपास
काःप्रकृतौसाधिकारायामेवलीनास्तेषांभावःप्रकृतिलयत्वंतत्प्राप्तिविषयेवितृष्णस्यआनुश्रविकविषये ९२
वितृष्णोहिस्वर्गादिप्राप्तिविषयेवितृष्णउच्यते ०

ननुयदिवैतृष्ण्यमात्रंवैराग्यंतर्हितद्विषयप्राप्त्यप्राप्त्योरपितदस्तीतिवैराग्यंस्यादित्यतआह दिव्यादिष्वेति तवैतृष्ण्यमात्रंवै
राग्यंअपितुदिव्यादिव्यविषयसंप्रयोगेपिचित्तस्यअनाभोगात्मिकातामेवस्पष्टयति हेयोपादेयशून्यासंगद्वेषरहि
तायोपेक्षाबुद्धिर्वशीकारसंज्ञाकुतःपुनरियमित्यतआह प्रसंख्यानबलादिति तापत्रयपरीततांविषयाणांदोषदृष्ट
त्यभिभावनयातत्साक्षात्कारःप्रसंख्यानंतद्बलादित्यर्थः यतमानसंज्ञाव्यतिरेकसंज्ञाएकेंद्रियसंज्ञावशीकारसं
ज्ञाचेतिचतस्रःसंज्ञाइत्यागमिनः रागादयःखलुकषायाश्चित्तवर्तिनस्तैरिंद्रियाणियथास्वंविषयेषुप्रवर्त्यंतेतन्
माप्रवर्तिषतेंद्रियाणितद्विषयेष्विति तत्परिपाचनायारंभःप्रयत्नःसायतमानसंज्ञातदारंभेसतिकेचित्कषा
याःपक्वाःपच्यंतेपक्ष्यंतेचकेचित्तत्रपक्ष्यमाणेभ्यःपक्वानांव्यतिरेकेणावधारणंव्यतिरेकसंज्ञाइंद्रियप्रवर्तनास

दिव्यादिव्यविषयसंयोगेपिचित्तस्यविषयदोषदर्शिनःप्रसंख्यानबलादनाभोगात्मि
काहेयोपादेयशून्यावशीकारसंज्ञावैराग्यं १५ तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यं
१६ दृष्टानुश्रविकविषयदोषदर्शीविरक्तःपुरुषदर्शनाभ्यासात्तच्छुद्धि० मर्थतयाव

क्तानामौत्सुक्यमात्रेणमनसिव्यवस्थानमेकेंद्रियसंज्ञा औत्सुक्यमात्रस्यापिनिवृत्तिरुपस्थितेष्वपिदिव्यादि
व्यविषयेषूपेक्षाबुद्धिःसंज्ञात्रयानुपरवशीकारसंज्ञा एतयैवचपूर्वासांचरितार्थत्वात्ततःएवयमुक्ताइति
सर्वमवदातं अपरंवैराग्यमुक्त्वापरमाह तत्परंपुरुषख्यातेर्गुणवैतृष्ण्यं अपरवैराग्यस्यपरवैराग्यंप्रतिकारणत्वं
तत्रचद्वारमादर्शयति दृष्टानुश्रविकविषयदोषदर्शीविरक्तइति अनेनापरंवैराग्यंदर्शितं पुरुषदर्शनाभ्या
सादागमानुमानाचार्योपदेशासमधिगतस्यपुरुषस्यदर्शनेतस्याभ्यासःयोगःपुनःपुनर्निषेवणंतस्मात्तस्यदर्श
नस्यशुद्धीरजस्तमःपरिहाण्यासत्त्वैकतानतातया०

भा॰वा॰
१३

योगुणपुरुषयोःप्रकर्षेणविवेकःपुरुषःपृथग्भूतोऽन्तःतद्विपरीतागुणाइतितेनाप्यायितावुद्धिर्यस्ययोगिनःसतथोक्तस्तद्वे
न्धर्ममेघाख्यःसमाधिरुक्तःसतथाभूतोयोगीगुणेभ्योव्यक्ताव्यक्तधर्मकेभ्यःसर्वथाविरक्तःसत्वपुरुषान्यताख्याताव
पिगुणात्मिकायांयावद्विरक्तइति तत्तस्मात्द्वयंवैराग्यं पूर्वंहिवैराग्यंसत्वसमुद्रेकविधूततमस्तिजःकणकलंकसंपृक्ते
चित्तसत्वेनत्रुटितोक्तिकानामपिसमानंतेहितेनैवप्रकृतिलयावभूवुःयथोक्तंवैराग्यात्प्रकृतिलयइति तत्रतयोर्द्वयोर्मध्ये
यदुत्तरंतत्ज्ञानप्रसादमात्रं मात्रग्रहणेनतिविषयतांसूचयति तदेवहिनादर्शयतिचित्तसत्वंरजोलेशमलेनाप्यपराम
ष्टमस्याश्रयोऽतएवज्ञानप्रसादइत्युच्यतेचित्तसत्वंहिप्रसादस्वभावमपिरजस्तमःसंपर्कात् मलिनतामनुभवतिवै

प्रविवेकाप्यायितबुद्धिर्गुणेभ्योव्यक्ताव्यक्तधर्मकेभ्योविरक्तइतितत्द्वयंवैराग्यं तत्रयदुत्तरंतत्ज्ञानप्रसादमात्रं यस्योदयेप्रत्युदितख्यातिरेवंमन्यतेप्राप्तंप्रापणीयंक्षीणाः क्षेतव्याःक्लेशाःछिन्नः

तम्याभ्यासविमलवारिधाराधौतसमस्तरजस्तमोमलंतत्वतिप्रसन्नंज्ञा
नप्रसादमात्रमपरिशेषंभवति तस्यगुणानुवादेयत्नाबदर्शयति यस्योदयेसतियोगीप्रत्युदितख्यातिःख्यातिविशेषे
सतिवर्तमानख्यातिमानित्यर्थःप्रापणीयंकैवल्यंप्राप्तंयथावत्पतिजीवन्नेवविद्वान्मुक्तोभवति संक्रममात्रस्य
छिन्नमूलस्यसिद्धत्वादितिभावःकुतःप्राप्तंयतःक्षीणाःक्षेतव्याःक्लेशाःअविद्यादयःसवासनाः नन्वस्तिधर्मा
धर्मसमूहोभवस्यजन्ममरणप्रबंधस्यसंक्रमःप्राणिनांततःकैवल्यमित्यतआह छिन्नइति ०॥ १३

श्लिष्टानिनिःसंधीनिपर्वाणियस्यसतथोक्तःधर्माधर्मसमूहस्तस्यहिनःपर्वाणितानिश्लानिहिजातुजंतुमरणजन्मप्रबंधेन
विप्रज्वनैसोयंभवसंक्रमःक्लेशाहृपेछिन्नःयथावत्त्यतिक्लेशमूलःकर्माशयःसतिमूलेतद्विपाकइति ननुप्रसंख्यानपरि
पाकंधर्ममेघंचनिरोधंप्रत्यंतरं किंतदस्तियत्ज्ञानप्रसादमात्रमित्यतआह ज्ञानस्यैवेति धर्ममेघमिदएवपरंवैराग्यंनान्यत्
यथावक्ष्यतिप्रसंख्यानेप्यकुसीदस्यसर्वथाविवेकख्यातेर्धर्ममेघःसमाधिःतदासर्वावरणमलापेतस्यज्ञानस्यानंत्यात्
ज्ञेयमल्पमितिच तस्मादेतस्यहिनांतरीयकमविनाभाविकैवल्यमिति उपायमभिधायसप्रकारोपकथनायपृच्छ

श्लिष्टपर्वाभवसंक्रमोयस्याविच्छेदात् जनित्वाम्रियतेमृत्वाचजायतइति ज्ञानस्यैव पराकाष्ठावैराग्यं एतस्यैवहिनांतरीयकंकैवल्यमिति अथोपायद्वयेननिरुद्धचित वृत्तेःकथमुच्यतेसंप्रज्ञातःसमाधिरिति १६ वितर्कविचारानंदास्मितारूपानुगमा त् संप्रज्ञातः वितर्कःचित्तस्यालंबनेस्थूलआभोगःसूक्ष्मोविचारः

ति अथोपायद्वयेने
ति वितर्कविचारानंदास्मितारूपानुगमात्संप्रज्ञातःसंप्रज्ञातपूर्वकत्वादसंप्रज्ञातस्यप्रथमंसंप्रज्ञातोपवर्णनं साप्रज्ञा
तःसामान्यंवितर्कविचारानंदास्मितानांरूपैःस्वरूपैरनुगमात् प्रतिपत्तव्यंवितर्कविवृणोति चित्तस्येति स्वरूपसाक्षा
त्कारवतीप्रज्ञाभोगःसचस्थूलविषयत्वात्स्थूलःयथाहिप्राथमिकोधानुष्कःस्थूलमेवलक्ष्यंविध्यत्यथसूक्ष्मं
एवंप्राथमिकेयोगीस्थूलमेवपांचभौतिकंचतुर्भुजादिध्येयंसाक्षात्करोत्यथसूक्ष्ममिति एवंचित्तस्यालंबनेसूक्ष्म
आभोगःस्थूलकारणभूतसूक्ष्मपंचतन्मात्रलिंगालिंगविषयोविचारः

तदेवंग्राह्यविषयं दर्शयित्वा ग्रहणविषयं दर्शयति आनंद इति इंद्रियेस्थूल आलंबने चित्तस्याभोगः आल्हादः आनंदः प्रकाश
शीलतया खलु सत्त्वप्रधानादहंकारादिंद्रियाण्युत्पन्नानि सत्त्वं सुखमिति तान्यपि सुखानीति तस्मिन्नाभोग आल्हाद इति ग्रही
तृविषयं संप्रज्ञातमाह एकात्मिकासंविदिति अस्मितात्प्रभवानांद्रियाणां तेषामस्मितामुत्तमरूपं सा चात्मना ग्रहीत्रास
ह बुद्धिरेकात्मिका संविदिति तस्यां च ग्रहीतुरंतर्भावाद्भवति ग्रहीतृविषयः संप्रज्ञात इति चतुर्णामप्युत्तरोत्तरेऽभ्यवांतरविशेष
माह तत्र प्रथम इति कार्यं कारणानुप्रविष्टं न कारणं कार्येण तदयं स्थूल आभोगः स्थूलस्थूलेंद्रियास्मिताकारणचतुष्टयानु

आनंदो ह्लादः एकात्मिका संविदस्मिता तत्र प्रथमः चतुष्टयानुगतः समाधिः सवितर्कः द्वि
तीयो वितर्कविकलः सविचारः तृतीयो विचारविकलः सानंदः चतुर्थस्तद्विकलः अ
स्मितामात्र इति सर्व एते सालंबनाः समाधयः अथासंप्रज्ञातसमाधिः किमुपायः
किंस्वभावो वेति १७ विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः १८ सर्ववृत्तिप्रत्य
स्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसंप्रज्ञातः तस्य परं वैराग्यमुपायः ०

गतो भवति इतरे तु त्रिद्व्येककारणकाल्पिद्व्येकरूपा भवंति असंप्रज्ञातमाह इतरेति सर्वमत इति क्रमप्राप्तमसंप्रज्ञा
तमवतारयितुं पृच्छति अथेति विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः पूर्वपदेनोपायकथनमंतराभ्यां च स्वरूप
कथनं मध्यमं पदं विवृणोति सर्ववृत्तीति प्रथमं पदं व्याचष्टे तस्य परमिति विरामो वृत्तीनामभावस्तस्य प्रत्ययः
कारणं तस्याभ्यासस्तदनुष्ठानं पौनःपुन्यं तदेव पदं वैराग्यस्य सत्त्या ० ॥ १४

अथापरवैराग्यं निरोधकारणं कस्मान्न भवतीत्यत आह सालंबनो हीति कार्यसरूपं कारणं युज्यते न विरूपं विरूपं चापरं
वैराग्यं सालंबनत्वेन निरालंबनस्य समाधिना कार्येण न समानं निरालंबनादेव ज्ञानप्रसादमात्रात्तस्योत्पत्तियुक्ता धर्ममेघसमाधि
रेव हि नितांतं विगलितरजस्तमोमलात् बुद्धिसत्त्वादुपजातस्तदिष्यतिक्रमेण प्रवर्तमानैनं तो विषयाव च दर्शी समस्तवि
षयपरित्यागात्स्वरूपप्रतिष्ठः स निरालंबनः संस्कारमात्रशेषस्य निरालंबनस्य समाधेः कारणमुपपद्यते सारूप्यादिति
आलंबनीकरणमाश्रयणमभावप्राप्तमिव वृत्तिरूपकार्याकरणात् निर्बीजो निरालंबनः अथवा बीजं क्लेशकर्माशया

सालंबनो ह्यभ्यासस्तत्साधनाय न कल्पत इति विरामप्रत्ययो निर्वस्तुक आलंबनीक्रि
यते स चार्थशून्यः तदभ्यासपूर्वं चित्तं निरालंबनमभावप्राप्तमिव भवतीत्येष निर्बीजः
समाधिरसंप्रज्ञातः स खल्वयं द्विविधः उपायप्रत्ययो भवप्रत्ययश्च तत्रोपायप्रत्ययो यो
गिनां भवति १९

स्तेतिः क्रांतायसमाप्तत्वा निरोधसमाधेरवांतरभेदं हानोपादानांगमादर्शयति स खल्वयं
निरोधसमाधिर्द्विविधः उपायप्रत्ययश्च उपायो वक्ष्यमाणः श्रद्धादिः प्रत्ययः कारणं यस्य निरोधसमाधेः स तथोक्तः भ
वंति जायंते प्रत्यांजंत वइति भवो विद्या भूतेंद्रियेषु वा विकारेषु प्रकृतिषु वाव्यक्तमहदहंकारपंचतन्मात्रेषु नात्मख्या
ति कानां वैराग्यसंयतानां स खल्वयं भवः प्रत्ययः कारणं यस्य निरोधसमाधेः स भवप्रत्ययः तत्र योगिनां उपायप्रत्यय
यो योगिनां मोक्षमाणानां भवति विशेषविधानेन शेषस्यामुमुक्षुसंबंधं निषेधति ०

केषां तर्हि भवप्रत्यय इत्यत्र सूत्रेणोत्तरमाह भवप्रत्ययो विदेहप्रकृतिलयानां विदेहाश्च प्रकृतिलयाश्च तेषामित्यर्थः तत्र चादौ विदेहानां देवानां भवप्रत्ययो मूर्तेन्द्रियाणामन्यतमदात्मत्वेन प्रतिपन्नाः तदुपासनया तद्वासनावासितान्तःकरणाः पिंडपातानन्तरमिंद्रियेष्वेव भूतेष्वालीनाः संस्कारमात्रावशेषमनसः षाट्कौशिकशरीररहिता विदेहाः ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः प्राप्नुवन्तः विदेहा प्रकृतिकल्पं च कैवल्येन सारूप्यं साधिकारसंस्कारशेषतया च वैरूप्यं संस्कारमात्रोपभोगेनेति व्याचष्टे तस्यार्थः संस्कारमात्रमेवोपभोगो यस्य तेनानुचितवृत्तिनेत्यर्थः प्राप्नाव अथ यः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्त्यतिक्रामन्ति पुनरपि संसारे विशन्ति तथा च वायुप्रोक्तं दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः

भवप्रत्ययो विदेहप्रकृतिलयानां १९ विदेहानां देवानां भवप्रत्ययः ते हि स्वसंस्कारमात्रोपयोगेन चित्तेन कैवल्यपदमिवानुभवन्तः स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति तथा प्रकृतिलयाः साधिकारे चेतसि प्रकृतिलीने कैवल्यपदमिवानुभवन्ति यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तमिति १९

भौतिकास्तु शतं पूर्णमिति तथा प्रकृतिलयाश्च अव्यक्तमहदहंकारपंचतन्मात्रेष्वन्यतमदात्मत्वेन प्रतिपन्नास्तदुपासनया तद्वासनावासितान्तःकरणाः पिंडपातानन्तरमव्यक्तादीनामन्यतमस्मिन् लीनाः साधिकारेऽचरितार्थे एवं हि चरितार्थे चेतः स्यात् यदि विवेकख्यातिमपि जनयेत् जनितसत्त्वपुरुषान्यताख्यातेश्चेतसोऽचरितार्थत्वात् साधिकारत्वं तेषु तत्साधिकारे चेतसि प्रकृतौ लीने कैवल्यपदमिवानुभवन्ति यावन्न पुनरावर्ततेऽधिकारवशाच्चित्तमिति प्रकृतिसाम्यमुपगतमप्यवधिं प्राप्य पुनरपि प्रादुर्भवति तत्रोविचिन्त्यते यथा वर्षातिपाते मृद्भावमुपगतो मंडूकदेहः पुनरंभोदवारिधारावसेकान्मंडूकदेहभावमनुभवतीति तथा च वायुप्रोक्तं सहस्रं त्वाभिमानिकाः बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः पूर्णं शतसहस्रं तु तिष्ठन्त्य

व्यक्तचिन्तकाः पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते इति

तदस्य पुनर्भवप्राप्तिहेतुत्वात् पर्वं सिद्धं योगिनां तु समाधेरुपायक्रममाह श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां तत्र विदेहप्रकृतिलयादिभिन्नानामिहापि श्रद्धा चेतस आह श्रद्धा चेतसः संप्रसादः स चागमानुमानाचार्योपदेशसमधिगततत्त्वविषयो भवति हि चेतसः संप्रसादः अभिरुचिरतीच्छा श्रद्धा तेन द्वियादीनामभिमानिनामभिरुचिः संप्रसादो हि सः व्यामोहमूलत्वादित्यर्थः कुतोऽसावेव श्रद्धेत्यत आह साहि जननीव कल्याणी योगिनं पाति विमार्गपातजन्मनोऽनर्थात् सोयमिच्छाविशेषः कल्याणविषयः प्रयत्नं प्रसूत इत्याह तस्य हि श्रद्दधानस्य तस्य विवरणं विवेकार्थिनो वीर्यमुपजायते स्मृतिर्ध्यानमनाकुलमविक्षिप्तं समाधीयते योगांगसमाधिपूर्वकं भ

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषां २० उपायप्रत्ययो योगिनां भवति श्रद्धा चेतसः संप्रसादः साहि जननीव कल्याणी योगिनं पाति तस्य हि श्रद्दधानस्य विवेकार्थिनो वीर्यमुपजायते समुपजातवीर्यस्य स्मृतिरुपतिष्ठते स्मृत्युपस्थाने च चित्तमनाकुलं समाधीयते समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते येन यथावद्वस्तु जानाति तदभ्यासात्तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति० ॥

वति यमनियमादीनां तदीयकसमाध्युपन्यासेन च यमनियमादयोऽपि सूचिताः तदेवमखिलयोगांगसंपन्नस्य संप्रज्ञातो जायत इत्याह समाहितचित्तस्येति प्रज्ञा या विवेकः प्रकर्षेणोपजायते संप्रज्ञातपूर्वमसंप्रज्ञातो भवतीत्याह तदभ्यासात्तत्रैव तत्र भूमिप्राप्तेन तद्विषयाच्च वैराग्यादसंप्रज्ञातः समाधिर्भवति स हि कैवल्यहेतुः सत्त्वपुरुषान्यताख्यातिपूर्वो हि निरोधश्चित्तमखिलकार्यकरणेन चरितार्थमधिकाराद्वसादयति०

पा॰ वा॰ १९ ननु श्रद्धादय उपाया योगोपायास्तर्हि सर्वेषामविशेषेण समाधितत्फले स्यातां दृश्यते तु कस्यचित्सिद्धिः कस्यचिद्विलम्बेन कस्यचिच्चिरेण सिद्धिः
कस्यचिच्चिरतरेण सिद्धिः कस्यचित्तु क्षिप्रमित्यत आह ते खलु नव योगिन इति उपायाः श्रद्धादयो मृदुमध्याधिमात्राः प्राग्भवीयसंस्कारा-
दृष्टवशाद्येषां तेन थोक्ताः संवेगो वैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवेति तेषु यादृशां क्षिप्रीयसी सिद्धिस्ता-
न्दर्शयति सूत्रेण तीव्रसंवेगानामासन्न इति सूत्रशेषं भाष्यं समाधिः संप्रज्ञातस्तत्फलमसंप्रज्ञातस्तस्यापि कैवल्यं मृदुमध्या-

ते खलु नव योगिनो मृदुमध्याधिमात्रोपाया भवन्ति तद्यथा मृदूपायो मध्योपायोऽधि-
मात्रोपाय इति तत्र मृदूपायोऽपि त्रिविधो मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेग इति तथा म-
ध्योपायस्तथाधिमात्रोपाय इति २० तत्राधिमात्रोपायानां तीव्रसंवेगानामासन्नः २१
समाधिलाभः समाधिफलं च भवतीति २१ मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः
२२ मृदुतीव्रो मध्यतीव्रोऽधिमात्रतीव्र इति ततोऽपि विशेषः तद्विशेषादपि मृदुतीव्रसं-
वेगस्यासन्नः ततो मध्यतीव्रसंवेगस्यासन्नतरः तस्मादधिमात्रतीव्रसंवेगस्याधि-
मात्रोपायस्याप्यासन्नतमः समाधिलाभः समाधिफलं चेति २२ किमेतस्मादेवा-
सन्नतमः समाधिर्भवति अथास्य लाभे भवत्यन्योऽपि कश्चिदुपायो न वेति ईश्वर-
प्रणिधानाद्वा २३ प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्या-
नमात्रेण तदभिध्यानादपि योगिन आसन्नतरः समाधिलाभः फलं च भवतीति २३
अथ प्रधानपुरुषव्यतिरिक्तः कोऽयमीश्वरो नामेति ०॥

धिमात्रत्वात्ततोऽपि विशेषः निगदव्याख्याते-
न भाष्येण व्याख्यातमिति सूत्रान्तरं पातयितुं विमृशति किमेतस्मादेवेति न वा पाठः संशयनिवर्तकः ईश्वरप्रणिधानाद्वा व्याच- १९
ष्टे प्रणिधानाद्वा व्याचष्टे प्रणिधानाद्भक्तिविशेषान्मानसाद्वाचिकात्कायिकाद्वा आवर्जितोऽभिमुखीकृतस्तमनुगृह्णाति
अभिध्यानमनागतेऽर्थे इच्छा इदमस्याभिमतमस्त्विति तन्मात्रेण न व्यापारान्तरेण शेषं सुगमम्

ननु चेतनाचेतनाभ्यामेव मूर्तं तावन्न विश्वं ईश्वरोऽप्येतेन न तर्हि प्रधानं प्रधानविकाराणामपि प्रधानमध्यपातात्तथा च न तस्यावर्जन-
त्वादयश्चेतनस्तथापि चितिशक्तेरौदासीन्यात् संसारितया चास्मितादिविरहात्कुत आवर्जनं कुतश्चाभिध्यानमित्याशयवानाह
अथ प्रधानेति अनन्तरसूत्रेणोत्तरमाह क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः अविद्यादयः क्लेशाः क्लिश्नन्ति खल्व-
मी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति कुशलाकुशलानीति धर्माधर्मौ तयोश्च कर्मजत्वादुपचारेण कर्मत्वं विपाको जा-
त्यायुर्भोगाः विपाकानुगुणा वासनास्ता आचित्तभूमौ आशेरत इत्याशयाः नहि करभजातिनिर्वर्तकं कर्म प्राग्भवीयकर-
भभोगभावितां भावनामनपेक्ष्य तदभिव्यनक्ति तावत्करभोचितां भोगाय कल्पयति तस्माद्भवति करभजात्यनुभवजन्मा भावना

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः २४ अविद्यादयः क्लेशाः
कुशलाकुशलानि कर्माणि तत्फलं विपाकस्तदनुगुणा वासना आशयाः ते च मन-
सि वर्तमानाः पुरुषे व्यपदिश्यन्ते स हि तत्फलस्य भोक्तेति यथा जयः पराजयो वा यो-
द्धृषु वर्तमानः स्वामिनि व्यपदिश्यते यो ह्यनेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः ०॥

कर्मविपाकानुगुणेति नन्वमी क्लेशादयो बुद्धिधर्मा न कथंचिदपि पुरुषं परामृशन्तीति तत्पुरुषग्रहणादेव तदपरामर्शसिद्धेः
कृतं क्लेशकर्मेत्यादिनेत्यत आह ते च मनसि वर्तमानाः सांसारिके पुरुषे व्यपदिश्यन्ते कस्मात्स हि तत्फलस्य भोक्ता चेतयि-
तेति तस्मात्पुरुषत्वादीश्वरस्यापि तत्संबन्धः प्राप्त इति तत्प्रतिषेध उपपद्यत इत्याह यो ह्यनेन बुद्धिस्थेनापि पुरुषमात्रसा-
धारणेन भोगेनापरामृष्टः स पुरुषविशेष ईश्वरः विशिष्यत इति विशेषः पुरुषान्तराद्व्यवच्छिद्यते ० ॥

भावा॰
१७

विशेषपदव्यावर्त्यं दर्शयितुकामः परिचोदनापूर्वं परिहरति कैवल्यं प्राप्तास्तर्हीति प्रकृतिलयानां प्राकृतो बंधः वैकारिको विदेहानां दक्षिणादिबंधो दिव्यादिव्यविषयभोगभाजां तान्यमूनि त्रीणि बंधनानि प्रकृतिभावनासंस्कृतमनसो हि देहपातानंतरमेव प्रकृतिलयतामापद्यंते तेषां पूर्वा बंधकोटिः प्रज्ञायते तेनोत्तरकोटिविधानमात्रमिह तु पूर्वापरकोटिनिषेध इति संक्षिप्य विशेषं दर्शयति स तु सदैव मुक्तः सदैवेश्वर इति ज्ञानक्रियाशक्तिसंपदैश्वर्यं अत्रेद इति योऽसाविति ज्ञानक्रिये हि चलज्जीव परिणामिन्याः संभवत इति रजस्तमोरहितविशुद्धचित्तसत्त्वाश्रये वक्तव्ये न चेश्वरस्य सदामुक्तस्याविद्याप्रभव चित्तसत्त्वसमुत्कर्षे

कैवल्यं प्राप्तास्तर्हि संति च बहवः केवलिनः ते हि त्रीणि बंधनानि छित्त्वा कैवल्यं प्राप्ताः ईश्वरस्य च तत्संबंधो न भूतो न भावी यथा मुक्तस्य पूर्वा बंधकोटिः प्रज्ञायते नैवमीश्वरस्य यथा वा प्रकृतिलीनस्योत्तरा बंधकोटिः संभाव्यते नैवमीश्वरस्य स तु सदैव मुक्तः सदैवेश्वर इति योऽसौ प्रकृष्टसत्त्वोपादानादीश्वरस्य

एनसह स्वस्वामिभावसंबंधः संभवतीत्यत उक्तं प्रकृष्टसत्त्वोपादानादिति नेश्वरस्य चित्तसत्त्वं न स्वेनाविद्यानिबंधनमपि तु सत्त्वेन स्वस्वामिभावः किंतु तापत्रयपरीतान् प्रेत्यभावमहार्णवात् जंतून् उद्धरिष्यामि ज्ञानधर्मोपदेशेन न च ज्ञानक्रियासामर्थ्यातिशयसंपत्तिमंतरेण तदुपदेशो न चैषामपहतरजस्तमोमलविशुद्धसत्त्वोपादानं विनेत्यालोच्य सत्त्वप्रकर्षमुपादत्ते भगवान् अविद्याभिमानी वाविद्यायां तत्त्वमविद्वान् भवति न पुनरविद्यां विद्यात्वेन सेवमानः न खलु शैलूषो रामत्वमारोप्य तां तां चेष्टां दर्शयन् भ्रांतो भवति तदिदमाहार्यमस्य रूपं न तात्त्विकमिति ॰ ॥ १७

स्यादेतद् बुद्धिधीर्यया भगवता सत्त्वमुपादेयं तदुपादानेन च तद्बुद्धिधीर्यया अस्याश्च अविद्याकृतत्वात् यावान्योन्याश्रय इत्यत उक्तं शाश्वतिक इति भवेदेतदेवं यदीदं प्रथमतः सर्गस्य भवेदनादौ तु सर्गसंहारप्रबंधे सर्गांतरसमुत्पत्त्यर्थं संजिहीर्षावधिस्य येयं पूर्णमयासत्त्वप्रकर्ष उपादेय इति प्रणिधानं कृत्वा भगवान् जगत् संजहार तदा चेश्वरचित्तसत्त्वं प्रणिधानवासितं प्रधानसाम्यमुपगतमपि विपरिपूर्णमहाप्रलयावधौ प्रणिधानवासनावशात् तथैवेश्वरचित्तसत्त्वभावेन परिणमते यथा चैत्रः श्वः प्रातरेवोत्थातव्यं मयेति प्रणिधाय सुप्तः प्रत्यवबुध्यते तथैव प्रणिधानसंस्कारात् तस्मादनादित्वादीश्वरप्रणिधानसत्त्वोपादानयोः शाश्वतिकत्वेन नान्योन्याश्रयः न चेश्वरस्य चित्तसत्त्वं महाप्रलयेऽपि न प्रकृतिसाम्यमुपैतीति वाच्यं यस्य हि न कदाचिदपि प्रधानसाम्यं न तस्य प्राधानिकं वापि चिच्छक्तिः अनंतत्वात् इत्यर्थो नरमप्राणिकमापद्येत न च आयुक्तं प्रकृतिपुरु

शाश्वतिक उत्कर्षः स किं सनिमित्त आहोस्विन्निर्निमित्त इति तस्य शास्त्रं निमित्तं शास्त्रं पुनः किंनिमित्तं प्रकृष्टसत्त्वनिमित्तं ॥

षव्यतिरेकेणार्थांतराभावात् सोऽयमीदृश ईश्वरस्य शाश्वतिक उत्कर्षः किं सनिमित्तः सप्रमाणकः आहोस्विन्निर्निमित्तो निष्प्रमाणक इति उत्तरं तस्य शास्त्रं निमित्तं श्रुतिस्मृतीतिहासपुराणानि शास्त्रं चोदयति शास्त्रं पुनः किंनिमित्तं प्रत्यक्षानुमानपूर्वं हि शास्त्रं न चेश्वरस्य सत्त्वप्रकर्षैकस्य चित्तस्य प्रत्यक्षमनुमानं वास्ति न चेश्वरप्रत्यक्षप्रभवं शास्त्रमिति युक्तं कल्पयितुं यथाप्रकाशानापेतेति भावः परिहरति प्रकृष्टसत्त्वनिमित्तं अयमभिसंधिः मंत्रायुर्वेदेषु तावदीश्वरप्रणीतेषु प्रवृत्तिसामर्थ्यादर्थाव्यभिचारविनिश्चयात् प्रामाण्यं सिद्धं न चैषविधिभेदातीनं संयोगविशेषाणां च मंत्राणां च तत्त्वनिरूपणं सहस्रेणापि पुरुषायुषैर्लौकिकप्रमाणव्यवहारी शक्यः कर्तुमन्वयव्यतिरेकौ॰

भा॰वा॰
१८

नचागमादन्वयव्यतिरेकाभ्यां चागमसत्त्वं नानयोरनादित्व दिति प्रतिपादयितुमुक्तं महाप्रलयेन त्वं नानयोर्विच्छेदात् नचतभेदे
वैप्रमाणाभावः आसिज्ञप्रधानविकारे जगदिति हि प्रतिपाद्य व्यते सदृशपरिणामस्य विसदृशपरिणाममादृष्टाय याद्वारे तुर
सादेर्दधिगुडादिरूपं विसदृशपरिणामस्य पूर्वसदृशपरिणा मानां च दृष्टान्तादिह प्रधानेनापि महदहंकारादिरूपविसदृशपरि
णामेन सतना भाव्यं कदाचित्सदृशपरिणामेनापि सदृशपरि णामश्चास्य साम्यावस्था स च महाप्रलयस्तस्मात्तत्रापि वेदप्रणय
नानां बुद्धिगतवतो विप्लवितरजस्तमोमलावरणतयावहितः प्र सन्नमानं बुद्धिसत्त्वमास्थेयं तथा चाभ्युदयनिःश्रेयसोपदेशपरो
तनुत्वाभावे ति क्लेशानां मता न वे हि बलवद्भिर्विरोधिप्रज्ञा सत्त्वपुरुषान्यताख्यातिरुदेतुमेव नोत्सहते प्रागेव तद्वंध्याभावं क(
तुं प्रविरलीकृतेषु तु क्लेशेषु दुर्बलेषु तद्विरोधिन्यपि वैराग्याभ्यासमुपजायते उपजाता चैतैरपरामृष्टा अनभिभूता नैव साध्या
यावत्प्रसवं एषा तेन सत्त्वपुरुषान्यतामात्रख्यातिः सूक्ष्मा प्रज्ञा तीक्ष्णतया सूक्ष्मो यस्या विषय इति सूक्ष्मा प्रज्ञा सा प्रतिप्रस ३४
वाय प्रविलयाय कल्पिष्यते कुतः समाप्ताधिकारः कार्यारम्भणं गुणानां यथा हेतुभूतया सा तथोक्तेति ० [illegible]
मभद्राय गोपालाय नमः
समाप्ताधिकारायतः १

पठन्ति अथेति अविद्येति सूत्रेण परिहरत्यविद्याः क्लेशाः व्याचष्टे पंच विपर्ययाः इति अविद्या नाम बुद्धिपर्याय एव अस्मि
आविर्भवन्ति तादयोऽप्यविद्योपादानात्तद्विनिर्भागवर्तिनः इति विपर्ययाः ननु अविद्यासमुच्छेदेनैषामपि समुच्छेदो युक्त इति भावः त
एषामुच्छेदो न व्यतो हेतुं संसारकारणत्वमाह ते स्पन्दमानाः समुदाचरन्तो गुणानामधिकारं दृढयन्ति बलवन्तं कुर्वन्ति अन्त
एव परिणाममवस्थापयन्ति अव्यक्तमहदहंकारपर्यन्ता हि कार्यकारणस्रोत उन्नमयन्ति उद्भावयन्तीत्यर्थः सर्वमेतत् कुर्वन्ति कु
न ह्यो च तिष्ठन्त्वरेति कर्मणां विपाकं जात्यायुर्भोगलक्षणः पुरुषार्थः तमभी क्लेशा अभिनिर्हरन्ति निष्पादयन्ति किं प्रत्ये

अथ के क्लेशाः कियन्तो वेति २ अविद्यास्मितारागद्वेषाभिनिवेशाः पंच क्लेशाः ३ क्लेशा इ
ति पंच विपर्यया इत्यर्थः ते स्पन्दमाना गुणाधिकारं दृढयन्ति परिणाममवस्थापयन्ति कार्य
कारणस्रोत उन्नमयन्ति परस्परानुग्रहतंत्री भूत्वा कर्मविपाकं चाभिनिर्हरन्तीति ३ अवि
द्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां ४ अत्राविद्याक्षेत्रं प्रसवभूमिरुत्तरेषामस्मि
तादीनां चतुर्विधकल्पितानां प्रसुप्ततनुविच्छिन्नोदाराणां तत्र का प्रसुप्तिः चेतसि शक्ति
मात्रप्रतिष्ठानां बीजभावोपगमः ०

कं नेत्याह परस्परानुग्रहेति कर्मभिः क्लेशाः क्लेशैश्च कर्माणी
ति ३ हेयानां क्लेशानामविद्यामूलत्वं दर्शयति अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां तत्र का प्रसुप्तिरिति
स्वोचितामर्थक्रियामकुर्वतां क्लेशानां सद्भावे न प्रमाणमस्तीत्यभिप्रायः उच्यते उत्तरं चेतसीति मात्रामात्रार्थक्रिया
कार्यः क्लेशाः विदेहप्रकृतिलयानां बीजभावं प्राप्तास्तु ते शक्तिमात्रेणासते तिष्ठीरह वदधिन हि विवेकख्यातेरन्यद्
स्ति कारणं तद्वंध्यतायां अतो विदेहप्रकृतिलयाविवेकख्यातिविरहिणः प्रसुप्तक्लेशान यावन्तदवधिकालं
प्राप्नुवन्ति ०॥

भा०वा० ३५ तन्त्वा प्रीतनुपुनरप्रवृत्ताः सन्तः क्लेशास्तेषु तेषु विषयेषु संमुखीभवन्ति शक्तिमात्रेण प्रतिष्ठायेषां ते तथोक्ताः तदनेनोत्पत्तिशक्ति रुक्ता बीजभावोपगमइति च कार्यशक्तिरिति ननु विवेकख्यातिमतोपि क्लेशाः कस्मान्न प्रसुप्ता इत्यत आह प्रसंख्यानवत इ पा
ति चरमदेहो न तस्य देहान्तरमुत्पत्स्यते यद्वा चरमस्य देहः पूर्व इत्यर्थः नान्यत्र विदेहादिस्थितस्य यः ननु सतो नाशं तु विनाश इति श्रि
किमिति तद्वीययोगर्द्धिवले न विषयसंमुखीभावेन क्लेशाः प्रबुध्यन्त इत्यत आह सतामिति सन्तु क्लेशाः दग्धक्लेशा प्रसंख्या स्ते

तस्य प्रबोध आलम्बने संमुखीभावः प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेप्यालम्बने नासौ पुनरस्ति दग्धबीजस्य कुतः प्ररोह इति अतः क्षीणक्लेशः कुशलश्चरमदेह इत्युच्यते तत्रैव सा दग्धबीजभावा पंचमी क्लेशावस्था नान्यत्रेति सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति विषयस्य संमुखीभावेपि सति न भवत्येषां प्रबोध इत्युक्ता प्रसुप्तिर्दग्धबीजानामप्ररोहश्च तनुत्वमुच्यते प्रतिपक्षभावनोपहताः क्लेशास्तनवो भवन्ति तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः समुदाचरन्तीति विच्छिन्नाः कथं रागकाले क्रोधस्यादर्शनात् न हि रागकाले क्रोधः समुदाचरति ०

नाग्निना बीजभावइत्यर्थः क्लेशप्रतिपक्षः क्रियायोगस्तस्य भावनमनुष्ठानं तेनोपहतास्तनवः अथवा सम्यक्कृता नमविद्यायाः प्रतिपक्षः भेददर्शनमस्मितायामाध्यस्थ्यं रागद्वेषयोरनुबंधबुद्धिनिवृत्तिरभिनिवेशस्येति विच्छि तिमाह तथेति क्लेशानामन्यतमेन समुदाचरता भिभवाद्वा स्वान्तविषयस्य वा विच्छिद्य विच्छिद्य तेन तेनात्मना समुदाचरन्ति आविर्भवन्ति वाजीकरणाद्युपयोगेन वाभिभावकदौर्बल्येन वेति वीप्सया विच्छेदसमुदाचारयोः पौनःपुन्यं दर्शयता पयोर्नु प्रसुप्ताद्भेद उक्तः ० तमोभग क्ले ३५ क्ता

रागेण वा समुदाचरता विजातीयः क्रोधो भिभूयते सजातीये न वा विषयान्तरवर्तिना रागेणैव विषयान्तरवर्ती रागोभिभूयत इत्याह रागेति भविष्यद्भोगरूपी गतिः यथायोगं वेदितव्येत्याह सहीति भविष्यद्वृत्तिक्लेशमात्र यत्परम्परीसर्वे नाम न चैत्रस्य रागपराग्रीतस्य विच्छित्त्वाद्वेति उदारमाहृ विषयइति ननूदारएव युक्त्वा न क्लिश्नाती ति भवतु क्लेशोन्येन क्लिश्नन्तः कथं क्लेशा इत्यत आह सर्वएवैतइति क्लेशविषयत्वं क्लेशपदवाच्यत्वं नातिक्रामंति उदारतामापद्यमाना अतएव तेपि हेया इति भावः क्लेशात्वेनैकतां मन्यमानश्चोदयति कस्तर्हीति क्लेशात्वेन समानत्वेपि यथोक्तावस्था भेदाद्विशेष इति यदि

रागश्च कुचिद्दृश्यमानो न विषयान्तरे नास्ति नैकस्यां स्त्रियां चैत्रो रक्त इति अन्यासु स्त्रीषु विरक्तः किं तु तत्र रागो लब्धवृत्तिः अन्यत्र भविष्यद्वृत्तिरिति स हि तदा प्रसुप्ततनुविच्छिन्नो भवति विषये यो लब्धवृत्तिः स उदारः सर्वएवैते क्लेशविषयत्वं नातिक्रामन्ति कस्तर्हि विच्छिन्नः प्रसुप्तस्तनुरुदारो वा क्लेश इति उच्यते सत्यमेवैतन् किं तु विशिष्टानामेवैतेषां विच्छिन्नादित्वं यथैव प्रतिपक्षभावनातो निवृत्तस्तथैव स्वव्यंजकांजनेनाभिव्यक्त इति सर्वएवामी क्लेशा अविद्याभेदाः कस्मात्सर्वेष्वविद्यैवाभिप्लवते यदविद्यया वस्त्वाकार्यते तदेवानुशेरते क्लेशा विपर्यासप्रत्ययकाले उपलभ्यन्ते क्षीयमाणां चाविद्यामनु क्षीयन्त इति ० ॥

हरति उच्यते सत्यमिति स्यादेतद विद्यातो भवन्तु क्लेशाः तथाप्यविद्यानिवृत्तौ कस्मान्निवर्तन्ते न खलु पटः कुविंदनिवृत्तौ निवर्तत इत्यत आह सर्वएवेति भेदाइव भेदास्तदविनिर्भागवर्तिन इति यावत् कस्मात् उक्तं सर्वेष्विति तदेव स्फुटयति यदिति आकार्यते समारोप्यते प्रोषं सुगमं प्रसुप्तास्तनुत्वली नानां तन्ववस्थाश्च योगिनां विच्छिन्नोदाररूपाश्च क्लेशा विषयसंगिनामिति संग्रहः ० ॥

दि मा

भा॰वा॰ ३६ अनित्याशुचिरविद्या अनित्यत्वोपयोगिविशेषणं कार्यइति केचित्किल भूतानि नित्यत्वेनाभिमन्यमानास्तद्रूपमभीप्सवस्तान्येवोपासते एवं धूमादिमार्गानुपासते चंद्रसूर्यतारकाद्युलोकान्नित्यानभिमन्यमानास्तत्प्राप्तये एवं दिवौकसो देवानमृतानभिमन्यमानास्तत्प्राप्त्यै सोमं पिबंति आम्नायते हि अपाम सोमममृता अभूमेति सेयमनित्येषु नित्यत्वख्यातिरविद्या तथा अशुचौ परमबीभत्से काये धीकएव काय बीभत्सतायां वैयासिकीं गाथां पठति स्थानादिति मा प्र

तत्राविद्यास्वरूपमुच्यते ॥ अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ५ अनित्ये कार्ये नित्यख्यातिः तद्यथा ध्रुवा पृथिवी ध्रुवा सचंद्रतारका द्यौः अमृता दिवौकसइति तथाशुचौ परमबीभत्से काये शुचिख्यातिः उक्तं च स्थानाद्बीजादुपष्टंभान्निःस्यंदान्निधनादपि कायमाधेयशौचत्वात्पंडिता ह्यशुचिं विदुः इत्यशुचौ शुचिख्यातिर्दृश्यते नवेव शशांकलेखा कमनीयेयं कन्या मध्वमृतावयवनिर्मितेव चंद्रं भित्त्वा निःसृतेव ज्ञायते नीलोत्पलपत्रायताक्षी हावगर्भाभ्यां लोचनाभ्यां जीवलोकमाश्वासयंतीवेति कस्य केनाभिसंबंधः भवति चैवमशुचौ शुचिविपर्यासप्रत्ययइति धौ घ पृष

तद्दर्शयति मूत्राद्युपहतं स्थानं पित्रोर्लोहितरेतसी बीजं अशितपीताहाररसादिभावउपष्टंभः तेन शरीरं धार्यते निःस्यंदः प्रस्वेदः निधनं च श्रोत्रियशरीरमप्यपवित्रयति तत्स्पर्शे स्नानविधानात् ननु यदि शरीरमशुचि कृतं तर्हि मज्जलादिक्षालनेनेत्यत आह आधेयशौचत्वादिति स्वभावेनाशुचेरपि शरीरस्य शौचमाधेयं सुगंधितेव कामिनामंगनागादिति अशुचौ शुचिख्यातिं दर्शयति इत्युक्तेभ्यो हेतुभ्यो अशुचौ शरीरइति शुचिख्यातिमाह नवेति हावः शृंगारजा लीला कस्य स्त्रीकायस्य परमबीभत्सस्य केनमंदतमसादृश्येन शशांकलेखादिना संबंधः नमो भगवते वा ३६ भाववृंजकः

(margin: त नी)

तिरश्चो दुःखितान्दृष्ट्वा कुमिदं शर्म सपान् मृच्छाभानो भिमन्यन्ते दुर्योनेर्मे चिता इमी १

गु २

एतेनाशुचौ स्त्रीकाये शुचिख्यातिप्रदर्शनेन अपुण्ये हिंसादौ संसारमोचकादीनां पुण्यप्रत्ययः एवमर्जनरक्षणादिदुःखबहुलतयानर्थे धनादावर्थप्रत्ययो व्याख्यातः स्वर्गे जुगुप्सितत्वेनाशुचित्वात् तथा दुःखइति सुगमं तथानात्मनीति सुगममुत्तरं चैतदत्रोक्तं च शिविनव्यक्तं चेतनं पुत्रदारपश्वादि अव्यक्तं मचेतनं शय्यासनाशनादि स सर्वोऽप्रतिबुद्धो मूढः चत्वारि पदानि अस्या नान्यस्यादिति चतुष्पदा नत्वस्या अपि द्विडोहालातचक्रादिविषयान्नंतपदा अविद्या तत्किमुच्यते चतुष्पदेत्यत आह मूलमस्येति संतु नाम अन्या अप्यविद्याः संसारबीजं चतुष्पदेवेति नत्वविद्येति नञ्स

एतेनापुण्ये पुण्यप्रत्ययस्तथैवानर्थे चार्थप्रत्ययो व्याख्यातः तथा दुःखे सुखख्यातिं वक्ष्यति परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनइति तत्र सुखख्यातिरविद्या तथानात्मन्यात्मख्यातिर्बाह्योपकरणेषु चेतनाचेतनेषु भोगाधिष्ठाने वा शरीरे पुरुषोपकरणे वा मनस्यनात्मन्यात्मख्यातिरिति तथैतदत्रोक्तं व्यक्तमव्यक्तं वा सत्त्वमात्मत्वेनाभिप्रतीत्य तस्य संपदमनुनंदत्यात्मसंपदं मन्वानस्तस्य व्यापदमनुशोचत्यात्मव्यापदं मन्वानः स सर्वोऽप्रतिबुद्धइत्येषा चतुष्पदा भवत्यविद्या मूलमस्य क्लेशसंतानस्य कर्माशयस्य च सविपाकस्येति ० मास: पूर्वपदार्थप्रधानो वास्यादर्थान्तरविकल्पमिति उत्तर

॥० पदार्थप्रधानो वा यथा अरण्यपुरुषइति अन्यपदार्थप्रधानो वा यथा मक्षिकोद्देशइति तत्र पूर्वपदार्थप्रधानत्वे विद्यायाः प्रसज्यप्रतिषेधो गम्येत न चास्य क्लेशादिकारणत्वं उत्तरपदार्थप्रधानत्वे वा विधेवकस्यचिदभावेन विद्याया अविद्याप्रसक्तिः स्यात् तस्याश्च क्लेशादिपरिपंथिनीत्वात्तद्बीजं न हि प्रधानोपघाती प्रधानगुणो युक्तस्तदनुपघाताय गुणत्वन्याय्य कल्पनात्तस्माद्विधासरूपानुपघाताय नञोन्यं याकरणमध्याहार्यो वा निवेश्य स्येति अन्यपदार्थप्राधान्ये त्वविद्यमानविद्या बुद्धिर्वक्तव्या न चासौ विद्याया अभावमात्रेण क्लेशादिबीजं विवेकस्यानिर्णूर्वकनिरोधसंपन्ना या अपित त्यान्तप्रसं ३६

(margin: न्य न धा२)

बुद्धिरिति अभावस्यापि विरोधात्वगतिहेतुत्वात् इति भावः १ क्लेशादिकारणप्रतियोगिकाभाववति लक्षणान्नत्वर्थः २ नञ्विद्याशब्दोऽविद्यापरः न नञ्स्तात्पर्यं याहक तन्मियत आह नहीति ३

भा॰वा॰ तस्मात्सर्वे एवाविद्यायानत्के श्रादिमूलत्वेत्यत आह तस्याश्चेति वस्तु नो भावो वस्तुसत्तत्वं वस्तुत्वमित्यावत् तदनेनैव प्रस ने
३० ज्यप्रतिषेधः नापितदभावविशिष्टा वुद्धिरपितु विद्याविरुद्धं विपर्ययज्ञानमविद्येत्युक्तं लोकाधीनावधारणोहि शब्दार्थ
संबंधः लोके चोत्तरपदार्थप्रधानस्यापि नञ्तत्पुरुषस्याभिधेयोपमर्दक स्वनञ्त्वेपि तन्न द्विरुद्धपरतयात त्रतत्रोपलब्धो विहा ध्रे
यितद्विरुद्धे द्वतिरितिभावः दृष्टांतं विभजते यथानामित्रइति नमित्राभावः नापिमित्रमात्रमित्यस्यानंतरं वक्तव्यं तत्र किंतु तद्वि
य रुद्धः सपत्नइतिवक्तव्यं तथागोष्पदमिति नगोष्पदाभावो न गोष्पदमात्रं किंतु देश एव विपुलो गोष्पदविरुद्धस्ताभ्यामभाव

तस्याश्चामित्रागोष्पदवद्वस्तुसतत्त्वं विज्ञेयं यथानामित्रो मित्राभावो नमित्रमात्रं किंतु तद्वि
रुद्धः सपत्नः यथावागोष्पदं नगोष्पदाभावो नगोष्पदमात्रं किंतु देश एव ताभ्यामन्यद्वस्त्वं
तरं एवमविद्या नप्रमाणं न प्रमाणाभावः किंतु विद्याविपरीतं ज्ञानांतरमविद्येति ५ दृग्दर्
शनशक्त्योरेकात्मतेवास्मिता ६ पुरुषो दृक्शक्तिर्वुद्धिर्दर्शनशक्तिरित्येतयोरेकस्वरूपा
पत्तिरिवास्मिता क्लेश उच्यते भोक्तृभोग्यशक्त्योरत्यंतविभक्तयो० नमोनारायणाय ०॥

गोष्पदाभ्यामन्यइत्यर्थाद्वस्त्वंतरं दार्ष्टांतिके योजयति एवमिति अविद्यामुक्तातस्याः कार्यमस्मितां रागादिवर्जं बामा
ह दृग्दर्शनेत्यादिसूत्रं दृक् चदर्शनं चतेएवशक्तीतयोरात्मानात्मनोरनात्मन्यात्मज्ञानलक्षणाऽविद्योपादितायारेका
र्थतेव नतुपरमार्थतः एकात्मतास्या अस्मिता दृग्दर्शनयोरितिवक्तव्ये तयोर्भोक्तृभोग्ययोर्भोग्यतालक्षणसंवंधं दर्शयितुं
शक्तिग्रहणंसूत्रं विवृणोति पुरुषइति नन्वनयोर्भेदप्रतीतेर्भेद एव कस्मान्नभवतिकुतश्चैकत्वं क्लिष्टमाति पुरुषमि ३०
त्यत आह भोक्तृभोग्येति भोग्यशक्तिर्वुद्धिर्भोक्तृशक्तिः पुरुषस्तयोरत्यंतविभक्तयोः ० नमोनारायणायनमः ०॥

द्वि
कुतोत्यंतविभक्तत्वमित्यत आह अत्यंतासंकीर्णयोरपरिणामित्वादिधर्मकः पुरुषः परिणामित्वादिधर्मिका वुद्धिरित्यसंकी
र्णता तदनेन प्रतीयमानोप्यभेदो न पारमार्थिकइत्युक्तं अविभागेतिक्लेशत्वमुक्तं अत्वयं दर्शयित्वा व्यतिरेकमाह स्वरू
पेति प्रतिलंभोविवेकख्यातिः परस्यापेत अस्मतमित्याह तदुक्तं पंचशिखेन वुद्धितइति आकारः स्वरूपं सदा विशुद्धिः शी
हासी लमौन्यं विद्याचैतन्यं वुद्धिरविशुद्धात्मानुदासीनां जडां चेतिनत्रात्मवुद्धिरविद्यामोहः पूर्वो विद्याजनितः संस्कारः तमोवा
विद्यायास्तामसत्वादिति विवेकदर्शनेरागादीनां विनिवृत्ते रविद्यापादितास्मितारागादीनांनिदानमित्यस्मितानंतरं

त्यंतासंकीर्णयोरविभागप्राप्ताविवसत्यां भोगः कल्प्यते स्वरूपप्रतिलंभेतु तयोः कैवल्यमेव
भवतिकुतो भोगइति तथाचोक्तं वुद्धितः परंपुरुषमाकारशीलविद्यादिभिः विभक्तमपश्य
न्कुर्यात तत्रात्मवुद्धिंमोहेनेति ६ सुखानुशयी रागः सुखाभिज्ञस्य सुखानुस्मृतिपूर्वः सु
क्षा खेतत्साधने वा योगर्धस्तृष्णालोभः सरागइति ७ दुःखानुशयी द्वेषः ८ दुःखाभिज्ञस्य दु
ःखानुस्मृतिपूर्वो दुःखेतत्साधने वा यः प्रतिघो मन्युर्जिघांसाक्रोधः सद्वेषः ८ स्वरसवा
ही विदुषोपि तथारूढोभिनिवेशः ० ॥ ९ ॥
राग: रागादीनूलक्षयतिसुखानुशयी रागः अनभिज्ञस्य स्मृतेर
भावात्सुखाभिज्ञस्येत्युक्तं स्मर्यमाणे सुखेरागः सुखानुस्मृतिपूर्वकः अनुभूयमानेनुसुखेनानुस्मृतिमपेक्षते तत्सा
धनेतुस्मर्यमाणे दृश्यमानेवासुखानुस्मृतिपूर्वएव राग: दृश्यमानमपिहि सुखसाधनं तज्जातीयस्य सुखहेतुतां
स्मृत्वानुजीवितयाचास्यसुखहेतुतामनुमायेच्छति अनुशयीतिपदार्थमाह यइति दुःखानुशयीद्वेषः दुःखाभिज्ञ
स्येति पूर्ववद्व्याख्येयं अनुशयिपदार्थमाह यः प्रतिघइति प्रतिहंतीति प्रतिघः एतदेव पर्यायैर्विवृणोति मन्युरि
तिस्वरसः ० ॥

नु२

भा॰वा॰ ३८ अभिनिवेशपदार्थं व्याचष्टे सर्वस्य प्राणिन इति इयमात्माशीरात्मनि प्रार्थना मा न भूवं मा अभावी भूवम् भूयासं जीव्या
समिति न चाननुभूतमरणधर्मकस्य अननुभूतो मरणधर्मो येन जन्तुना तस्यैवं भवत्यात्माशीरभिनिवेशो मरणभयं प्रसंग
तो जन्मान्तरं प्रत्यावेदयन्नास्तिकं निराकरोति एतया चेति प्रत्युत्पन्नस्य शरीरस्य म्रियमाणत्वानुपूर्वजन्मानुभवः प्रतीय
ते निकायविशिष्टाभिः पूर्वाभिर्देहेन्द्रियबुद्धिवेदनाभिः संबन्धो जन्म तस्यानुभवः प्राप्तिः सा प्रतीयते कथमित्यत आह स चा त्रा
यमभिनिवेशः आर्द्रीकावेवास्य क्लेशत्वमाह क्लेश इति अयमहितकर्मादिना जन्तून् क्लिश्नाति दुःखाकरोतीति

सर्वस्य प्राणिन इयमात्माशीर्नित्या भवति मा न भूवं भूयासमिति न चाननुभूतमरणधर्म
कस्यैषा भवत्यात्माशीः एतया च पूर्वजन्मानुभवः प्रतीयते स चायमभिनिवेशः क्लेशः
क्लेशः स्वरसवाही कृमेरपि जातमात्रस्य प्रत्यक्षानुमानागमैरसंभावितो मरणत्रास उच्छे त्रा
ददृष्ट्यात्मकः पूर्वजन्मानुभूतं मरणदुःखमनुमापयति ०॥

क्लेशः! वक्ष्यमुपक्रान्तं परिसमापयति स्वरसवाहीति स्वभावेन वासनारूपेण वहनशीलो न पुनरागन्तुकः कृमेरपि जातमा
व२ त्रस्य दुःखं कुलस्य निकृष्टतमचैतन्यस्य अनागन्तुकत्वे हेतुमाह प्रत्यक्षानुमानागमैः प्रत्युदिते जन्मन्यसंभावितः संपा
उ३ दितो मरणत्रास उच्छेददृष्ट्यात्मकः पूर्वजन्मानुभूतमरणदुःखमनुमापयति अयमभिसंधिर्जातमात्र एव हि बालको
मारकवस्तुदर्शनानुवेपमानः कंपविशेषादनुमितमरणप्रत्यासत्तिस्ततो विभ्यदुपलभ्यते दुःखानुदुःखहेतोश्च भयं दृष्टं
न चास्मिन्जन्मन्यनेन मरणमनुभूतमनुमितं श्रुतं वा प्रागेवास्य दुःखत्वं तद्धेतुत्वं वावगम्येत तस्मात्तस्य तथाभूतस्य स्मृ ३८
तिः परिशिष्यते न चेयं संस्कारादृते न चायं संस्कारोऽनुभवं विना न चास्मिन्जन्मन्यनुभव इति प्राग्भवीयः परिशिष्यत इत्या
सीत्पूर्वजन्मसंबन्ध इति ३८ त२

तथा पदं यथापदमाकांक्षानीत्यर्थः प्राप्ते यथापदे सति यादृशो वाक्यार्थो भवति तादृशं दर्शयति यथा चायमिति अ
त्यन्तमूढेषु मंदतमचैतन्येषु विदुषां दर्शयति विज्ञातपूर्वापरान्तस्यान्तः कोटिः पुरुषस्य हि पूर्वा कोटिः संसारस्तस्यैव
त्यं सैव विज्ञाताश्रुतानुमानाभ्यां येन स तथोक्तः सोऽयं मरणत्रास आकृमेश्च विदुषो रूढः प्रसिद्ध इति नन्वविदुषो
भवतु मरणत्रासो विदुषस्तु न संभवति विद्यया निर्मूलितत्वात् अनुन्मूलने वा मरणत्रासस्य स्याद्गन्तं न सत्वमित्याशयः
वान्स्पष्टमिति कस्मादिति उत्तरं समाना हीति न संप्रज्ञानवाननुविद्वानपि श्रुतानुमितविवेक इति भावः तदेवं क्लेशाल
द्विता क्लेशानां चहेयानां प्रसुप्ततनुविच्छिन्नोदाररूपतया चतस्रोऽवस्थाः दर्शिताः कस्मात्पुनः पंचमी क्लेशानामवस्थाद

यथा चायमत्यन्तमूढेषु दृश्यते क्लेशस्तथा विदुषोऽपि विज्ञातपूर्वापरान्तस्य रूढः कस्मात्
समाना हि तयोः कुशलाकुशलयोः मरणदुःखानुभवादियं वासनेति ९ ते प्रतिप्रसवहे
याः सूक्ष्माः १० ते पंच क्लेशा दग्धबीजकल्पा योगिनश्चरिताधिकारे चेतसि प्रलीने सह
तेनैवास्तं गच्छन्ति स्थितानां तु बीजभावोपगतानां ध्यानहेयास्तद्वृत्तयः ११ क्लेशानां या
वृत्तयः स्थूलास्ताः क्रियायोगेन तनूकृताः सत्यः प्रसंख्यानेन ध्यानेन हातव्याः याव
त्सूक्ष्मीकृता यावद्दग्धबीजकल्पा इति ०॥ ग्धबीजभावतया सूक्ष्मान्सूत्रकारेण कथितेत्य
त आह ते सूक्ष्माः। यत्किल पुरुषप्रयत्नगोचरस्तदुपदिश्यते न च सूक्ष्मावस्थाहानं प्रयत्नगोचरः किं तु प्रसव
विरुद्धः प्रतिप्रसवः प्रलय इत्यर्थः प्रतिप्रसवेन कार्यस्य चित्तस्यास्मितायां लक्षणकारणभावापत्त्या हातव्येति व्या
चष्टे तदिति सुगमं अथ क्रियायोगतनूकृतानां क्लेशानां किं विषयात्पुरुषप्रयत्नाद्धानमित्यत आह स्थितानां
तु बीजभावोपगतानामिति वंध्येभ्यो व्यवच्छिनत्ति सूत्रं पठति ध्यानेति व्याचष्टे क्लेशानामिति क्रियायोगतनूकृ
ताः अपि हि प्रतिप्रसवहेतुभावेन कार्यतः स्वरूपतश्च आकाशउच्छित्तुमिति स्थूला उक्ताः पुरुषप्रयत्नस्य प्रसंख्यानगो
चरस्यावस्थितमाह यावदिति सूक्ष्मीकृतादिति विश
तो निर्दग्धेति ०॥

भा॰वा॰
३९

अत्रैव दृष्टान्तमाह यथा च वस्त्राणामिति यत्नेन तन्त्रालनादिनोपायेन क्षारसंयोगादिना स्थूल[...]स्सूक्ष्मतामात्रं तथा दृष्टां
तदार्ष्टान्तिकयोः साम्यं न पुनः प्रयत्नापनेयतया प्रतिप्रसवहेयेषु तदसंभवात् स्वल्पः प्रतिपक्ष उच्छेदहेतुर्येषां तास्तथोक्ताः महा(
प्रतिपक्ष उच्छेदहेतुर्येषां तास्तथोक्ताः प्रतिप्रसवस्य चाधस्तात्प्रसंख्यानमित्यवरतया स्वल्पत्वमुक्तं स्यादेतज्जात्यायुर्भोगहेतवः पु
रुषं क्लिश्नन्तः क्लेशाः कर्माशयश्च तथा न त्वविद्यादयस्तत्कथमविद्यादयः क्लेशा इत्यत आह क्लेशमूलः कर्माशय इत्यादि क्ले
शा मूलं यस्येत्यादि च कार्यकारणे च सन्तयोक्तः एतदुक्तं भवति अविद्यादिमूलः कर्माशयो जात्यायुर्भोगहेतुरिति [...]

यथा च वस्त्राणां स्थूलो मलः पूर्वं निर्धूयते पश्चात्सूक्ष्मो यत्नेनोपायेन चापनीयते तथा
स्वल्पप्रतिपक्षाः स्थूला वृत्तयः क्लेशानां सूक्ष्मास्तु महाप्रतिपक्षा इति ११ क्लेशमूलः(
कर्माशयो दृष्टादृष्टजन्मवेदनीयः तत्र पुण्यापुण्यकर्माशयः कामलोभमोहक्रोधप्रस(
वः स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च तत्र तीव्रसंवेगेन मन्त्रतपःसमाधिभिर्नि
र्वर्तित ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स सद्यः परिप(

जात्यायुर्भोगहेतुरिति अविद्यादयोऽपि तद्धेतवो नः क्लेशा इति व्याचष्टे तत्रेति आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः
कर्मणामाशयो धर्माधर्मौ [...] कामात्काम्यकर्मप्रवृत्तौ स्वर्गादिहेतुर्धर्मो भवति एवं लोभात्परद्रव्यापहारादधर्मः मोहा
धर्मबुद्धेः प्रवर्त्तमानस्या २ द्धर्महिंसादौ धर्म एव न त्वस्ति धर्मोऽस्ति क्रोधजोऽधर्मः तथा ध्रुवस्य जनकावमानजन्मनः क्रोधात् तपोऽभ्याहिते न कर्माशये
न पुण्येनान्तरिक्षलोकवासिनामुपरिस्थानं अधर्मस्तु क्रोधजो वृत्रस्य वधादिजन्मा प्रसिद्ध एवं भूतानां तस्य द्वैविध्यमाह सद्दृष्ट ३९
जन्मेति दृष्टजन्मवेदनीयमाह तीव्रसंवेगेनेति० नमः शिवाय·

मोहजोधर्
स

विद्यार चे पृ४

यथासंख्येन दृष्टान्तावाह यथा नन्दीश्वर इति तत्र नारकाणामिति येन कर्माशयेन कुम्भीपाकादयो नरकभेदाः प्राप्यन्ते तत्कारिणो(
नारकास्तेषां नास्ति दृष्टजन्मवेदनीयः कर्माशयो न हि मनुष्यशरीरेण तत्परिणामभेदेन वा साक्षाद्दृश्यवर्षसहस्रादिनिरन्तरोप(
भोग्या वेदना संभवतीति शेषं सुगमं स्यादेतदविद्यामूलत्वे कर्माशयस्याविद्योत्पादे सत्यपि विनाशानुमानामकर्माशयान्तरं चैषी तु
क८ प्राक्तनकर्माशयानामनादिभवपरम्परासंचितानामसंख्यातानामनियतविपाककालानां भोगेन क्षपयितुमशक्यत्वादशक्योच्छेदः संसारः ता८
स्यादित्यत आह सतीति एतदुक्तं भवति सुखदुःखफलो हि कर्माशयस्तादर्थ्येन तन्नान्तरीयकतया जन्मायुषी अपि प्रसूते सु(

तथा तीव्रक्लेशेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु वा तपस्विषु कृतः
पुनः पुनरपकारः स चापि पापकर्माशयः सद्य एव परिपच्यते यथा नन्दीश्वरः कुमारो मनुष्य
परिणामं हित्वा देवत्वेन परिणतः तथा नहुषोऽपि देवानामिन्द्रः स्वकं परिणामं हित्वा तिर्यक्
त्वेन परिणत इति तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्माशयः क्षीणक्लेशानामपि
नास्त्यदृष्टजन्मवेदनीयः कर्माशय इति १२ सति मूले तद्विपाको जात्यायुर्भोगाः १३ सत्सु(
क्लेशेषु कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलः

खदुःखे च रागद्वेषानुषक्तेन
दृष्टिविनाभोगवर्तिनी तदभावे न भवतः न चास्ति संभवो न च तत्र्यस्तु व्यक्ति वोद्विजते वा तच्च तस्य सुखं दुःखं वेति तदियमात्म
भूमिः क्लेशसलिलावसिक्ता कर्मफलप्रसवक्षेत्रमित्यस्ति क्लेशानां फलोपजननेऽपि कर्माशयसहकारित्वमिति क्लेशसमुच्छेदे
सहकारिवैकल्यात्सत्स्वप्यनन्तेष्वनियतविपाककालेष्वपि प्रसंख्यानदग्धबीजभावो न फलाय कल्पत इति उक्तमर्थं भा
ष्यमेव द्योतयति सत्स्विति[...]सहाय

भा॰वा॰ ४०
अत्रैव दृष्टान्तमाह यथा तुषेति सतुषा अविदग्धबीजभावाः स्वेदादिभिः प्रारोहं तितिके योजयति तथेति ननु क्लेशपुरःशक्या अपनेतुं
नहि सततमपनयद्रूपसन आह न प्रसंख्यानदग्धक्लेशबीजभाव इति विपाकस्य त्रैविध्यमाह सचेति विपच्यते साध्यते कर्मभिरि
ति विपाकः कर्मैकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा प्रथमा विचारणा द्वितीया तु कर्मानेकत्वं ध्रुवं कृत्वा जन्मैकत्वानेक
त्वगोचरा विचारणा द्वितीयानु कर्मानेकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा तदेवं चत्वारोपि विकल्पाः तत्र प्रथमं विक
ल्पमपाकरोति नतावदेकं कर्मैकस्य जन्मनः कारणं दृष्टमिति कस्मादिति उत्तरं अनादिकाले एकैकजन्मप्रचितस्य अत एवासं

यथा तुषावनद्धाः शालितंडुलाः अदग्धबीजभावाः प्ररोहसमर्था भवंति नापनीततुषा दग्धबी
जभावा वा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न प्रसंख्या
नदग्धक्लेशबीजभावो वेति स च विपाकस्त्रिविधो जातिरायुर्भोग इति तत्रेदं विचार्यते
किमेकं कर्म एकस्य जन्मनः कारणं अथैकं कर्मानेकं जन्माक्षिपतीति द्वितीया विचार
णा किमनेकं कर्म अनेकं जन्म निर्वर्तयति अथानेकं कर्मैकं जन्म निर्वर्तयतीति नताव
देकं कर्मैकस्य जन्मनः कारणं कस्मादनादिकालप्रचितस्यासंख्येयस्यावशिष्टकर्मणः
सांप्रतिकस्य च फलक्रमानियमात् अनाश्वासो लोकस्य प्रसक्तः स चानिष्ट इति न चैकं
कर्मानेकस्य जन्मनः कारणं कस्मादनेकेषु कर्मसु एकैकमेव कर्मानेकस्य जन्मनः कार
णमित्यवशिष्टस्य विपाककालाभावः ख्येयस्य एकैकजन्म ह्युपितादेकैकस्मात्कर्मणो वशिष्टस्य कर्म
णः सांप्रतिकस्य च फलक्रमानियमाद् नाश्वासो लोकस्य प्रसक्तः स चानिष्ट इति एतदुक्तं भवति कर्मणः प्रफलस्य विरलत्वात् न
दु ष्टत्वनिवाकल्पा अन्योन्यसंपीडिताश्च कर्माशया निरंतरोत्पत्तयो निरुद्धावकाशाः स्वविपाकं प्रतीति न फलक्रमः शक्यो वधा
रयितुं प्रेक्षावतेत्यनाश्वासः पुण्यानुष्ठानं प्रतिप्रसक्त इति द्वितीयं विकल्पं निराकरोति न चैकं कर्मानेकस्य जन्मनः कारणं दृष्ट ४०
मिति कस्मादिति उत्तरं अनेकस्मिन् जन्मन्याक्षिप्ते तमेकैकमेव कर्मानेकस्य जन्मलक्षणस्य विपाकस्य निमित्तमित्यवशिष्टस्य वि
विपाककालाभावः ० रामकृष्णाय नमः रामचन्द्राय नमः राधावल्लभाय नमः ॥

स्व॰

प्रसक्तः स चाप्यनिष्ट इति कर्मवैफल्येन तदननुष्ठानप्रसंगात् यदेकजन्मसमुच्छेद्येकर्मण्येकस्मिन् फलक्रमानियमान्नाश्वासस्तत्
दु दावैव कथा वकुं जन्मसमुच्छेद्येकर्मण्येकस्मिन् तत्रावसराभावात् विपाककालाभाव एव सांप्रतिकस्येति भावः तृतीयं विकल्पं
निराकरोति न चानेकं कर्मानेकस्य जन्मनः कारणमत्र हेतुमाह तदनेकजन्म युगपन्न संभवत्ययोगिन इति क्रमेण वाच्यं यदि हि
त कर्मसहस्रं युगपज्जन्मसहस्रं प्रसुवीत तत एव कर्मसहस्रप्रवृत्त्यादवशिष्टस्य विपाककालः फलक्रमनियमश्च स्यात् तानत्वस्ति
जन्मनां यौगपद्यं एवमेव प्रथमपक्षएवोक्तं दूषणमित्यर्थः तदेवं पक्षत्रये निराकृते पारिशेष्यादनेकं कर्मैकस्य जन्मनः कारण
मिति पक्षो व्यवतिष्ठत इत्याह तस्माज्जन्मेति जन्म च प्रायणं च जन्मप्रायणे तयोरंतरं मध्यं तस्मिन् विचित्रसुखदुःखफलो

प्रसक्तः स चाप्यनिष्ट इति न चानेकं कर्मानेकस्य जन्मनः कारणं कस्मात्तदनेकं जन्मयु
गपन्न संभवतीति क्रमेण वाच्यं तथा च पूर्वदोषानुषंगस्तस्माज्जन्मप्रायणांतरे कृतः पु
ण्यापुण्यकर्माशयप्रचयो विचित्रः प्रधानोपसर्जनभावेनावस्थितः प्रायणाभिव्यक्तः
द्व एकप्रघट्टकेन मरणं प्रसाध्य संमूर्छित एकमेव जन्म करोति तच्च जन्म तेनैव कर्मणा ल
ब्धायुष्कं भवति तस्मिन्नायुषि तेनैव कर्मणा भोगः संपद्यत इति असौ कर्माशयो जन्मा
युर्भोगहेतुत्वात् त्रिविपाकोऽभिधीयत इति ० ॥ पहारेण विचित्रः पदत्वं तमुपभूतमनंतरमेव फलं दात
स्यति तत्प्रधानं यत्तु किंचिद्विलंबेन तत्तदुपसर्जनं प्रायणं मरणं तेनाभिव्यक्तः स्वकार्यारंभणाभिमुख्यमुपनीतः एकप्र घ
ट्टकेन युगपत्संमूर्छितः जन्मादिलक्षणे कार्ये कर्तव्ये एकलोलीभावमापन्नः एकमेव जन्म करोति नानेकं तत्र जन्मनमनुत्पा
दिभावः तेनैव कर्मणा लब्धायुष्कं कालभेदान्नियतजीवनं च भवति तस्मिन्नायुषि तेनैव कर्मणा भोगः सुखदुःखसाक्षा
त्कारः स्वसंबंधितया संपद्यत इति तस्मादसौ कर्माशयो जात्यायुर्भोगहेतुत्वात्त्रिविपाकोऽभिधीयते ०

के

भा·वा·
४१

औत्सर्गिकमुपसंहरति अत एकभविकः कर्माशय उक्त इति एको भवः एकभवः पूर्वकालैत्यादिना समासः एकभवे स्यात्तीति मत्वर्थीयष्ठन् कुचित्वाद्ः ऐकभविक इति तन्नैकभवशब्दात् ष्ठन् वा वैठक् प्रत्ययः एकजन्मावच्छिन्नमस्य भवनमित्यर्थः तदेव
औत्सर्गिकैकभविकस्य त्रिविपाकत्वमुक्त्वा दृष्टजन्मवेदनीयस्यैहिकस्य कर्मणस्त्रिविपाकत्वं व्यवच्छिनत्ति दृष्टेति नन्दीश्वरस्य स्नि
तत्त्वष्टवर्षावच्छिन्नायुषो मनुष्यजन्मनस्तीव्रसंवेगाधिमात्रोपायजन्मायुरप्यभेद आयुर्भोगहेतुत्वात् द्विविपाको नहुषस्य तु
सि पार्ष्णिप्रहारविशेषिनागत्वसंद्रवदप्राप्तिहेतुर्नैवकर्मणाऽऽयुषो विहितत्वात् पुण्यभेदो भोगमात्रहेतुः ननु यथैकभविकः

अत एकभविकः कर्माशय उक्त इति दृष्टजन्मवेदनीयस्त्वेकविपाकारंभी भोगहेतुत्वात्
द्विविपाकारंभी वायुर्भोगहेतुत्वान्नंदीश्वरवन्नहुषवद्वेति क्लेशकर्मविपाकानुभवनि
र्मिताभिस्तु वासनाभिरनादिकालसंमूर्छितमिदं चित्तं चित्रीकृतमिव सर्वतो मत्स्यजा
लं ग्रंथिभिरिवाततमित्येता अनेकभवपूर्विका वासनाः यस्त्वयं कर्माशय एष एवैकभवि
क उक्त इति ये संस्काराः स्मृतिहेतवस्ता वासनाः ताश्चानादिकालीना इति यस्त्वसावे
कभविकः कर्माशयः स नियतविपाकश्चानियतविपाकश्च तत्र दृष्टजन्मवेदनीयस्य
स्यानिय ७ नियतविपाकस्यैवायं नियमो न त्वदृष्टजन्मवेदनीयं तविपाकस्य० एमकत्ताय नमः॥

कर्माशयस्तथा किं क्लेशवासना भोगानुकूलाश्च कर्म विपाकानुभववासनास्त याच मनुष्यस्तिर्यग्योनिमापन्नो नत
ज्जातीयो चित्तं भुंजीतेत्यत आह क्लेशेति संमूर्छितमेकलोलीभावमापन्नं धर्माधर्माभ्यां व्यवच्छेत्तुं वासनाया स्वरूपमाह ४१
ये संस्कारा इति औत्सर्गिकमेकभविकत्वं क्वचिदपवदितुं भूमिकामारचयति यस्त्वसाविति तु शब्देन वासनातो व्यवच्छि
नत्ति दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायमेकभविकत्वे नियमः न त्वदृष्टजन्मवेदनीयस्य किंभूतस्यानियतविपाक
स्येति नमः शिवाय नमः

स्ने स्स

हेतुं दृष्टवति कस्मादिति हेतुमाह यो हीति एकं तावदुन्निमाह कृतस्येति द्वितीयामाह प्रधानेति तृतीयामाह नियतेति तत्र प्रथमां
विभजते तत्र कृतस्येति संन्यासिकर्मभ्योऽप्युत्कृष्टे कृष्णेभ्यो न्यानि त्रीण्येव कर्माणि कृष्णेभ्युत्कृष्टानि तदिह तपःस्वाध्यायादिसा शुक्लकसर
स ध्यः शुक्लकर्माशय उदितः एवादृतफलस्य कृष्णस्य नाशकः अविशेषाच्च शबलस्यापि कृष्णभागयोगादिति मन्तव्यं तत्रैव भ स
गवानाम्नायमुदाहरति यत्रेदमिति द्वे द्वे ह वै कर्मणी कृष्णं कृष्णशुक्लं अपहंतीति संबंधः वीप्सया भूयिष्ठतां सूचिता कस्ये स
त्यत आह पापकस्य पुंसः कोसावपहंतीत्यत आह एको राशिः पुण्यकृतः समूहस्य समूहिसाध्यत्वात् तदनेन शुक्लः कर

कस्मात् यो ह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः कृतस्याविपक्वस्य नाशः
प्रधानकर्मण्यावापगमनं वा नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानमिति
तत्र कृतस्याविपक्वस्य नाशो यथा शुक्लकर्मोदयादिहैव नाशः कृष्णस्य यत्रेदमुक्तं द्वे द्वे ह स
वै कर्मणी वेदितव्ये पापकस्यैको राशिः पुण्यकृतोऽपहंति तदिच्छस्व कर्माणि सुकृतानि क
र्तुमिहैव ते कर्म कवयो वेदयंते०॥
माशय उत्तीय उक्तः एतदुक्तं भवति इह दर्शनात् मार्यपरयी उदिरहितत
साधनसाध्यः शुक्लः कर्माशयो यदेकोपि सन् कृष्णान् कृष्णशुक्लांश्चात्यंतविरोधिनः कर्माशयान्भूयसोऽप्यप स
हंति तस्मादिच्छस्वेति श्लोकाद् सत्वादात्मनेपदं शोधं सुगमं अत्र च शुक्लकर्मोपदेश्यैव सकोपि महिमा यत्तदंतरे सामभावो
ननु स्वाध्यायादिजन्मनो दुःखात् न हि दुःखमात्रं विरोध्यधर्मापि तु स्वकार्यं दुःखविरोधी न च स्वाध्यायादिजन्य दुःखं त
तत स्य कार्यं कार्यत्वे स्वाध्यायादि विधानानर्थक्यात् लादेव न दुःखतः तौ वा कर्मपापाकाद्यपि विधीयेत अविधाने तदनुत्यते
वि प्रतिसंबंधं चतुरस्रं अनुत्प

द्वितीयां गतिं विभजते प्रधाने कर्मणि ज्योतिष्टोमादिके तदङ्गस्य पशुहिंसादेरावापगमनं देव खलु हिंसादेः कार्यं प्रधानाङ्गत्वेन
विधानात्तदुपकारः न हिंस्यात्सर्वा भूतानीति हिंसाया निषिद्धत्वादनर्थं च तत्र प्रधानाङ्गत्वेनानुष्ठानात्प्रधानतन्त्रैवेत्यतो न
द्वाभिन्त्येव प्रधानतिरोधे ह्रासनीयफलमनर्थं प्रसोतु नर्मदेति किं त्वारभ्यविपाके प्रधाने साहायकमाचरंती व्यवतिष्ठते प्र
धानसाहायकमाचरंत्याश्च स्वकार्यबीजमात्रतयावस्थानं प्रधाने कर्मण्यावापगमनं यत्रेदमुक्तं पञ्चशिखेन स्वल्पः संक
रो ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य पशुहिंसादिजन्मनानर्थहेतुनापूर्वेण सपरिहारः प्राक्चेति कियतापि प्रायश्चित्तेन परि
हर्तुं न चेत्प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये च विपच्येत तथापि यावत्तमसावनर्थं प्रसूते तावत्स

प्रधानकर्मण्यावापगमनं यत्रेदमुक्तं स्यात्स्वल्पः संकरः सपरिहारः सप्रत्यवमर्शः कुश
दू लस्य नापकर्षायालं कस्मात्कुशलं हि मे बव्न्यदस्ति यत्रायमावापं गतः स्वर्गेऽप्यपकर्षमल्पं
करिष्यतीति नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानम्‌ रामजी॰
प्रत्यवमर्शः

सुख मर्शयंते हि पुण्यसंभारोपनीतं सुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकां अतः कुशलस्य मह
तः पुण्यस्य नापकर्षाय प्रत्यवायपर्याप्तः कस्मादिति पुण्यवत उत्तरं कुशलं हि मे बहु अन्यदस्ति प्रधानकर्मविपाकतया परिकर॰
व्यवस्थितं दीर्घतृष्णीयादिदक्षिणांतं यत्रायं संकरः स्वल्पः स्वर्गेऽप्यस्य फले संकीर्णपुण्यलब्धजन्मनः स्वर्गे सर्वथा दुःखेना
परामृष्टाद्द्यपकर्षमल्पमल्पदुःखसंभेदं करिष्यतीति तृतीयां गतिं विभजते नियतेति वलीयस्त्वेनेह प्राधान्यमभिमतं न त्व
गितया वलीयस्त्वं च नियतविपाकत्वेनान्यदानवकाशत्वाद्द नियतविपाकस्य तु दुर्वलत्वमन्यदा सावकाशत्वात् चिरमव ४२
स्थानं बीजभावमात्रेण न पुनः प्रधानोपकारितयास्तस्य खं तत्र लात् श्रीरामजीसहाय ०

ननु प्रायशो नैकदैव कर्माशयो भिव्यज्यत इत्युक्तमिदानीं च चिरावस्थानमुच्यते तत्कथं परं पूर्वेण न विरुध्यत इत्याशयवानाह
पृच्छति कथमिति उत्तरं अदृष्टेति जात्यभिप्रायमेकवचनं न दितरस्य गतिमुक्तामवधारयति यत्त्वदृष्टेति शेषं सुगमं उक्तं क्लेश
मूलत्वं कर्मणः कर्ममूलत्वं च विपाकानां अथ विपाकाः कस्य मूलं येनामी त्यक्तव्या इत्यत आह ते ह्लादहेतुत्वात् व्याचष्टे
ते जन्मायुर्भोगा इति यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावित्वात्तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानंतरभा
वित्वात्तदनुभवात्मनस्तथाप्यनुभाव्यतया भोग्यतया भोगकर्मतामात्रेण भोगफलत्वमिति मंतव्यं नन्वपुण्यहेतुका जात्या

६ कथमिति अदृष्टजन्मवेदनीयस्यैव नियतविपाकस्य कर्मणः समानं मरणमभिव्यक्तिकार
णमुक्तं न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य यत्त्वदृष्टजन्मवेदनीयं कर्मानियत
विपाकं तन्नश्येदावापं वा गच्छेत् अभिभूतं वा चिरमप्युपासीत यावत्समानं कर्मा
भिव्यंजकं निमित्तमस्य न विपाकाभिमुखं करोतीति तद्विपाकस्यैव देशकालनिमित्तान
वधारणादियं कर्मगतिश्चित्रा दुर्विज्ञाना चेति न चोत्सर्गस्यापवादान्निवृत्तिरित्येकभ
विकः कर्माशयोऽनुज्ञायत इति १३ ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् १४
ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः अपुण्यहेतुका दुःखफला इति यथा चेदं दुः
खं प्रतिकूलात्मकं एवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः ० ॥

युर्भोगाः परितापफला भवंतु हेयाः प्रतिकूलवेदनीयत्वात्कस्मात्पुनः पुण्यहेतवस्त्यज्यंते सुखफलाः अनुकूलवेदनी
यत्वात् न चैषां प्रत्यात्मवेदनीयानुकूलता शक्यासहस्रेणाप्यनुमानागमैरपाकर्तुं न च ह्लादपरितापौ परस्परविनाभूतौ ता
यतो ह्लादमुपादीयमाने परितापोऽप्यवर्जनीयतयापतेत् तयोर्भिन्नहेतुकत्वाद्विरुद्धस्वरूपत्वाच्चेत्यत आह यथा चेदमिति हे
यद्यपि न दृष्यजनैः प्रतिकूलात्मतया विषयसुखकाले संवेद्यते दुःखं तथापि संवेद्यते योगेभिरिति

भा॰या॰ ४३

ति

प्रश्नपूर्वकं तदुपपादनाय सूत्रमवतारयति कथं तदुपपद्यत इति परिणामेत्यादि सूत्रं परिणामश्च तापश्च संस्कारश्च एतान्येव
दुःखानि तैरिति परिणामदुःखतया विषयसुखस्य दुःखतामाह सर्वस्यापि न खलु सुखं रागानुवेधमंतरेण संभवति नह्यस्ति
संभवो न तत्र तुष्यति न च तस्य सुखमिति रागस्य च प्रवृत्तिहेतुत्वात् प्रवृत्तेश्च पुण्यापुण्यापचयकारित्वात्तत्रास्ति रागजः कर्मा
छि प्रायोसतो नुपजननात्तदा च सुखं भुंजानस्तत्र सक्तोपि विच्छिन्नावस्थेन द्वेषेण द्वेष्टि दुःखसाधनानि तानि परिहर्तुमशक्तो मु
ह्यति चेति द्वेषमोहकृतोप्यस्ति कर्माशयः द्वेषवन्मोहस्यापि विपर्ययापरनाम्नः कर्माशयहेतुत्वमविरुद्धं ननु कथं रक्तो द्वि
ष्टि मुह्यति वा रागकाले द्वेषमोहयोरदर्शनादित्यत आह तथा चोक्तं विच्छिन्नावस्थानुक्लेशानुपपादयद्भिरस्माभिस्तदनेन स्या

कथं तदुपपद्यते परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥
१५ सर्वस्यायं रागानुविद्धश्चेतनाचेतनसाधनाधीनः सुखानुभव इति तत्रास्ति राग
जः कर्माशयः तथा च द्वेष्टि दुःखसाधनानि मुह्यति चेति द्वेषमोहकृतोप्यस्ति तथा चो
क्तं नानुपहत्य भूतान्युपभोगः संभवतीति हिंसाकृतोप्यस्ति शारीरः कर्माशय इति विष
यसुखं चाविद्येत्युक्तं ० ॥

वाङ्मनसप्रवृत्तिजन्मनी पुण्यापुण्ये दर्शिते इति रागादिजन्मनः कर्तव्यमिदमि
ति मानसस्य संकल्पस्य साभिलाषत्वेन वाचनिकत्वस्याप्यविशेषात् यथाहुः साभिलाषश्च संकल्पो वाच्यार्थो नातिनिश्च
न इति शारीरमपि कर्माशयं दर्शयति नानुपहत्येति अत एव धर्मशास्त्रकाराः पंचसूना गृहस्थस्येत्याहुः स्यादेतन्न प्रत्या
त्या त्मवेदनीयस्य विषयसुखस्य प्रसंख्यानमुचितं योगिनां अनुभवविरोधादित्यत आह विषयसुखं चाविद्येत्युक्तं विध
विपर्यास्तलक्षणामविद्यां दर्शयद्भिरिति नापातमात्रमाद्रियंते रक्ता अस्ति खल्वापाततो मधुविषसंपृक्तान्नोपभोगे विसु क्तं चतु
खानुभवः प्रत्यात्मवेदनीयः किं त्वायत्यामसुखमिथ्यं च दर्शिना भगवतेत्येवेति० ४३

छंने

विषयेंद्रियसंयोगाद्यत्तदग्रेमृतोपमं परिणामे विषमिव तत्सुखं राजसं स्मृतमिति चोदयति याभोगेष्विति न वयं विषयस्वादं सुख
मातिष्ठामहे किं तु तृष्णां पुंसां तत्तद्विषयप्रार्थनापरिश्लिष्टचेतसां तृष्णैव महद्दुःखं न चेयमुपभोगमंतरेण शाम्यतीति चास्याः प्रश
मो रागाद्यनुविद्ध इति नास्य परिणामदुःखता इति भावः तत्र त्वस्मात् यादृतोरिंद्रियाणामुपशांतिरप्रवर्तनं विषयेष्वित्यर्थः एतदे
व व्यतिरेकमुखेन स्पष्टयति यल्लौल्यादिति परिहरति न चेंद्रियाणामिति हेतावनोः प्रयोगः सत्यं तत्समाश्रयः सुखमनवद्यं तस्य स्मा

याभोगेष्विंद्रियाणां तृप्तेरुपशांतिः तत्सुखं याल्लौल्यादनुपशांतिस्तद्दुःखं न चेंद्रियाणां भोगा
छंप भ्यासेन वैतृष्ण्यं कर्तुं शक्यं कस्मात् यतो भोगाभ्यासमनु विवर्द्धंते रागाः कौशलानि चेंद्रि
याणामिति तस्मादनुपायः सुखस्य भोगाभ्यास इति स खल्वयं वृश्चिकविषभीत इवाशीवि
षेण दष्टो यः सुखार्थी विषयाननुवासितो महति दुःखपंके मग्न इति एषा परिणामदुःख
ता नाम प्रतिकूला सुखावस्थायामपि योगिनमेव क्लिश्नाति अथ का तापदुःखता सर्वस्य
द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति तत्रास्ति द्वेषजः कर्माशयः सुख
साधनानि च प्रार्थयमानः कायेन वाचा मनसा च परिस्पंदते ततः परमनुगृह्णात्युपहंति
चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभान्मोहाच्च भवतीत्येषा
तापदुःखतोच्यते का पुनः संस्कारदुःखता ० ॥ ननु भोगाभ्यासो हेतुरपि तु तत्स्यायामेव तद्विरोधिन्याः
यथाहुः न जातु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धत इति शेषमतिरोहितं तापदुःखतां पृच्छ
ति अथ केति उत्तरं सर्वस्येति सर्वजनप्रसिद्धत्वेन तत्स्वरूपमप्रपंचमकृत्वा तापदुःखतापि परिणामदुःखतासमत्याप्र
पंचितेति संस्कारदुःखतां पृच्छति केति ० ॥

इतरं सुखानुभवेति सुखानुभवो हि संस्कारमाधत्ते स च सुखस्मरणं तच्च रागं स च मनःकायवचनचेष्टां सा च पुण्यापुण्ये ताभ्यां विपा
कानुभवस्ततो वासनेत्येवमनादिरिति अत्र च सुखदुःखसंस्कारातिशयात्तत्स्मरणं तस्माच्च रागद्वेषौ ताभ्यां कर्माणि कर्मभ्यो वि
पाक इति योजना तदेवं दुःखस्रोतः प्रसृतं योगिनमेव क्लिश्नाति नेतरं ॰ यकूजनमित्याह एवमिदमनादीति इतरं तु त्रिपर्वा
णस्तापा अनुप्लवन्त इति संबन्धः आधिदैविकाधिभौतिकयोस्तापयोर्बाह्यत्वेनैकत्वं विवक्षितं चित्तवृत्तिरस्यास्त्यविद्या चि

सुखानुभवात्सुखसंस्काराशयो दुःखानुभवादपि दुःखसंस्काराशय इति एवं कर्म
भ्यो विपाकेऽनुभूयमाने सुखे दुःखे वा पुनः कर्माशयप्रचय इति एवमिदमनादि दुःखस्रो
तो विप्रसृतं योगिनमेव प्रतिकूलात्मकत्वादुद्वेजयति कस्मात् अक्षिपात्रकल्पो हि वि
द्वानिति यथोर्णातन्तुरक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नान्येषु गात्रावयवेषु एवमेतानि
दुःखानि अक्षिपात्रकल्पं योगिनमेव क्लिश्नन्ति नेतरं प्रतिपत्तारं इतरं तु स्वकर्मोपहृतं
दुःखमुपात्तमुपात्तं त्यजन्तं त्यक्तं त्यक्तमुपाददानं अनादिवासनाविचित्रया चित्तवृत्त्या स
मन्ततोऽनुविद्धमिवाविद्यया हातव्य एवाहंकारममकारानुपातिनं जातं जातं बाह्याध्या
त्मिकोभयनिमित्तास्त्रिपर्वाणस्तापा अनुप्लवन्ते तदेवमनादिदुःखस्रोतसा व्युह्यमान
मात्मानं भूतग्रामं दृष्ट्वा योगी सर्वदुःखक्षयकारणं सम्यग्दर्शनं शरणं प्रपद्यत इति गुण
वृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानु

त्तवृत्तिरूपा हातव्य एव बुद्धीन्द्रियशरीरादौ दारापत्यादौ चाहंकारममकारानुपातिनमिति तदत्र न सम्यग्दर्शनादन्यच्छर
णमस्तीत्याह तदेवमिति तदेवमौपाधिकं विषयसुखस्य परिणामतापसंस्कारतया प्रसंयोगाद्दुःखत्वमभिधाय स्वा
भाविकमादर्शयति गुणवृत्तिविरोधाच्चेति व्याचष्टे प्रख्याप्रवृत्तिस्थितिरूपाः बुद्धिरूपेण परिणता गुणाः सत्त्वरजस्तमांसि

शान्तं सुखात्मकं घोरं दुःखात्मकं मूढं विषादात्मकमेव प्रत्ययं सुखोपभोगरूपमपि त्रिगुणमारभन्ते न च सोऽपि तादृशरूपोऽस्य परि
णामः स्थिर इत्याह चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं नन्वेकः प्रत्ययः कथं परस्परविरुद्धशान्तघोरमूढत्वान्येकदा
प्रतिपद्यत इत्यत आह रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते रूपाण्यष्टौ भावा धर्मादयो वृत्तयः सुखाद्यास्तदिह धर्मेण
विपच्यमाने नाधर्मरूपादृशो विरुध्यते एवं ज्ञानवैराग्यैश्वर्यैः सुखादिभिश्च तादृशान्येव तद्विपरीतानि विरुध्यन्ते सामान्यानि
त्वसमुदाचरद्रूपाणि अतिशयैः समुदाचरद्भिः सहाविरोधात्प्रवर्तन्ते इति ननु गुणत्रीमयत्वे तथापि विषयसुखस्य कुतः स्वा

शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभन्ते चलं च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं रू
पातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि तु अतिशयैः सह प्रवर्तन्ते एव
मेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोहप्रत्यया इति सर्वे सर्वरूपा भवन्ति गुणप्र
धानभावकृतस्त्वेषां विशेष इति तस्माद्दुःखमेव सर्वं विवेकिन इति तदस्य महतो दुः
खसमुदायस्य प्रभवबीजमविद्या तस्याश्च सम्यग्दर्शनमभावहेतुः ०॥ भाविकी दुःखतेत्यत आ

ह एवमेत इति उपादानाभेदादुपादानात्मकत्वादुपादेयस्याप्यभेद इत्यर्थः तत्किमिदानीमात्यन्तिकमेव तादात्म्यं न प्याच
बुद्धिव्यपदेशभेदो न कल्प्येत इत्यत आह गुणप्रधानेति सामान्यात्मना गुणभावो विशेषात्मना च प्राधान्यं तस्मादुपाधितः स्व
भावतश्च दुःखमेव सर्वं विवेकिन इति दुःखं च हेयं प्रस्तावनां न च तन्निदानमन्तरेण तद्धेयं भवितुमर्हतीति न चापरिज्ञातं निदा
नं शक्यं हातुमिति मूलनिदानमस्य दर्शयति तदस्येति दुःखसमुदायस्य प्रभव उत्पत्तिर्यतस्तद्बीजमित्यर्थः तदुच्छेद
हेतुं दर्शयति तस्याश्चेति ०॥

इदानीमस्य शास्त्रस्य सर्वानुग्रहार्थं प्रवृत्तस्य तद्विधानेनैव शास्त्रान्तरसादृश्यं दर्शयति यथेति चत्वारो व्यूहाः संक्षिप्ताव्यवस्वना यस्य तत्र योक्तं ननु दुःखं हेयमुक्तं संसारं हेयमभिदधतः कुतो न विरोध इत्यत आह तत्र दुःखबहुल इति यत्खल्वविद्या संसारं करोतीति तदृष्ट्या अवान्तरव्यापारं संसारहेतुमाह प्रधानपुरुषयोरिति मोक्षस्वरूपमाह संयोगस्येति मोक्षोपायमाह हानोपाय इति केचित्प्रयंति हातुः स्वरूपोच्छेद एव मोक्षः स्याद्यथा प्रदीपस्य निर्वाणं विमोक्षस्तस्य चेतस इति अन्ये तु सवासनक्लेशसमुच्छेदाद्विशुद्धविज्ञानोत्पाद एव मोक्ष इत्याचक्षते तान्प्रत्याह तत्रेति तत्र हानं तावत् दूषयति हाने तस्ये

यथा चिकित्साशास्त्रं चतुर्व्यूहं रोगो रोगहेतुरारोग्यं भैषज्यमित्येवमिदमपि शास्त्रं चतुर्व्यूहमेव तद्यथा संसारः संसारहेतुः मोक्षो मो क्षोपाय इति तत्र दुःखबहुलः संसारो हेयः प्रधानपुरुषयोः संयोगो हेयहेतुः संयोगस्यात्यंतिकी निवृत्तिर्हानं हानोपायः सम्यग्दर्शनं तत्र हातुः स्वरूपं उपादेयं हेयं वा न भवितुमर्हतीति हाने तस्योच्छेदवादप्रसंगः उपादाने च हेतुवादः ०॥

ति नहि प्रेक्षावान्कश्चिदात्मोच्छेदाय यतते ननु दृश्यं नेतीत्यनादिमूलितसकलसुखं दुःखमयीमिव मूर्तिमुद्वहंतः स्वोच्छेदाय यतमानाः सत्यं केचिदेव तेन त्वेवं संसारिणो विचित्रदेवाद्यानंदभोगभागिनस्तेपि च मोक्षमाणा दृश्यंते तस्मात्पुरुषार्थत्वप्रसक्तेर्न हातुः स्वरूपोच्छेदो मोक्षोऽभ्युपेयः आस्तु तर्हि हातुः स्वरूपमुपादेयमित्यत आह उपादाने च हेतुवादः उपादाने हि कार्यत्वेनानित्यत्वे सति मोक्षत्वादेव च्यवेत तत् आम तत्त्वं हि मोक्षः नापि विशुद्धो विज्ञानसंतानो भवत्यमतः संतानिभ्यो व्यतिरिक्तस्य संतानस्यावस्तुसतोऽभावात् संतानिनां चानित्यत्वात्तस्मान्न यायतित्तव्यं यथाशाश्वतवादो भवति ०॥

तथा च पुरुषार्थता अपवर्गस्येत्याह उभयप्रत्याख्यान इति तस्मात्स्वरूपावस्थानमेवात्मनो मोक्ष इति एतदेव सम्यग्दर्शनं तदेतच्छास्त्रं चतुर्व्यूहमभिधीयते हेयं दुःखमनागतं अनागतमित्यतीतवर्तमानव्यवच्छिन्नत्तोपपत्तिमाह दुःखमतीतमिति ननु वर्तमानमनुपभुज्यमानेन भोगे नातिवाहितमिति कस्मान्न हेयमित्यत आह वर्तमानं चेति सुगमं हेयमुक्तं तस्य निदानमुच्यते द्रष्टृदृश्ययोः संयोगो हेयहेतुः द्रष्टृस्वरूपमाह द्रष्टेति चितिच्छायापत्तिरेव बुद्धेर्बुद्धिप्रतिसंवेदित्वमुदासीनस्यापि पुंसः नन्वेतावतापि बुद्धिरेवानेन दृश्येत न दृश्येरन् शब्दादयो त्यंतव्यवहिता इत्यत आह दृश्या बुद्धिसत्त्वेति इन्द्रियप्रणालिकया बुद्धेः शब्दाद्या

उभयप्रत्याख्याने शाश्वतवाद इत्येतत्सम्यग्दर्शनं तदेतच्छास्त्रं चतुर्व्यूहमित्यभिधीयते १५
हेयं दुःखमनागतं १६ दुःखमतीतमुपभोगेनातिवाहितं न हेयपक्षे वर्तते वर्तमानं च स्वक्षणे भोगारूढमिति न तत्क्षणांतरे हेयतामापद्यते तस्माद्यदेवानागतं दुःखं तदेवाक्षिपात्रकल्पं योगिनं क्लिश्नाति नेतरं प्रतिपत्तारं तदेव हेयतामापद्यते १६ तस्माद्यदेव हेयमित्युच्यते तस्यैव कारणं प्रतिनिर्दिश्यते द्रष्टृदृश्ययोः संयोगो हेयहेतुः द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः दृश्या बुद्धिसत्त्वोपारूढाः सर्वे धर्माः तदेतद्दृश्यमयस्कांतमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य दृशिरूपस्य स्वामिनः ०॥

कारेण परिणतायां दृश्यायां भवंति शब्दादयोपि धर्मा दृश्या इत्यर्थः ननु तदाकारापत्त्या बुद्धिः शब्दाद्याकारा भवतु पुंसस्तु बुद्धिसंबंधेऽभ्युपगम्यमानेऽपरिणामित्वं असंबंधे वा कथं तेषां बुद्धिसत्त्वारूढानामपि शब्दादीनां दृश्यत्वं न हि दृशिनाऽसंबद्धं दृश्यं दृष्टमित्यत आह तदेतद्दृश्यमिति प्रपंचितमिदमस्माभिः प्रथमपाद एव यथा चित्यासंक्रांतमपि बुद्धिसत्त्वमत्यंतस्वच्छतया चितिबिंबोद्ग्राहितया समापन्नचैतन्यमिव शब्दाद्यनुभवतीति अत एव च शब्दाद्याकारपरिणतबुद्धिसत्त्वोपनीतानां सुखादीनुपभुंजानः स्वामी भवति द्रष्टा ताद्दर्शी चास्य बुद्धिसत्त्वं स्वं भवति न तद्बुद्धिसत्त्वं शब्दाद्याकारवद्दृश्यमयस्कांतमणिकल्पं पुरुषस्य स्वं भवति दृशिरूपस्य स्वामिनः ०॥

कस्मात् अनुभवकर्मविषयतामापन्नं यतः अनुभवो भोगः पुरुषस्य कर्मक्रियातद्विषयतां भुज्यमानतामापन्नं यस्मात्ततः स्वं भवति ननु स्वं यत्प्रकाश्यं बुद्धिसत्त्वं कथमनुभवविषयदृश्यत्वमत आह अन्यस्वरूपेणेति यद्यपि हि चैतन्यरूपं वस्तुतो बुद्धिसत्त्वं स्यात् भवेत्तस्य यत्प्रकाश्यं किं तु स्वं चैतन्याद्न्यज्जडरूपं तेन प्रतिलब्धात्मकं तस्मात्तदनुभवविषयः ननु यस्य हि यत्र किंचिद्रूपं तेनैतत्तद्धीनं न च बुद्धिसत्त्वस्य पुरुषमुद्दिश्य नैप्रतिकिंचिद्रूपं तत्तद्रूतिकार्यं तत्तन्त्रं तथा च न तस्य कर्मत्वमत आह स्वतंत्रमपि परार्थत्वात् परतंत्रं नन्वयं दृग्दर्शनशक्त्योः संबंधः स्वाभाविको वा स्यान्नैमित्तिको वा स्वाभाविकत्वे संबंधिनो नित्यत्वादशक्योच्छेदः संबंधः तथा च संसारनित्यत्वं नैमित्तिकत्वे तु क्लेशकर्मतद्वासनानामंतःकरणवृत्तितया सैतःकर स्यं

अनुभवकर्मविषयतामापन्नमन्यस्वरूपेण प्रतिलब्धात्मकं स्वतंत्रमपि परार्थत्वात्परतंत्रं तयोर्दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुर्दुःखस्य कारणमित्यर्थः ०॥

णस्य च तन्निमित्तत्वे परस्पराश्रयप्रसंगाद्नादित्वस्य च सर्गादावसंभवादनुत्पाद एव संसारस्य स्यात् यथोक्तं पुमानकर्तो येषां तु ते षामपि गुणैः क्रिया कथमादौ भवेत्तत्र कर्मतावन्न विद्यते मिथ्याज्ञानं न तत्राज्ञानमिति कलुषं चैतत्कुतः लिंगहेतुः यत्पुरुषार्थेन वामनोवृत्तिर्हि सर्वैषां न चोत्पन्नमनस्तदेति पृष्टं कामपनयति तयोर्दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुः स त्वयं न स्वाभाविकः संबंधो नैमित्तिकस्तु न चैवमादिमान् अनादिनिमित्तप्रभवत्वात् तस्याप्यनादित्वात् क्लेशकर्मतद्वासनासंतानस्यापि अनादिः प्रतिसर्गावस्थायां च सहांतःकरणेन प्रधानसाम्यमुपगतोऽपि सर्गादौ पुनस्तादृगेव प्रादुर्भवति विपाकरूढो क्लिन्नभेदोऽस्य एवमुपगतोऽपि पुनर्वर्षासु पूर्वरूपदृष्टत्वस्य सकृद्वावेदितं प्राग्भावितया संयोगस्याविद्याकारणैः स्थितिहेतुतया पुरुषार्थः कारणं तद्दर्शनतस्य स्थितिलक्षणस्य मुक्तमर्थकृत इति०॥

तथा चोक्तं पंचशिखेन तत्संयोगः बुद्धिसंयोगः स एव हेतुर्दुःखस्य तस्य विवर्जनात् स्यादयमात्यंतिको दुःखप्रतीकारः अर्थात् तत्परिवर्जने दुःखमित्युक्तं भवतीति तत्रैवार्थं तत्प्रसिद्धं निदर्शनमाह तद्यथेति पादत्राणमुपानत्स्याद्तद्गुणसंयोगफलापहेतुः त्युच्यमाने गुणानां तापकत्वमभ्युपेतं न च तपिक्रियाया आस्माद्विकर्तृस्थाभावो येन तप्यमन्य त्रापि तेन न चास्यास्तप्य तया पुरुषः कर्मतस्या परिणामितया क्रिया जनितफलशालित्वायोगात् तप्यत्वव्याप्तस्य तन्निवृत्तौ निवृत्तिमवगच्छाम ज्वलनविरहेणेव धूमाभावमित्यत आह अत्रापि तापकस्येति गुणानामेव तप्यतापकभावस्तत्र मदुत्वात्पादतलवत्स त्रा

तथा चोक्तं तत्संयोगहेतुविवर्जनात्स्यादयमात्यंतिको दुःखप्रतीकारः कस्मात् दुःखहेतोः परिहार्यस्य प्रतीकारदर्शनात् तद्यथा पादतलस्य भेद्यता कंटकस्य भेत्तृत्वं परिहारः कंटकस्य पादानधिष्ठानं पादत्राणव्यवहितेन वाधिष्ठानं एतत्त्रयं यो वेद लोके स तत्र प्रतीकारमारभमाणो भेदजं दुःखं नाप्नोति कस्मात् त्रित्वोपलब्धिसामर्थ्यादिति अत्रापि तापकस्य रजसः सत्त्वमेव तप्यं कस्मात् तपिक्रियायाः कर्मस्थत्वात् सत्त्वे कर्मणि तपिक्रिया नापरिणामिनि निष्क्रिये क्षेत्रज्ञे दर्शितविषयत्वात् सत्त्वे तु तप्यमाने तदाकारानुरोधी पुरुषोऽनुतप्यत इति दृश्यते १७ द्रष्टृस्वरूपमुच्यते ॥

त्वं तप्यं रजस्तु तीव्रतया तापक कंटकवदिति कस्मात्सत्त्वमेव तप्यं ननु पुरुष्य इतरं तपिक्रियायाऽइति तत्किमिदानीं पुरुषो न तप्यते तथा चाचेतनस्यासुसर् त्वस्यतापः किंनः क्लिन्नमित्यत आह दर्शितविषयत्वात् सत्त्वे तु तप्यमाने तदाकारानुरोधी पुरुषोऽप्यनुतप्यत इति दर्शितविषयत्वमनुतापहेतुस्तच्च प्राग्व्याख्यातं नमः शिवाय त

दृश्यं व्याचष्टे प्रकाशेति सत्त्वस्य हि भागः प्रकाशस्तमसेन भागेन दैन्येन वा राजसेन वा दुःखेनानुरज्यते एवं राजसादिष्वपि
द्रष्टव्यं तदिदमुक्तं परस्परोपरक्तप्रविभागा इति पुरुषेण सह संयोगवियोगधर्माणः यथाम्नायते अजामेकां लोहितशुक्ल
कृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति इतरेतरोपाश्रये
णोपार्जिता मूर्तिः पृथिव्यादिरूपा यैस्ते तथोक्ताः स्यादेतत्सत्त्वे न शान्तप्रत्ययेजनयितव्ये रजस्तमसोरपि सत्त्वांगत्वेन त
त्र हेतुभावात् शक्तिसामर्थ्यमिति यदापि च रजस्तमसांगित्वं तदापि शान्तएव प्रत्यय उदीयेत न घोरो मूढो वा सत्त्वे धान्यद्वे प्र
त्यत आह परस्परांगांगित्वेप्यसंभिन्नशक्तिप्रविभागाः भवतु शान्ते प्रत्यये जनयितव्ये रजस्तमसोरंगभावस्तथापि तेषां

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यं १८ प्रकाशशीलं सत्त्वं
क्रियाशीलं रजः स्थितिशीलं तम इति एते गुणाः परस्परोपरक्तप्रविभागाः परिणामिनः
संयोगविभागधर्माण इतरे तरोपाश्रयेणोपार्जितमूर्तयः परस्परांगांगित्वेप्यसंभिन्न
शक्तिप्रविभागास्तुल्यजातीयातुल्यजातीयशक्तिभेदानुपातिनः ० रामजीसहाय॥

शान्तघोरमूढरूपाणि कार्याणि संकीर्यन्ते कार्येषु संकरो ह्येषां यो हि शक्तीनामसंकरः असंकीर्णेन च समुदाचरता रूपेण शान्तघोरमूढरूपाणि का
र्याणि दृश्यन्त इति सिद्धः शक्तीनामसंभेद इति स्यादेतत् सत्त्वेन शक्तीनां न संभूयकारित्वं गुणानां न जातु भिन्नशक्तीनां
संभूयकारित्वं दृष्टं नहि तन्तुमृत्पिण्डवीरणादीनि घटादीन् संभूय कुर्वन्तीत्यत आह तुल्यजातीयातुल्यजातीयशक्तिभे
दानुपातिनोयद्यपि तुल्यजातीये उपादानशक्तिर्नान्यत्र सह कारिशक्तिस्त्वतुल्यजातीये घटे तु जनयितव्ये न वीरण
णानामस्ति सह कारिशक्तिः पीतिनं नेतरत्तन्तूनां संभूयकारितेति भावः तुल्यजातीयातुल्यजातीयेषु प्राक्तेषु येशक्तिभेदा
स्तान् अनुपतितुं शीलं येषां ते तथोक्ताः ० ॥

कार्येषु

प्रधानवेलायामिति दिव्यशरीरे जनयितव्ये सत्त्वगुणः प्रधानमंगे रजस्तमसी एवं मनुष्यशरीरे जनयितव्ये रजः प्रधानमंगे सत्त्व
तमसी एवं तिर्यक्शरीरे जनयितव्ये तमः प्रधानमंगे सत्त्वरजसी तैस्तैर्गुणाः प्रधानत्ववेलायामुपदर्शितसन्निधानाः कार्योत्पा
दनं प्रत्युद्भूतवृत्तय इत्यर्थः प्रधानशब्दश्चाभावप्रधानः यथा ह्येकयोर्द्विवचनैकवचनइत्यत्र द्वित्वैकत्वयोरिति
यथा ह्येकेष्विति स्यात् ननु तदा प्रधानमुद्भूतं तत्तथा प्राक् अस्तीति वक्तुमनुद्भूतानां तु नदंगानां सद्भावे किं प्रमाणमित्यत
आह गुणत्वेपि चेति यद्यपि नोद्भूतास्तथापि गुणानामविवेकित्वात् संभूयकारित्वाच्च व्यापारमात्रेण सह कारित
याप्रधानेन्तर्णीतं सदनुमितमस्तित्वं येषां ते तथोक्ताः ननु संतु गुणाः संभूयकारिणः समर्थाः कस्मात् पुनः कुर्वन्ति

प्रधानवेलायामुपदर्शितसन्निधाना गुणत्वेपि च व्यापारमात्रेण प्रधानान्तर्णीतानुमिता
स्तिताः पुरुषार्थकर्तव्यतया प्रयुक्तसामर्थ्याः सन्निधिमात्रोपकारिणोयस्कान्तमणिकल्पाः
प्रत्ययमन्तरेणैकतमस्य वृत्तिमनुवर्तमानाः प्रधानशब्दवाच्या भवन्ति ० ॥ नहि समर्था इत्येव
कार्यं जनयन्ति मा भूदस्य कार्योत्पादनं प्रति विराम इत्यत आह पुरुषार्थकर्तव्यतयेति न तो निर्वर्तितनिखिलपुरुषार्थानां
गुणानामुपरमः कार्यानारंभणाद् इत्युक्तं भवति ननु पुरुषस्यानुपकुर्वतः कथं पुरुषार्थेन प्रयुज्यन्त इत्यत आह सन्नि
धिमात्रेति ननु धर्माधर्मलक्षणमेव निमित्तं प्रयोजकं गुणानां तत्किमुच्यते पुरुषार्थप्रयुक्ता इत्यत आह प्रत्ययमन्त
रेणेति एकतमस्य सत्त्वस्य रजसस्तमसो वा प्रधानस्य स्वकार्ये प्रवृत्तस्य वृत्तिमितरे प्रत्ययं निमित्तं धर्मादिकं विनैवानु
वर्तमाना यथा च वक्ष्यति निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवदिति एते गुणाः प्रधानशब्दवा
च्या भवन्तीति संबंधः प्रधीयते आधीयते विश्वं कार्यमेभिरिति व्युत्पत्त्या एतद्दृश्यमुच्यते ० ॥

तदेवं गुणानां शीलमभिधाय तस्य कार्यमाह तदेतदिति सत्कार्यवादसिद्धये घटात्मकं तत्तेन रूपेण परिणमत इति भूतेन्द्रियात्मकत्वं दर्शयति भूतभावेनेत्यादिना भोगापवर्गार्थमिति सूत्रावयवमवतारयति तत्तु नाप्रयोजनमपि तु प्रयोजनमुरीकृत्य प्रवर्तत इति भोगं विवृणोति तत्रेति सुखदुःखे हि त्रिगुणाया बुद्धेः स्वरूपेण स्यात्तथात्वेन परिणामात्तथापि गुणानां तथात्वावधारणे न भोग इत्यत आह अविभागापन्नमिति एतच्चास्माभिर्विवेचितं अपवर्गं विवृणोति भो

एतद्दृश्यमित्युच्यते तदेतद्भूतेन्द्रियात्मकं भूतभावेन पृथिव्यादिना सूक्ष्मस्थूलेन परिणमते तथेन्द्रियभावेन श्रोत्रादिना सूक्ष्मस्थूलेन परिणमत इति तत्तु नाप्रयोजनं अपि तु प्रयोजनमुरीकृत्य प्रवर्तत इति भोगापवर्गार्थं हि तद्दृश्यं पुरुषस्येति तत्रेष्टानिष्टगुणस्वरूपावधारणमविभागापन्नं भोगो भोक्तुः स्वरूपावधारणमपवर्ग इति द्वयोरतिरिक्तमन्यद्दर्शनं नास्ति तथा चोक्तं अयं तु खलु त्रिषु गुणेषु कर्तृष्वकर्तरि च पुरुषे तुल्यातुल्यजातीये चतुर्थे तत्क्रियासाक्षिण्युपनीयमानान्सर्वभावानुपपन्नाननुपश्यन्न दर्शनमन्यच्छंकत इति ताव् एतौ भोगापवर्गौ बुद्धिकृतौ बुद्धावेव प्रवर्तमानौ कथं पुरुषे व्यपदिश्येते इति यथा विजयः पराजयो वा योद्धृषु वर्तमानः स्वामिनि व्यपदिश्यते स हि तस्य फलस्य भोक्तेति एवं बन्धमोक्षौ बुद्धावेव वर्तमानौ पुरुषे व्यपदिश्येते स हि तत्फलस्य भोक्तेति त्रि

नश्यतेसंसारोनेन

क्तुरिति अपवृज्यतेऽनेनेत्यपवर्गः प्रयोजनान्तरस्याभावमाह द्वयोरिति तथा चोक्तं पंचशिखेन अयं तु खल्विति ननु वस्तुतो भोगापवर्गौ बुद्धिकृतौ बुद्धिवर्तिनौ च कथं तदकारणे तदनधिकरणे च पुरुषे व्यपदिश्येते इत्यत आह ताविताविति भोक्तृत्वं च पुरुषस्योपपादितमग्रे च वक्ष्यते परमार्थतस्तु ॥ नमः गणपतये नमः शिवाय नारायणाय रमायरामचंद्राय रामभद्राय गोपालाय नमो नमः ४८

बुद्धेरेव पुरुषार्थापरिसमाप्तिरिति तेन भोगापवर्गयोः पुरुषसंबंधित्वकथनमार्गेण ग्रहणादयोऽपि पुरुषसंबंधिनो वेदितव्याः तत्र स्वरूपमात्रेणार्थज्ञानं ग्रहणं तस्य स्मृतिर्धारणं तद्गतानां विशेषाणामूहनमूहः समारोपितानां च युक्त्यापनयोऽपोहः ताभ्यामेवोहापोहाभ्यां तदवधारणं तत्त्वज्ञानं तत्त्वावधारणपूर्वं हानोपादानमभिनिवेशः दृश्यानां गुणानां स्वरूपभेदावधारणार्थमिदमारभ्यते विशेषेत्यादि अविशेषाणां शान्तघोरमूढलक्षणविशेषरहितानां ये विशेषा विकारास्त एव न तु तत्त्वान्तरप्रकृतयस्ते

बुद्धेरेव पुरुषार्थापरिसमाप्तिर्बन्धस्तदर्थावसायो मोक्ष इति एतेन ग्रहणधारणोहापोहतत्त्वज्ञानाभिनिवेशा बुद्धौ वर्तमानाः पुरुषेऽध्यारोपितसद्भावाः स हि तत्फलस्य भोक्तेति १८ दृश्यानां तु गुणानां स्वरूपभेदावधारणार्थमिदमारभ्यते विशेषाविशेषलिंगमात्रालिंगानि गुणपर्वाणि १९ तत्राकाशवाय्वग्न्युदकभूमयो भूतानि शब्दस्पर्शरूपरसगंधतन्मात्राणामविशेषाणां विशेषाः तथा श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि बुद्धीन्द्रियाणि वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि एकादशं मनः सर्वार्थमित्येतान्यस्मितालक्षणस्याविशेषस्य विशेषा गुणानामेष षोडशको विशेषपरिणामः षडविशेषाः ० ॥ ० ॥

षां तानाह तत्राकाशेति उत्पादक्रमानुरूपः पूर्वोपन्यासक्रमः अस्मितालक्षणस्याविशेषस्य सत्त्वप्रधानस्य बुद्धीन्द्रियाणि विशेषाः रजस्सत्त्वकर्मेन्द्रियाणि मनस्तु उभयात्मकमुभयप्रधानस्येति मन्तव्यं अत्र च पंच तन्मात्राणि बुद्धिक्रमेण कार्यविशेषत्वादस्मिता च बुद्धितो विकारहेतुत्वं चाविशेषत्वं तन्मात्रेषु चास्मितायां च अविशिष्टं संकल्प्य विशेषान्परिगणयति गुणानामेष इति अविशेषानपि गणयति षडिति

संकलय्योदाहरति तद्यथेति विशिष्टं पदं पदेन गन्धात्मनां पञ्चलक्षणः रसः आत्मना चतुर्लक्षणः रूपमात्मना त्रिलक्षणं स्प-
र्शः आत्मना द्विलक्षणः शब्दः शब्दलक्षण एवेति कस्य पुनरमी षड्विशेषाः कार्यमित्यत आह एते सत्तामात्रस्यात्मन इति पुरु-
षार्थक्रियाक्षमं सत् तस्य भावः सत्ता तन्मात्रं तन्महत्तत्त्वं यावती काचित्पुरुषार्थक्रिया शब्दादिभोगलक्षणा सत्त्वपुरुषान्यताख्या-
तिलक्षणा वा अखिला सा सर्वा महति बुद्धौ समाप्यत इत्यर्थः आत्मन इति स्वरूपोपदर्शनेन तुच्छत्वं निषेधति निष्कृतेर यमाद्यः
पः परिणामोऽव्याहतो न तु विवर्त इति यावत् यत्तत्परं विप्रकृष्टकालमविशेषेभ्यस्तद्धेतुत्वात्सन्निकृष्टकालेभ्यो लिंगमात्रं म-
हत्तत्त्वं तस्मिन्नेते षडविशेषाः सत्तामात्रे महत्यात्मन्यवस्थाय सत्कार्यवादसिद्धेर्विवृद्धिकाष्ठामनुभवन्ति प्राप्नुवन्ति ये पुन

तद्यथा शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेत्येकद्वित्रिचतुः-
पंचलक्षणाः शब्दादयः पंचाविशेषाः षष्ठश्चाविशेषोऽस्मितामात्र इति एते सत्तामात्रस्या-
त्मनो महतः षडविशेषपरिणामाः यत्तत्परमविशेषेभ्यो लिंगमात्रं महत्तत्त्वं तस्मिन्नेते सत्ता-
मात्रे महत्यात्मन्यवस्थाय विवृद्धिकाष्ठामनुभवन्ति प्रतिसंसृज्यमानाश्च तस्मिन्नेव सत्ता-
मात्रे महत्यात्मन्यवस्थाय यत्तन्निःसत्तासत्तं ० ॥

इति विशेषाणामविशेषपरिणामानां तेषां च धर्मलक्षणाव-
स्थाः परिणामा इति शेषः एषां विवृद्धिकाष्ठा परिणामकाष्ठेति तदेवमुत्पत्तिक्रममभिधाय प्रलयक्रममाह प्रतिसंसृज्यमा-
नाः प्रलीयमानाः स्वात्मनि लीनविशेषाः अविशेषास्तस्मिन्नेव सत्तामात्रे महत्यात्मन्यवस्थाय निलीयन्ते एवं महत्तत्त्वे
विशेषाः अव्यक्तमन्यत्र लयं न गच्छतीत्यलिंगं प्रतियन्ति तस्यैव विशेषणं निःसत्तासत्तं सत्ता पुरुषार्थक्रियाक्षमत्वं अ-
सत्ता तुच्छता निष्क्रान्तं सत्ताया असत्तायाश्च यत्तत्तथोक्तं एतदुक्तं भवति सत्त्वरजस्तमसां साम्यावस्था न कश्चित्पुरुषार्थ उप- ४९
युज्यत इति न सती नापि गगनकमलिनीवत्तुच्छस्वभावा तेन नासत्यपीति स्यादेतदव्यक्तावस्थायामप्यस्ति महदादि
तदात्मना तद्धि सतो विनाशो विनाशो वा न नपुरुषार्थ्याद्देन तस्य सतत्त्वं स्यादिति ० ॥

महदादिसद्भावात्पुरुषार्थक्रियाप्रवर्तनेन तत्कथं निःसत्त्वमव्यक्तमित्यत आह निःसदसदिति निष्क्रान्तं कारणं सतः कार्यानुप-
घविकारणावस्थायां सदेव शक्त्यात्मना कार्यं तथापि सोऽचिरतामर्थक्रियामकुर्वत्सदित्युक्तं न चैतत्कारणं शशविषाणव-
त्सत्कार्यमित्याह निरसदिति निष्क्रान्तं असतस्तुच्छरूपात् कार्यं तथा सति हि व्योमारविन्दमिवास्मान्न कार्यमुत्पद्येते-
ति भावः प्रतिसर्गमुक्तमुपसंहरति एष तेषामिति एष इत्यनन्तरोक्तः पूर्वस्य परामर्शः लिंगमात्राद्यवस्था पुरुषार्थकृत-
त्वादनित्या अलिंगावस्था तु पुरुषार्थेनाकृतत्वान्नित्येत्यत्र हेतुमाह अलिंगावस्थायामिति कस्मात्पुनर्न पुरुषार्थो

निःसदसदव्यक्तमलिंगप्रधानं तत्प्रतियन्तीति एष तेषां लिंगमात्रः परिणामो निःसत्तासत्तं
चालिंगपरिणाम इति अलिंगावस्थायां न पुरुषार्थो हेतुर्नालिंगावस्थायामादौ पुरुषा-
र्थता कारणं भवतीति न तस्याः पुरुषार्थता कारणं भवतीति नासौ पुरुषार्थकृतेति नि-
त्याख्यायते त्रयाणां त्ववस्थाविशेषाणामादौ पुरुषार्थता कारणं भवति स चार्थो हेतु-
र्निमित्तं कारणं भवतीत्यनित्याख्यायते गुणास्तु सर्वधर्मानुपातिनो न प्रत्यस्तमयन्ते नो-
पजायन्ते व्यक्तिभिरेवातीतानागतव्ययागमवतीभिर्गुणान्वयिनीभिरुपजननापायध-
र्मका इव प्रत्यवभासन्ते ० ॥

हेतुरित्यत आह हेतुर्नालिंगावस्थायामिति भवति नाविषयेण विषयिज्ञानमुप-
लक्षयति एतदुक्तं भवति यदि पुरुषार्थता कारणमलिंगावस्थायां स्यात्तेन पञ्चतलिंगावस्थायाः शब्दाद्युपभोगं वा सत्त्वपुरुषा-
दुःखवेदनाः प्राणिनः कष्टमायुर्दीर्घमाक्षिप्य जायन्ते ततो महातलरसातलसुत
लवितलतलातलपातालाख्यानि सप्त पातालानि भूमिरियमष्टमी सप्तद्वीपा वसु
मती यस्याः सुमेरुर्मध्ये पर्वतराजः कांचनः तस्य राजतवैदूर्यस्फटिकहेममणिम
यानि शृंगाणि तत्र वैदूर्यप्रभानुरागान्नीलोत्पलपत्रश्यामो नभसो दक्षिणो भागः
श्वेतः पूर्वः स्वच्छः पश्चिमः कुरुण्डकाभ उत्तरः दक्षिणपार्श्वे चास्य जंबूर्यतोऽयं जं
बूद्वीपः तस्य सूर्यप्रचाराद्रात्रिंदिवं लग्नमिव विवर्तते ॥० मद्देति तस्य सूर्यस्य प्रचाराद्रा
त्रिंदिवं लग्नमिव विवर्तते नेयमेवास्य भागं सूर्यस्त्यजति तत्र रात्रिर्यमेव भागमलंकरोति तत्र दिनमिति ॥ ० ॥ ७

सकलजंबूद्वीपपरिमाणमाह तदेतद्योजनशतसहस्रं किंभूतं योजनानां शतसहस्रमित्याह सुमेरोर्दिशि दिशि तदर्द्धेन पंचाशता योजनसहस्राणि व्यूढं संक्षिप्तं यतोस्य मध्यस्थः सुमेरुः समुद्राश्च सर्षपराशिकल्पा इति द्विगुणद्विगुणा इति संबंधः यथा सर्षपराशिर्निम्नो वसीमित्तलानुद्धश्रेणिः तत्र अपपातालइति ६२

तस्य नीलश्वेतश्रृंगवंत उदीचीनास्त्रयः पर्वता द्विसाहस्रायामास्तदंतरेषु त्रीणि वर्षाणि नवनवयोजनसाहस्राणि रमणकं हिरण्मयमुत्तराः कुरव इति निषधहेमकूटहिमशैला दक्षिणतो द्विसाहस्रायामास्तदंतरेषु त्रीणि वर्षाणि नवनवयोजनसाहस्राणि हरिवर्षं किंपुरुषं भारतमिति सुमेरोः प्राचीना भद्राश्वा माल्यवत्सीमानः प्रतीचीनाः केतुमाला गंधमादनसीमानो मध्ये वर्षमिलावृतं तदेतद्योजनशतसहस्रं सुमेरोर्दिशिदिशि तदर्द्धेन व्यूढं स खल्वयं शतसाहस्रायामो जंबूद्वीपस्ततो द्विगुणेन लवणोदधिना वेष्टितः ततः श्च द्विगुणाः शाककुशक्रौंचशाल्मलगोमेधपुष्करद्वीपाः सप्तसमुद्राश्च काञ्चनकपर्वतपरिवृत्तसर्षपराशिकल्पाः सविचित्रशैलावतंसा इक्षुरससुरासर्पिर्दधिमंडक्षीरस्वादूदकसप्तसमुद्रवेष्टिता वलयाकृतयो लोकालोकपर्वतपरिवाराः पंचाशद्योजनकोटिपरिसंख्यातास्तदेतत्सर्वं सुप्रतिष्ठितसंस्थानमंडमध्ये व्यूढं अंडं च प्रधानस्याणुरवयवो यथाकाशे खद्योत इति तत्र पाताले जलधौ पर्वतेष्वेतेषु देवनिकाया असुरगंधर्वकिंनरकिंपुरुषयक्षराक्षसभूतप्रेतपिशाचापस्मारकाप्सरोब्रह्मराक्षसकूष्मांडविनायकाः प्रतिवसंति सर्वेषु द्वीपेषु पुण्यात्मानो देवमनुष्याः ६२

हिमशिशिरवीचिभिर्नानापि भूमिसमस्तपायसमुद्राश्च पर्यायाः विचित्रैः शैलैरवतंसैरिव सह वर्तंते इति सविचित्रशैलावतंसाः द्वीपास्तदेतत्सर्वं सद्वीपविपिननागनगरनीरधिमालावलयं लोकालोकपरिवृतं विश्वं भूमंडलं ब्रह्मांडमध्ये व्यूढं संक्षिप्तं सुप्रतिष्ठितसंस्थानसन्निवेशो यस्य तत्तथोक्तं येषु यत्र प्रतिवसंति

६२

सुमेरोः संनिवेशमाह सुमेरुरिति तदेवं भूर्लोकं संप्रकाश्य भुवर्लोकमाह अंतरिक्षलोकमाह अहेति विक्षेपो व्याख्याः स्वर्लोकमाह श्रीयनि माहेंद्रनिवासिन इति देवनिकायादेवजातयः यस्मात्पि देवनिकायानां रूपोत्कर्षमाह सर्वे संकल्पसिद्धा इति संकल्पमात्रादेवैषां विषया उपनमंति वृंदारकाः पूज्याः कामभोगिनो मिथुनप्रियाः औपपादिकदेहाः पित्रोः संयोगमंतरेण कस्मादेव दिव्यशरीरमेषां भ

सुमेरुः अस्मिन् दृशानामुद्यानभूमिस्तत्र मिश्रवनं नंदनं चैत्ररथं सुमानसमित्युद्यानानि सुधर्मा देवसभा सुदर्शनं पुरं वैजयंतः प्रासादः ग्रहनक्षत्रतारकास्तु ध्रुवे निबद्धा वायुविक्षेपनियमेनोपलक्षितप्रचाराः सुमेरोरुपर्युपरि संनिविष्टा विपरिवर्तंते माहेन्द्रनिवासिनः षड्देवनिकायास्त्रिदशा अग्निष्वात्ता याम्यास्तुषिता अपरिनिर्मितवशवर्तिनः परिनिर्मितवशवर्तिनश्चेति सर्वे संकल्पसिद्धाः अणिमाद्यैश्वर्योपपन्नाः कल्पायुषो वृंदारकाः कामभोगिन औपपादिकदेहा उत्तमानुकूलाभिरप्सरोभिः कृतपरिवाराः महति लोके प्राजापत्ये पंचविधो देवनिकायः कुमुदा ऋभवः प्रतर्दना अंजनाभाः प्रचिताभा इत्येते महाभूतवशिनो ध्यानाहाराः कल्पसहस्रायुषः प्रथमे ब्रह्मणो जनलोके चतुर्विधो देवनिकायो ब्रह्मपुरोहिता ब्रह्मकायिका ब्रह्ममहाकायिका अमरा इति ते भूतेंद्रियवशिनो द्विगुणद्विगुणोत्तरायुषो द्वितीये तपसि लोके त्रिविधो देवनिकायः आभास्वराः महाभास्वराः सत्यमहाभास्वरा इति ०

विशेषानित्संख्या

स्फुते अणोरप्यणीभूते अणोरवर्तनीति महर्लोकमाह महतीति महाभूतवशिन इत्यादि तेऽणोरेचति तत्तदेव महाभूतानि प्रयर्कनि तदि ध्यानमात्रमहाभूतानि तेन संख्यानि नाविशेषतो ध्यानमात्रेण प्राप्तपुष्टा भवंति जनलोकमाह प्रथम इत्युक्तमेण० ॥ ०

भा॰व्या॰
८३

भूतेन्द्रियवशिन इति भूतानि पृथिव्यादीनि इन्द्रियाणि श्रोत्रादीनि यथा नियोक्तुमिच्छन्ति तथैव नियुञ्जन्ते उक्तक्रमापेक्षया द्वितीयं ब्रह्मणस्तपोलोकमाह द्वितीय इति भूतेन्द्रियप्रकृतिवशिन इति प्रकृतिः पञ्चतन्मात्राणि तद्वशिनः तदधिष्ठातारो तन्मात्राण्येव कायाकारेण परिणमयन्ति इत्यागमिनः द्विगुणेति आभास्वरेभ्यो द्विगुणायुषो महाभास्वरास्तेभ्योऽपि द्विगुणायुषः सत्यमहाभास्वरा इत्यर्थः ऊर्ध्वमिति ऊर्ध्वं सत्यलोके अप्रतिहतज्ञाना आवीचेस्तु प्रभृत्या तपोलोकं सूक्ष्मव्यवहितादि सर्वं विजानन्तीत्यर्थः तृतीयं ब्रह्मणः सत्यलोकमाह तृतीय इति अकृतो भवनस्य न्यासो यैस्ते तथोक्ताः आधाराभावादेव स्वप्रतिष्ठाः स्वेष्वेव शरीरेषु प्र

ते भूतेन्द्रियप्रकृतिवशिनः द्विगुणद्विगुणोत्तरायुषः सर्वे ध्यानाहाराः ऊर्ध्वरेतसः ऊर्ध्वमप्रतिहतज्ञाना अधरभूमिष्वनावृतज्ञानविषयाः तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनिकायाः अच्युताः शुद्धनिवासाः सत्याभाः संज्ञासंज्ञिनश्चेति अकृतभवनन्यासाः स्वप्रतिष्ठा उपर्युपरिस्थिताः प्रधानवशिनो यावत्सर्गायुषः तत्राच्युताः सवितर्कध्यानसुखाः शुद्धनिवासाः सविचारध्यानसुखाः सत्याभा आनन्दमात्रध्यानसुखाः संज्ञासंज्ञिनश्चास्मितामात्रध्यानसुखास्तेऽपि त्रैलोक्यमध्ये प्रतितिष्ठन्ति त एते सप्त लोकाः सर्व एव ब्रह्मलोकाः ८३

तिष्ठन्ति येषां ते तथोक्ताः प्रधानवशिनस्तदधिष्ठातारः सत्त्वस्य जन्मांशि प्रवर्तन्ते यावत्सर्गायुषः तथा च स्मृयते ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति तदेवं चतुर्णां देवनिकायानां साधारणधर्मानुक्त्वा नामविशेषग्रहणेन धर्मविशेषानाह तत्रेति अच्युता नाम देवाः स्थूलविषयध्यानसुखाः ते न नेतव्यन्ति शुद्धनिवासा नाम देवाः सूक्ष्मविषयध्यानसुखाः ते न नेतव्यन्ति सत्याभा नाम देवा इन्द्रियविषयध्यानसुखास्ते न नेतव्यन्ति संज्ञासंज्ञिनो नाम देवा अस्मितामात्रध्यानसुखास्ते न नेतव्यन्ति त एते सर्वे संप्र ज्ञातसमाध्यैमुपयान्ति ८३

८३

अथासंप्रज्ञातसमाधिनिष्ठा विदेहप्रकृतिलयाः कस्मान्न लोकमध्ये न्यस्यन्त इत्यत आह विदेहप्रकृतिलयास्त्विति बुद्धिवृत्तिमन्तो हि दर्शितविषया लोकयात्रां वहन्तो लोके वर्तन्ते न चैवं विदेहप्रकृतिलयाः सत्यपि साधिकारत्व इत्यर्थः तदेतद्भुवनलोकमाचावीचेर्योगिना साक्षात्कारणीयं सूर्यद्वारे सुषुम्नायां तेषां न चैतावतापि तस्य साक्षात्कारो भवतीत्यत आह एवं तावदन्यत्रापि सुषुम्नाया अन्यत्रापि योगोपाध्यायोपदिष्टेषु यावदिदं सर्वं जगद्दृष्टमिति बुद्धिसत्त्वं हि स्वभावत एव विश्वप्रकाशन

विदेहप्रकृतिलयास्तु मोक्षपदे वर्तन्त इति न लोकमध्ये न्यस्ता इत्येतद्योगिना साक्षात्कर्तव्यं सूर्यद्वारे संयमं कृत्वा ततोऽन्यत्रापि एवं तावदभ्यस्येद्यावदिदं सर्वं दृष्टमिति २४
चन्द्रे ताराव्यूहज्ञानम् चन्द्रे संयमं कृत्वा ताराव्यूहं विजानीयात् २५ ध्रुवे तद्गतिज्ञानं ततो ध्रुवे संयमं कृत्वा ताराणां गतिं जानीयात् ऊर्ध्वविमानेषु कृतसंयमस्तानि विजानीयात् २६ नाभिचक्रे कायव्यूहज्ञानम् नाभिचक्रे संयमं कृत्वा कायव्यूहं विजानीयात् वातपित्तश्लेष्माणस्त्रयो दोषाः धातवः सप्त त्वग्लोहितमांसस्नाय्वस्थिमज्जाशुक्राणि पूर्वं पूर्वमेषां बाह्यमित्येष विन्यासः २७ कण्ठकूपे क्षुत्पिपासानिवृत्तिः जिह्वाया अधस्तात्तन्तुः तन्तोरधस्तात्कण्ठः ततोऽधस्तात्कूपः तत्र संयमात् क्षुत्पिपासे न बाधेते २८ कूर्मनाड्यां स्थैर्यम् कूपादध उरसि कूर्माकारा नाडी तस्यां कृतसंयमः स्थिरपदं लभते यथा सर्पो गोधा वेति २९

समर्थं तमीश्वरात्प्रवृत्तं यत्रैव क्वचिदासीनो ध्यायतः तद्विश्वप्रकाशयति सूर्यद्वारसंयमो ह्यादितं भुवनं प्रकाशयति सूर्यद्वारसंयमो न चैवमन्यत्रापि प्रसंगस्तत्संयमस्यतावन्मात्रोद्घाटनसामर्थ्यादिति सर्वमवदातं ह्यस्य न नृत्तिज्ञासार्थं योगिन इति तत्र संयमः एवं क्षुत्पिपासानिवृत्तिर्हि हेतुः संयमः स्थैर्यहेतुः सूत्रपदैः पदच्छेदो भाष्येण च निगदव्याख्यातेन व्याख्याता इति न व्याख्याताः ७

मूर्धा मूर्धकपाले ब्रह्मरन्ध्रे सुषुम्नानाडीलक्ष्यनेन तत्र संयमद्‌वारेति प्रागेव प्रतिभाऊहलभ्यं वंप्रातिभं प्रसंख्यानादेतुसंयमवतो हि तलकर्षे प्रसंख्यानो
दयपूर्वलिंगं यदहरं जं सा तंतेन मर्वं ब्रह्मपुरे दृष्टत्वाद्वा माझतस्य पुरं निलयस्थितं तत्र विज्ञानातिस्वमिति इहरं गतं तदेव पुंडरीकं ॥
अधोमुखं वेश्मनस्य चित्तसंवेदनत्वे हेतुमाह तत्र विज्ञानं तत्र संयमाच्चित्तं विजानातिस्व वृत्तिविशिष्टं स तं यच्च प्रकाशरूपस्या
तिस्वच्छस्यनितांताभिभूतरजस्तमस्तयाविवेकस्त्याति रूपेण परिणतस्य बुद्धिसत्त्वस्यात्यंतिकशद्धेतत्याद्‌संकरत्त्व कोवक ॥

मूर्धज्योतिषि सिद्धदर्शनम् ३२ शिरःकपाले ऽन्तश्छिद्रं प्रभास्वरं ज्योतिस्तत्र संयमात्सिद्धा
नां द्यावापृथिव्योरन्तरालचारिणां दर्शनं ३० प्रातिभाद्वा सर्वम् प्रातिभं नाम तारकं त
द्विवेकजस्य ज्ञानस्य पूर्वरूपं यथोदये प्रभा भास्करस्य तेन वा सर्वमेव जानाति योगी
प्रातिभस्य ज्ञानस्योत्पत्ताविति ३१ हृदये चित्तसंवित् यदिदमस्मिन्ब्रह्मपुरे दह
रं पुंडरीकं वेश्म तत्र विज्ञानं तस्मिन्संयमाच्चित्तसंवित् ३१ सत्त्वपुरुषयोरत्यंतासं
कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्स्वार्थसंयमात्पुरुषज्ञानं बुद्धिसत्त्वं प्रख्या

यासजस्तमसो जडस्वभावयोघित्याश्रयवानुसूत्रकारः सत्त्वपुरुषयोरित्युवाच इममेवाभिप्रायं गृहीत्वा भाष्यकारोप्या
ह बुद्धिसत्त्वं प्रख्याशीलमिति न प्रख्याशीलमात्रमपि तु विवेकख्यातिरूपेण परिणतमतो नितांतशुद्धप्रकाशनपार
त्यंतसारूप्यं चेतन्येने ०

तिसंकरइत्यत आह समानेति सत्त्वेनोपनिबंधनप्रविनाभावः संबंधः समानं सत्त्वोपनिबंधनं ययोरजस्तमसोस्तेनेतद्धातेवशीका
रोभिभवः असंकरमाह तस्माच्चेति चकारोप्यर्थः न केवलं रजस्तमोभ्यामित्यर्थः परिणामिनइति वैधर्म्यमपरिणामिनः पुरुषा
इत्यंप्रत्ययाविशेषः शांतघोरमूढरूपा या बुद्धेर्वृत्तयस्ताभिर्विवेकाहेणचैतन्यस्यशांताद्याकारापत्तिरोपभ्यंद्रमसइवस्वच्छसलिलप्र
तिबिंबितस्यैवस्यतत्कंपनानुकंपनारोपः भोगहेतुमाह दर्शितविषयत्वादिति असकृद्व्याख्यातं ननुबुद्धिसत्त्वमस्तु पुरुषभिन्नं
भोगस्तु पुंसः कुतो भिद्यतेइत्यत आह सभोगप्रत्ययो भोगरूपः प्रत्ययः सत्त्वस्यातः परार्थत्वाद्दृश्यो भोग्यः सत्त्वं हि परार्थसं
हतत्वात्तद्धर्मश्च भोगः इति सोपि परार्थः यस्तु परस्मादसौ तस्य भोग्यः अयमनुकूलप्रतिकूलवेदनीयस्तु सुखदुःखानुभा

समानसत्त्वोपनिबंधे रजस्तमसी वशीकृत्य सत्त्वपुरुषान्यताप्रत्ययेन परिणतं तस्माच्च
सत्त्वात्परिणामिनोत्यंतविधर्मा शुद्धोन्यश्चितिमात्ररूपः पुरुषस्तयोरत्यंतासंकी
र्णयोः प्रत्ययाविशेषो भोगः पुरुषस्य दर्शितविषयत्वात्स भोगप्रत्ययः सत्त्वस्य भोग
प्रत्ययः सत्त्वस्य परार्थत्वाद्दृश्यः यस्तु तस्माद्विशिष्टश्चितिमात्ररूपोन्यः पौरुषेयः प्र
त्ययस्तत्र संयमात्पुरुषविषया प्रज्ञा जायते न च पुरुषप्रत्ययेन ०॥

वो भोगः न चापमात्मा नमेवानु
कूलयतिप्रतिकूलयति वाखात्मनि वृत्तिविरोधादतोनुकूलनीयप्रतिकूलनीयार्थो भोगः स भोक्तात्मा तस्य स्वरूपो भोग्यइति
यस्तु तस्मात्परार्थाद्विशिष्टइति परार्थाद्दितिवं चम्यत्यपदार्थाव्याहारेणव्याख्यातास्यादित तपुरुषविषया चेत्प्रज्ञाहंत भोः पु
रुषः प्रज्ञायाः प्रज्ञेयइतिप्रज्ञातरमेवतत्र ततो नेति अनवस्थापातइत्यत आह न च पुरुषप्रत्ययेनेति अयमभिसंधिः चित्याजडः
प्रकाश्यते न जडेन चितिः पुरुषप्रत्ययस्तु चिद्रात्माकथंचिदात्मानं प्रकाशयेत् चिद्रात्मा तु परार्थीनप्रकाशोजडं प्रकाशयतीतियु

बुद्धिसत्वात्मनेति अचिद्रूपतद्धर्मत्वेन जडत्वमाह बुद्धिसत्वगतपुरुषप्रतिबिंबालंबनात् पुरुषालंबनेननु पुरुषप्रकाशनात् पुरुषालंबनबु द्धिसत्वमेवनुनेनप्रत्ययेनसंवीतपुरुषप्रतिबिंबंपुरुषच्छायात्मं चैतन्यमालंबनइतिपुरुषार्थः अत्रैवश्रुतिमुदाहरति तथाश्रुतमिति पदेरणविज्ञातारमितिनकेनचिदित्यर्थः सचस्वार्थसंयमोनयावत्प्रधानंस्वकार्यंपुरुषज्ञानमभिनिर्वर्तयतितावत्तस्यपुरुषज्ञानाद्यावि भूतीअधत्तेताःसर्वाद्दर्शयति ततइति तदनेनयोगजधर्मानुगृहीतानांमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानांयथासंख्यंप्रातिभज्ञानद्दि व्यशब्दाद्यवबोधहेतुभावउक्तःश्रोत्रादीनांपंचानांदिव्यशब्दाद्युपलंभकानांतांत्रिक्यःसंज्ञाःश्रावणाद्याःसुगमंभाष्यंकश्चि

बुद्धिसत्वात्मनापुरुषोदृश्यतेपुरुषएवप्रत्ययंस्वात्मावलंबनंपश्यति तथाश्रुतं विज्ञातारमरेकेनविजानीयादिति ३३ ततःप्रातिभश्रावणवेदनादर्शास्वादवार्ताजायंते प्रातिभात्सूक्ष्मव्यवहितविप्रकृष्टातीतानागतज्ञानंश्रावणाद्दिव्यशब्दश्रवणं वेदनाद्दिव्यस्पर्शाधिगमः आदर्शाद्दिव्यरूपसंवित् आस्वादाद्दिव्यरससंवित् वार्तातोदिव्यगंधविज्ञानमित्येतानिनित्यंजायंते ३४ तेसमाधावुपसर्गाव्युत्थानेसिद्धयः ते प्रातिभादयःसमाहितचित्तस्योत्पद्यमानाउपसर्गास्तद्दर्शनप्रत्यनीकत्वात् व्युत्थितचित्तस्योत्पद्यमानाः सिद्धयः ३५

दात्मविषयसंयमप्रवृत्तस्यतत्प्रभावादमूर्योत्तरसिद्धीरपि दिग्मात्रकृतार्थमः न्यःसंयमाद्विरमेदतआहतेपः व्युत्थितचित्तोहिताःसिद्धीरभिमन्यतेजन्मांधइवद्रविणकणिकामविद्रविणसंभारं यो गिनातुसमाहितचित्तेनावगताप्योपिताभ्योविरंतव्यं अभिसंहितताप्रत्रयात्यंतिकोपशमरूपपरमपुरुषार्थःसखल्वयंक थंतत्प्रत्यनीकासुसिद्धिषुरज्येतेतिसूत्रभाष्यार्थः

नदेवंज्ञानरूपमैश्वर्यंपुरुषदर्शनांतंसंयमफलमुक्त्वाक्रियारूपमैश्वर्यंसंयमफलमाह बंधःसमाधिबलादिति बंधकारणैःसंय मबलात् प्राधान्यात्समाधिग्रहणंप्रचरत्यनेनास्मिन्निति प्रचारःचित्तस्यगमागमाध्वानोनाड्यः तस्मिन्प्रचारेसंयमात्तद्वेदनं तस्माच्चबंधकारणशैथिल्यात् ततेनप्रतिबध्यते अप्रतिबद्धमप्युन्मार्गेणगच्छत्स्वशरीरादप्रत्यूहंनिष्क्रामतितच्चपरशरी रमाविशतितस्मात्तत्प्रचारोपिज्ञातव्यः इंद्रियाणिचचित्तानुसारीणिपरशरीरेयथाधिष्ठानंनिविशंतेइतितत्रसमक्षेंद्रिय

बंधकारणशैथिल्यात्प्रचारसंवेदनाच्चचित्तस्यपरशरीरावेशः लोलीभूतस्यमनसो प्रतिष्ठस्यशरीरेकर्माशयवशाद्बंधःप्रतिष्ठेत्यर्थः तस्यकर्मणोबंधकारणस्यशैथि ल्यंसमाधिबलाद्भवति प्रचारसंवेदनंचचित्तस्यसमाधिजमेवकर्मबंधक्षयात्स्वचि त्तस्यप्रचारसंवेदनाच्चयोगीचित्तंस्वशरीरान्निष्कृष्यशरीरांतरेषुनिक्षिपतिनि क्षिप्तंचित्तंचेंद्रियाण्यनुपतंतियथामधुकरराजानंमक्षिकाउत्पतंतमनूत्पतंतिनिविश मानमनुनिविशंतेतथेंद्रियाणिपरशरीरावेशेचित्तमनुविधीयंतइति ३६ उदानज याज्जलपंककंटकादिष्वसंगउत्क्रांतिश्च समस्तेंद्रियवृत्तिःप्राणादिलक्षणजीव

वृत्तिर्जीवनंप्राणादिलक्षणाप्राणादयोलक्षणं यस्याःसातथोक्ताद्वयीइंद्रियाणांवृत्तिर्बाह्याभ्यंतरीच बाह्याशब्दाद्यालोचनल क्षणा आभ्यंतरीतुजीवनलक्षणाहिप्रयत्नभेदःशरीरोपगृहीतमाह तत्क्रियाभेदहेतुःसर्वंकरणसाधारणः घयाद्भःसामान्यकरण वृत्तिःप्राणाद्यावायवःपंचेतिनैरुक्तलक्षणीयत्वात् तस्यप्रयत्नस्यक्रियाकार्यंपंचतयीप्राणआनासिकाग्राह्नावर्तयादव

भा-वा-
८६

अशितपीताहारपरिणतिभेदं रसं तत्र तत्र स्थाने सममनुरूपं नयन् समानः आहृदयादानाभेरस्य स्थानं मूत्रपुरीषगर्भादीनामप
नयनहेतुरपानः आनाभेरापादतलादस्य वृत्तिः उन्नयनादूर्ध्वनयनाद्रसादीनामुदानः आनासिकाग्रादा च शिरसोऽस्य वृत्तिः व्याप्य
स्तो वृत्तिरस्य व्यापी व्यानः एषामुक्तानां प्रधानं प्राणस्तदुत्क्रमे सर्वोत्क्रमश्रुतेः प्राणमुत्क्रामन्तमनु सर्वे प्राणा उत्क्रामन्तीति तेन देवप्रा
णादीनां क्रियास्थानभेदे न भेदं प्रतिपाद्य सूत्रार्थमवतारयति उदानजयादिति उदाने कृतसंयमस्य जलपङ्कलादिभिर्न प्रतिहन्य
ते उत्क्रान्तिश्चार्चिरादिमार्गेण भवति प्रायणकाले तस्मात्तामुत्क्रान्तिं वशित्वेन प्रतिपद्यते प्राणादिसंयमात्तज्जये भूतजयवत्

समं नयनात्समानः आनाभिवृत्तिः अपनयनादपानः आपादतलवृत्तिः उन्नयनादुदान
आशिरोवृत्तिः व्यापी व्यान इति एषां प्रधानः प्राणः उदानजयाज्जलपंककंटकादि
ष्वसंगः उत्क्रान्तिश्च प्रायणकाले भवति तां वशित्वेन प्रतिपद्यते ३९ समानजया
ज्ज्वलनं जितसमानस्तेजस उपध्मानं कृत्वा ज्वलति ४० श्रोत्राकाशयो
ः संबंधसंयमाद्दिव्यं श्रोत्रं सर्वश्रोत्राणामाकाशं प्रतिष्ठा सर्वशब्दानां च ८६ ॥

क्रियाः स्थानविजयादिभेदात्प्रतिपत्तव्याः सर्वं तेजसः आविस्योपध्मानमुत्तेजनं स्वार्थं संयमादन्वाचयशिष्टं आवरणादु
क्तं सप्रतिश्रावणादुक्तं सप्रतिश्रावणाद्यर्थादेव संयमाच्छ्रावणादि भवतीत्याह श्रोत्रसंयमविषयं श्रोत्राकाशयोः
संबंधमाधाराधेयभावमाह सर्वश्रोत्राणामाहंकारिकाणामप्याकाशं कर्णशष्कुलीविवरं प्रतिष्ठानदेशस्तन्न श्रोत्रं तदुपका
रोपकारभ्यां श्रोत्रस्योपकार्यकारदर्शनात् शब्दानां च श्रोत्रसहकारिणां पार्थिवादिशब्दग्रहणे कर्तव्ये कर्णशष्कुलीसुषि

[illegible]

८६

गंधादिगुणसहकारिभिर्घ्राणादिभिर्वा हं पार्थिवादिवर्तिगंधाद्यालोचने कार्ये दृष्टं आकाशिकमपि घ्राणस्तनत्वक्चक्षुः
श्रोत्रं भूताधिष्ठानेभिर्भूतोपकार्योपकारभ्यां घ्राणादीनामुपकार्योपकारकमदर्शनादित्युक्तं तत्र दर्शनं श्रोत्रमाहंकारिकमपः प्र
तिनियतस्वाकाशमणिकल्पेन वायुवक्रसमुत्पन्नेन वक्त्रस्थेन शब्देनावच्छिन्नस्वरूपवृत्तिं परं परया वक्तुर्वक्त्रमागतं शब्दमालोचयति त
था च दिग्देशवर्तिशब्दप्रतीति प्राणप्रमात्रस्य नास्ति बाधकैः प्रमाणीकृता भविष्यतीति तथा च पंचशिखस्य वाक्यं तुल्य
देशश्रवणानामेकदेशश्रुतित्वं सर्वेषां भवतीति तुल्यदेशानि श्रवणानि श्रोत्राणि येषां चैत्रादीनां तेन येषां ते सर्वेषां श्रव
णात्याकाशवर्तीत्यर्थः तच्च श्रोत्राधिष्ठानमाकाशं शब्दगुणं तस्मादन्यत्र शब्दगुणकं येन शब्देन सहकारिणा पार्थिवा
दीन् शब्दान् गृह्णाति तेन तस्मात्सर्वेषामेकजातीयाश्रुतिः शब्दैः स्वयं तदनेन श्रोत्राधिष्ठानत्वमाकाशस्य शब्दगुणत्वं

३ यथोक्तं तुल्यदेशश्रवणानामेकदेशश्रुतित्वं सर्वेषां भवतीति तच्चैतदाकाशस्य
॥ लिंगम् अनावरणं चोक्तं तथाऽमूर्तस्यानावरणदर्शनाद्विभुत्वमपि प्रख्यातमा

च दर्शितमिति तच्चैकदेशश्रुतित्वमाकाशस्य लिंगं सा ह्येकजातीयशब्दव्यंजिका श्रुतिः एकदेशश्रवणानां देवाकाशशब्दवाच्यं
न हि दृश्यते श्रुतिर्भिन्नदेशेषु शब्दव्यक्तिः न चैवं दृश्यते श्रुतिः स्पर्शादि व्याप्तिगुणस्तस्य स्वातंत्र्यं नियमे पर्यवसानकत्वानुपपत्तेरिति अनावर
णं चाकाशलिंगं यथाकाशं नाभविष्यत् अमी त्विसंपीडितानि मूर्तानि नसूचीभिरप्यभेत्स्यंत ततश्च सर्वे रेवस्वयेमात्रं स्या
त् न च मूर्तद्रव्याभावमात्रादेवानावरणमस्याभावस्याभावाश्रितत्वेन तदभावे भावात् न च चितिशक्तिस्तदाश्रया भवि
तुमर्हति अपरिणामितया अवच्छेदकत्वाभावात् न च दिक्कालादयः पृथिव्यादिद्रव्यव्यतिरिक्ताः संति तस्मात्तादृशः परि
णतिभेदो न भस्पर्शसर्वमवदातं अनावरणे चाकाशलिंगे सिद्धे पश्यत्यनावरणं तेन सर्वत्राकाशमिति सर्वगतत्वमप्यस्य

सिद्धमित्याह तथाप्यमूर्तस्येति ॥

भा-वा- ८७

श्रोत्रसद्भावे प्रमाणमाह शब्दग्रहणेति क्रियाहि करणसाध्या छेदाय यथा छिदादिर्वास्यादिसाध्या तद्वच्छब्दग्रहणक्रिययापि करण
साध्यया भवितव्यं यच्च करणं तच्छ्रोत्रमिति अथास्याक्षत्वादुच्यत एव कस्मात्करणं न भवतीत्यत आह बधिराबधिरयोरिति
अन्वयव्यतिरेकाभ्यामवधारणं उपलक्षणं चैतत्त्वग्वातयोश्चक्षुस्तेजसोः रसनोदकयोर्नासिकापृथिव्योः संबंधसंयमाद्दिव्य
त्वगाद्यपूहनीयं कार्यं कायाकाशसंबंधसंयमाल्लघुनि वा तूलादौ कृत अपरमपि परशरीरावेशहेतुसंयमं क्लेशकर्म

शब्दग्रहणनिमित्तं श्रोत्रं बधिराबधिरयोरेकः शब्दं गृह्णात्यपरो न गृह्णातीति तस्माच्छ्रोत्र
मेव शब्दविषयं श्रोत्राकाशयोस्संबंधे कृतसंयमस्य योगिनो दिव्यं श्रोत्रं प्रवर्तते ३९
कायाकाशयोः संबंधसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् यत्र कायस्तत्रा
काशं तस्यावकाशदानात्कायस्य तेन संबंधः प्राप्तिस्तत्र कृतसंयमो जित्वा तत्संबंधं
लघुषु तूलादिष्वापरमाणुभ्यः समापत्तिं लब्ध्वा जितसंबंधो लघुर्भूत्वा जले या
दाभ्यां विहरति ततस्सूक्ष्मनाभितंतुमात्रे विचरन् रश्मिषु विहरति ततो यथेष्टमाका
शगतिरस्य भवतीति ४० बहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः
शरीराद्बहिर्मनसो वृत्तिलाभो विदेहा नाम धारणा सा यदि शरीरप्रतिष्ठस्य मनसो ब
हिर्वृत्तिमात्रेण भवति सा कल्पितेत्युच्यते यदा पुनः शरीरं तिरयेत्तावद्बहिर्भूतस्यैव मनसो

स्यैव संपत्तिं चेत्तस्य स्वातंत्र्येन तां लभ्येति सिद्धिक्रममाह जलदूति अपरशरीरावेशहेतुसंयमं क्लेशकर्मविपाक ८७
त्रयहेतुमाह बयः विदेहामाह शरीरादिति अकल्पितायां महाविदेहायां बाधकाभावप्रदर्शनाय कल्पितां विदेहा
माह सा यदीति वृत्तिमात्रं कल्पना आत्मनस्तेन महाविदेहामाह यादिति॰

दुपायोऽयं तेन कल्पिताकल्पितयोरुक्तं तत्रेति किं परशरीरावेशमात्रमितो नेत्याह ततश्चेति तस्यां धारणायां महाविदेहायां मनःप्रवृ
त्तेः सिद्धिः क्लेशाश्च कर्म च तासां विपाकत्रयं जात्यायुर्भोगाः तदेतद्रजस्तमोमूलं विगलितरजस्तमसः सत्त्वमात्रानुविवेकख्याति
मात्रसमुत्पादनात्तदेतद्विपाकत्रयं रजस्तमोमूलत्वात्तदावरकं सद्बुद्धिसत्त्वमावृणोतीति ननु तया च निरावरणो योगी जित्वा यथेष्टं
विहरति विजानाति चेति स्थूल स्थूलस्वरूपं सूक्ष्मं चान्वयश्चार्थवत्त्वं चेति स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वानि तेषु संयमात्
तत्र स्थूलमाह तत्रेति पार्थिवाः पार्थिवा आप्यास्तैजसा वायवीया आकाशीयाः शब्दस्पर्शरूपरसगंधा यथासंभवं विशेषाः
षड्जगांधारादयः शीतोष्णादयो नीलपीतादयः कषायमधुरादयः सुरभ्यादयः एते हि नामरूपप्रयोजनैः परस्परतो भिद्यंत इति

तत्र कल्पितया साध्यत्वं कल्पितां महाविदेहामिति परशरीराण्याविशन्ति यो
गिनः ततश्च धारणातः प्रकाशात्मनो बुद्धिसत्त्वस्य यदावरणं क्लेशकर्मविपाक
त्रयं रजस्तमोमूलं तस्य क्षयो भवति ४१ स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमा
द्भूतजयः तत्र पार्थिवाद्याः शब्दादयो विशेषाः सहाकारादिभिर्धर्मैः विशेषाः एतेषां पंच

पृथिव्यां गंधवर्जितेन चत्वारो ह्यप्सु गंधरसवर्जेन त्रयस्तेजसि गंधरसरूपवर्जं द्वौ च वायौ शब्द एवाकाशे न पंचाद्युत्तरशिशेषाः सह
हाकारादिभिर्धर्मैः स्थूलशब्दवाच्याः परिभाषिताः पार्थिवास्तावद्धर्माः आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव च वृत्ति
भेदः क्षमाकार्श्यकाठिन्यं सर्वभोग्यता आप्या धर्माः स्नेहः सौक्ष्म्यं प्रभा शौक्ल्यं मार्दवं गौरवं च यत् शैत्यं रक्षा पवित्रत्वं संधानं
चौदका गुणाः तैजसा धर्माः ऊर्ध्वभाक् पाचकं दग्धृ पावकं लघु भास्वरं प्रध्वंस्योजस्वि वै तेजः पूर्वाभ्यां भिन्नलक्षणं वायवीया
धर्माः तिर्यग्यानं पवित्रत्वमाक्षेपो नोदनं बलं चलमच्छायता रौक्ष्यं वायोर्धर्माः पृथग्विधाः आकाशीया धर्माः ॥ ४१॥

सर्वतोनतिरव्यूहोविषं भवेति चत्र यः आकाशाधर्मोव्याख्यानापूर्वे धर्मविलक्षणा उक्ति मएन आकाशप्रभृतयो धर्मास्तेः सहति
आकाशप्रसामान्यविशेषोत्वाद्दिदिः द्वितीयं रूपमाह द्वितीयं रूपं स्वसामान्यं मूर्तिः सांसिद्धिकं काठिन्यं स्नेहो जलं मरुतानु स्थिव
त्वाधानहेतुः वह्निरूष्मता आर्द्रयंसीयं भोमे च सर्वं नैव तेजसि स्पर्शवतोस्मनेतिसर्वं चैतद्धर्मधर्मिणोरभेदविवक्षयाभिधानं वायुः
प्राणमीवहनशीलः तदाह चलनेनत्र णादीनां शरीरस्यादनेन च सर्वं वायुसामान्यं नामित्वमनुमीयते सर्वतोगतिरकाशः
सर्वत्रशब्दोपलब्धिदर्शनात् ज्योत्रं नीयाकाशगुणेन हि शब्दे न पार्थिवादिशब्दोपलब्धिरित्युपपादितमधस्तानुपनत्वनु
शब्देनोक्तं आसैवमूर्त्यादिसामान्यस्य शब्दादयः षड्जादयः उष्णत्वादयः लक्ष्णत्वादयः कषायत्वादयः सुरभित्वादयो मूर्त्यादीनां

स्थूलशब्देनचरिभाविनाएतभूतानां मूर्त्यमंत्रं द्वितीरूपं स्वसामान्यं मूर्तिर्भूमिः
स्नेहो जलं वह्निरूष्मता वायुः प्राणमीसर्वतोभातिराकशादन्येनतत्वरूपशब्देनोच्यते
आस्यसामान्यस्य शब्दादयो विशेषाः तथा चोक्तं एकजातिसमन्वितानामेषां धर्ममा
त्रव्यावृत्तिरितिसामान्यविशेषसमुदायोत्रद्रव्यं

सामान्यानां भेदाः सामान्यान्यविमूर्त्यादीनि तं वीरप
नसामलकफलादीनिरसादिभेदान्परस्परं व्यावर्तन्ते नैतेषामेते रसादयो विशेषाः तथोक्तं एकजातिसमन्वितानां प्रत्येकं
वृषिव्यादीनामेवैकया जात्या मूर्तिस्नेहादिनासमन्वितानामेषां वक्ष्यादिधर्ममात्रव्यावृत्तिरितिदं वसामान्यमूर्त्याद्युक्तं विशे
षाश्च शब्दादय उक्ताः ये चाहुः सामान्यविशेषा एव योद्रव्यमितिनान्यत्याह सामान्यविशेषसमुदायोत्रदर्शने द्रव्यं ये पित
षासुद्रव्यं न तु ताभ्यां तत्समुदायाज्जतदाधारमपरं द्रव्यमुपलभामहे ताभ्यां तावत्समुदायादिव तदाधारमपरं द्रव्यमि

तत्रसमूहमात्रं द्रव्यमितिप्रमाय नुतये समूहविशेषोद्रव्यमितिनिर्धारयितुं समूहप्रकारानाह द्विष्ठो हीति यस्माद्द्विविधः तस्मात्रसमूह
मात्रं द्रव्यमित्यर्थः द्वाभ्यां प्रकाराभ्यां तिष्ठतीति द्विष्ठः एकं प्रकारमाह प्रत्यस्तमितेति प्रत्यस्तमितो भेदो येषामवयवानां तेन चो
क्ताः प्रत्यस्तमितभेदा अवयवा यस्य स तथोक्तः एतदुक्तं भवति शरीरं वृक्षो यूथं वनं शब्देन समूहः प्रतीयमानोऽप्रतीतावयवभेदस्त
द्वाचकपाणिप्रयोगात् समूह एकावगम्यत इति युतायुतसिद्धावयवत्वेन चेतनाचेतनत्वेन चोदाहरणचतुष्टयं युतायुतसिद्धा
वयवत्वं चाग्रे वक्ष्यते द्वितीयं प्रकारमाह शब्देनोपात्तभेदावयवानुगतः समूहः उभये देवमनुष्या इति देवमनुष्या इति हि शब्देनोभ
यशब्द वाच्यस्य समूहस्य भागौ भिन्नावुपात्तौ न तु भयशब्दात्तावदवयवभेदो न प्रतीयते तत्कथमुपात्तभेदावयवानुगतस्तदितित

द्विष्ठो हि समूहः प्रत्यस्तमितभेदावयवानुगतः शरीरं वृक्षो यूथं वनमिति शब्देनोपात्तभेदा
वयवानुगतः समूहः उभये देवमनुष्याः समूहस्य देवा एको भागो मनुष्या द्वितीयो भागस्ता
भ्यामेवाभिधीयते समूहः स च भेदाभेदविवक्षित आम्राणां वनं ब्राह्मणानां सङ्घः आम्र
वनं ब्राह्मणसंघ इति स पुनर्द्विविधो युतसिद्धावयवोऽयुतसिद्धावयवश्च युतसिद्धा
वयवः समूहो वनं संघ इति ० ॥

आह ताभ्यां भागाभ्यामेव समूहोऽभिधीयते उभयशब्देन भागद्वयवाचिशब्दस
हितेन समूहो वाच्यः वा करणवाचार्थ्यवाचकस्योक्तिति भावः पुनर्द्वैविध्यमाह स चेति भेदेन चाभेदेन च विवक्षितः भेदविवक्षित
माह आम्राणां वनं ब्राह्मणानां समूह इति भेदप्रवृत्तषष्ठीप्रत्ययतः यथा गर्गाणां गोत्रमिति अभेदविवक्षितमाह आम्रवनं ब्राह्म
णसंघ इति आम्राश्च ते वनं चेति समूहसमूहिनोरभेदं विवक्षित्वा सामानाधिकरण्यमित्यर्थः विधान्तरमाह स पुनर्द्विविधः
युतसिद्धावयवः समूहः युतसिद्धाः पृथक्सिद्धाः सान्तराला अवयवा यस्य स तथोक्तः पृथग्यतनमितिसान्तराला हि तदवयवा वृक्षास्त्वगा
दयश्च युतसिद्धावयवसमूहो दृष्टान्तोऽयं परमाणुप्रतिनिरन्तराहितदवयवाः सामान्यविशेषा वा साक्षाद्यावेति ० ॥ ७ ॥ ० ॥

भो॰ वा॰ ८१

तदेतेषु समूहेषु द्रव्यभूतं समूहं निर्धारयति अयुतसिद्धेति तदेवं प्रासंगिकं द्रव्यं व्युत्पाद्य प्रकृतमुपसंहरति एतत्स्वरूपमित्युक्तमिति तृतीयं रूपं विवक्षुः पृच्छति अथेति उत्तरमाह तन्मात्रमिति तस्यैकोऽवयवः परिमाणभेदः परमाणुः सामान्यं मूर्तिः शब्दादयो विशेषाः तदात्मा अयुतसिद्धा निरंतरा एवावयवाः सामान्यविशेषास्तद्भेदेष्वनुगतः समुदायः यथा च परमाणुः सूक्ष्मं रूपमेवं सर्वतन्मात्राणि सूक्ष्मरूपमिति उपसंहरति एतदिति अथ भूतानां चतुर्थं रूपं ख्यातिक्रियास्थितिशीला गुणाः कार्यस्वभा

अयुतसिद्धावयवः संघातः शरीरं वृक्षः परमाणुरिति अयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिति पतंजलिः एतत्स्वरूपमित्युक्तं अथ किमेषां सूक्ष्मरूपं तन्मात्रं भूतकारणं तस्यैकोऽवयवः परमाणुः सामान्यविशेषात्माऽयुतसिद्धावयवभेदानुगतः समुदाय इत्येवं सर्वतन्मात्राण्येतत्तृतीयं अथ भूतानां चतुर्थं रूपं ख्याति क्रियास्थितिशीला गुणाः कार्यस्वभावानुपातिनोऽन्वयशब्देनोक्ताः अथैषां पंचमं रूपमर्थवत्त्वं भोगापवर्गार्थता गुणेष्वन्वयिनी गुणास्तन्मात्रभूतभौतिकेष्विति सर्वमर्थवत् तेष्विदानीं भूतेषु पंचसु पंचरूपेषु संयमात्तस्य तस्य रूपस्य स्वरूपदर्शनं जयश्च प्रादुर्भवति तत्र पंचभूतस्वरूपाणि जित्वा भूतजयी भवति तज्जयाद्वत्सानुसारिण्य इव गावोऽस्य संकल्पानुविधायिन्यो भूतप्रकृतयो भवंति ४२ पतिनुमनुगंतुं शीलं ये षां तेन चोक्ताः अत एवान्वयशब्देनोक्ताः अथैषां पंचमं रूपमर्थवत्त्वं विवृणोति भोगेति नन्वेवमपि सत्सु गुणात्मकं तन्मात्रभूतभौतिकेषु कार्येषु कथं कार्याणामनुकूलोऽर्थवत्त्वमित्यत आह गुणा इति भौतिका गोघटादयः तदेवं संयमविषयमुक्त्वा संयमं तत्फलं चाह तेष्विति भूतप्रकृतयो भूतस्वभावाः ८१

संकल्पानुविधाने भूतानां किं योगिनः सिध्यतीत्यत आह तथा स्थूलसंयमजयात्तु तत्त्वतः सिद्धयो भवंतीत्याह तत्राणिमा महानपि भवत्यणुः लघिमा महानपि लघुर्भूत्वेषीकातूलवदाकाशे विहरति महिमा अल्पोऽपि नागनगनगरगगनपरिमाणो भवति प्राप्तिः सर्वे भावाः संनिहिता भवंति योगिनस्तथा भूमिष्ठ एवांगुल्यग्रेण स्पृशति चंद्रमसं स्वरूपसंयमविजयानुसिद्धिमाह प्राकाम्यमिच्छानभिघातो नास्य रूपं भूतस्वरूपैर्मूर्त्यादिभिरभिहन्यते भूमावुन्मज्जति निमज्जति च यथोदके सूक्ष्मविषयसंयमजयात्सिद्धिमाह वशित्वं भूतानि पृथिव्यादीनि भौतिकानि गोघटादीनि तेषु वशी स्वतंत्रो भवति तेषां त्ववश्यः तत्कारणतन्मात्रपृथिव्यादिपरमाणुवशीकारा

ततोऽणिमादिप्रादुर्भावः कायसंपत्तद्धर्मानभिघातश्च तत्राणिमा भवत्यणुः लघिमा लघुर्भवति महिमा महान्भवति प्राप्तिरंगुल्यग्रेणापि स्पृशति चंद्रमसं प्राकाम्यमिच्छानभिघातः भूमावुन्मज्जति निमज्जति यथोदके वशित्वं भूतभौतिकेषु वशी भवत्यवश्यश्चान्येषां ईशितृत्वं तेषां प्रभवाप्ययव्यूहानामीष्टे यत्रकामावसायित्वं सत्यसंकल्पता यथा संकल्पस्तथा भूतप्रकृतीनामवस्थानम् तत्कार्यवशीकारस्तेन यानि यथावस्थापयति तानि तथा

वतिष्ठंते इत्यर्थः अन्वयविषयसंयमजयात्सिद्धिमाह ईशितृत्वं तेषां भूतभौतिकानां विजितमूलप्रकृतिः सन्नुत्पत्तिः प्रभव उत्पादोऽपयः अप्ययो विनाशो व्यूहो यथावदवस्थापनं तेषामीष्टे अर्थवत्त्वसंयमात्सिद्धिमाह यत्रकामावसायित्वं सत्यसंकल्पता विजितगुणार्थवत्त्वो हि योगी यद्यदर्थतया संकल्पयति तत्तस्मै प्रयोजनाय कल्पते विषमप्यमृतकार्ये संकल्प्य भोजयन्जीवयतीति॰ नमः शिवाय नमो नारायणाय ॰ ॥

भा॰व॰
९०

स्यादेन घट्या शक्ति विपर्यासं करोत्येवं पदार्थविपर्यासमपि कस्मान्न करोतीति तथा चंद्रमसमादित्यं कुर्यात् कुहूं च सिनीवालीमित्यत आह न च शक्तोपीति न खल्वेते यत्रकामावसायिनस्तत्र भगवतः परमेश्वरस्याज्ञामतिक्रमितुमुत्सहन्ते शक्तयपदार्थानां जातिदेशकालावस्थाभेदे नानियतस्वभावा इति युज्यते नासु नदिच्छानुविधानमिति एतान्यष्टावैश्वर्याणि तद्धर्मानभिघात इति अणिमादिप्रादुर्भावे त्यनेनैव तद्धर्मानभिघातसिद्धेः पुनरुपादानं का कायसिद्धिस्तु एतत्सूत्रोपबद्धसकलविष

न च शक्नोति पदार्थविपर्यासं करोति कस्मात् अन्यस्य यत्रकामावसायिनः पूर्वसिद्धस्य तथाभूतेषु संकल्पादिति एतान्यष्टावैश्वर्याणि कायसंपद्वक्ष्यमाणा तद्धर्मानभिघातश्च पृथ्वीमूर्त्या न निरुणद्धि योगिनः शरीरादिक्रियां शिलामप्यनुविशतीति नापः स्निग्धाः क्लेदयंति नाग्निरुष्णो दहति न वायुः प्रणामो वहत्यनावरणात्मकेप्याकाशे भवत्यावृतकायः सिद्धानामप्यदृश्यो भवति ४३ रूपलावण्यबलवज्रसंहननत्वानि कायसंपत् दर्शनीयः कांतिमान् अतिशयबलः वज्रसंहननश्चेति ४४ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः सामान्यविशेषात्मा शब्दादिर्ग्राह्यः तेष्विंद्रियाणां वृत्तिर्ग्रहणम् ० यसंयमफलवत्त्वज्ञापनाय सुगममभन्यत् कायसंपदमाह रूपसंपत् वज्रस्येव संहननमवयवव्यूहो दृढो निविडो यस्य स तथा जितभूतस्य योगिनः इंद्रियजयोपायमाह ग्रहणं च स्वरूपं चास्मिता चान्वयश्चार्थवत्त्वं च तेषु संयमस्तस्मादित्यर्थः गृह्णातीति ग्रहणं तच्चग्राह्याधीननिरूपणमिति ग्राह्यं दर्शयति सामान्यविशेषात्मेति ग्राह्यमुक्त्वा ग्रहणमाह तेष्वेति वृत्तिरालोचनं विषयाकारपरिणतिरिति यावत् येत्वाहुः ९०

व

सामान्यमात्रगोचरमिंद्रियवृत्तिरिति तान्प्रत्याह न चेति ग्रहणे इन्द्रियग्रहणे सामान्यमात्रगोचरं ग्रहणं बाह्येन्द्रियवर्तनं हि मनोवाह्यप्रवर्तनेऽन्यथा धवखदिरपलाशादिषु विशेषविषयमिंद्रियं नेत्यनालोचितो विशेष इति कथं मनसानुव्यवसीयेत तस्मात्सामान्यविशेषविषयमिंद्रियालोचनमिति तदेतद्ग्रहणमिंद्रियाणां प्रथमं रूपं द्वितीयं रूपमाह स्वरूपं पुनरिति अहंकारो हि सत्त्वभागेनाभीतेंद्रियाण्यजीजनत् अतो यत्तत्करणत्वं सामान्यं पञ्च नियतस्तादृशविषयत्वं विशेषस्तदुभयमपि प्रकाशात्मकमित्यर्थः

न च तत्सामान्यमात्रग्रहणाकारं कथमनालोचितः स विषयविशेष इंद्रियेण मनसानुव्यवसीयेतेति स्वरूपं पुनः प्रकाशात्मनो बुद्धिसत्त्वस्य सामान्यविशेषयोरयुतसिद्धावयवभेदानुगतः समूहो द्रव्यमिंद्रियं तेषां तृतीयं रूपं अस्मितालक्षणोऽहंकारः तस्य सामान्यस्येंद्रियाणि विशेषाः चतुर्थं रूपं व्यवसायात्मकाः प्रकाशक्रियास्थितिशीला गुणाः येषामिंद्रियाणि साहंकाराणि परिणामः पंचमं रूपं गुणेषु यदनुगतं पुरुषार्थवत्त्वमिति पंचस्वेतेष्विंद्रियरूपेषु यथाक्रमं संयमः तत्र तत्र जयं कृत्वा पंचरूपजयात्

तेषां तृतीयं रूपमिति अहंकारो हि इंद्रियाणां कारणमिति यत्रेंद्रियाणि तत्र तेन भवितव्यमिति सर्वेन्द्रियसाधारण्यात्सामान्यमिंद्रियाणामित्यर्थः चतुर्थरूपमिति गुणानां हि द्विरूपं व्यवसायात्मकत्वं व्यवसेयात्मकत्वं च तत्र व्यवसेयात्मकतां ग्राह्यतामास्थाय पंचतन्मात्राणि भूतभौतिकानि निर्मिते व्यवसायात्मकत्वं तु ग्रहणरूपमास्थाय साहंकाराणींद्रियाणीत्यर्थः शेषं सुगमम् ०॥

पंचरूपेंद्रियजयात्सिद्धीराह ततोप्यविदेहानामिंद्रियाणां करणभावो विकरणभावः देशः काश्मीरादिः कालोतीतादिर्विषयः सू
क्ष्मादिः सान्वयेंद्रियजयात्सर्वप्रकृतिविकारवशित्वं प्रधानजयः तास्ताः सिद्धयो मधुप्रतीकाइत्युच्यंते योगशास्त्रनिष्णातैः स्या
देतदुक्तं इंद्रियजयादिंद्रियाणि सविषयाणि वश्यानि भवंतु प्रधानादीनां तत्कारणानां किमायातमित्यत आह एताश्चेति करणानामिं
द्रियाणां पंचरूपाणि ग्रहणादीनि तेषां जयात् एतदुक्तं भवति नेंद्रियमात्रजयस्यैताः सिद्धयोपितु पंचरूपस्य तदंतर्गतं च प्रधा
नादीति तदेते ज्ञानक्रियारूपैश्वर्यहेतवः संयमाः साक्षात्पारंपर्येण च स्वसिध्युपसंहारसंपादितश्रद्धाद्वारेणपदर्थोत्स

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च कायस्यानुत्तमो गतिलाभो मनोज
वित्वं विदेहानामिंद्रियाणामभिप्रेतकालदेशविषयापेक्षो वृत्तिलाभो विकरणभा
वः सर्वप्रकृतिविकारवशित्वं प्रधानजयः इत्येतास्तिस्रः सिद्धयो मधुप्रतीका उच्य
ते एताश्च करणपंचकरूपजयादधिगम्यंते ४८ सत्त्वपुरुषान्यताख्यातिमात्रस्य
सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च निर्धूतरजस्तमोमलस्य बुद्धिसत्त्वस्य परे वैशा
रद्ये वशीकारसंज्ञायां वर्तमानस्य सत्त्वपुरुषान्यताख्यातिमात्ररूपप्र त्वपुरुषान्यताख्याति
रत्वं न रविभूतीर्दर्शयति सत्त्वनिर्धूतरजस्तमोमलतया वैशारद्यं ततः परवशीकारसंज्ञास्रजस्तमोभ्यामुपप्लुतं हि चित्तसत्त्वम
बहुलमासीत् तदुपशमेनुतद्वशं ययोगिनो वशिनः तस्मिन्नवस्थे योगिनः सत्त्वपुरुषान्यताख्यातिमात्ररूपप्रतिष्ठस्य सर्वभावाधि ९९
ष्ठातृत्वं एतदेव विश्वोकोति सर्वात्मानाद्विति व्यवसायव्यवसेयात्मानो जडप्रकाशरूपा इत्यर्थः तदनेन क्रियैश्वर्यमुक्तं

निष्ठस्य सर्वभावाधिष्ठातृत्वं सर्वात्मानो गुणा व्यवसायव्यवसेयात्मकाः स्वामिनं क्षेत्रज्ञं प्रत्यशेषदृश्यात्मत्वेनोपस्थिता इत्यर्थः ६

ज्ञानैश्वर्यमाह सर्वज्ञातृत्वमिति अस्या अपि सिद्धिविधायाः सिद्धेर्वैराग्याय योगिजनप्रसिद्धां संज्ञामाह एषा विशोकेति क्लेशा
श्च बंधनानि च कर्माणि तानि क्षीणानि यस्य स तथा संयमांतराणां पुरुषार्थाभासफलत्वात् विवेकख्यातिसंयमार्थतां दर्शयि
तुं विवेकख्यातेः परवैराग्योपजननद्वारेण कैवल्यफलमाह तत्त्वपदार्थस्य योगिनः क्लेशकर्मक्षये एवं ज्ञानं भवति किंभूतमि
त्याह सत्त्वस्यायं विवेकप्रत्ययो धर्मः शेषं तत्र तत्र व्याख्यातत्वात्सुगमं संप्रति कैवल्यसाधने प्रवृत्तस्य योगिनः प्रत्यूहसंभवे त

सर्वज्ञातृत्वं सर्वात्मनां गुणानां शांतोदिताव्यपदेश्यधर्मत्वेन व्यवस्थितानामक्रमो
पारूढं विवेकजं ज्ञानमित्यर्थः इत्येषा विशोका नाम सिद्धिः यां प्राप्य योगी सर्वज्ञः
क्षीणक्लेशबंधनो वशी विहरति ४९ तद्वैराग्यादपि दोषबीजक्षये कैवल्यं यदास्यै
वं भवति क्लेशकर्मक्षये सत्त्वस्यायं विवेकप्रत्ययो धर्मः सत्त्वं च हेयपक्षे न्यस्तं पुरु
षश्चापरिणामी शुद्धोन्यः सत्त्वादिति एवमस्य ततो विरज्यमानस्य यानि क्लेशबीजानि
दग्धशालिबीजकल्पान्यप्रसवसमर्थानि सह मनसा प्रत्यस्तं गच्छंति तेषु प्रलीने
षु पुरुषः पुनरिदं तापत्रयं न भुंक्ते तदेतेषां गुणानां मनसि कर्मक्लेशविपाकस्वरूपे
णाभिव्यक्तानां चरितार्थानां अप्रतिप्रसवे पुरुषस्यात्यंतिको गुणवियोगः कैवल्यं
तदा स्वरूपप्रतिष्ठा चितिशक्तिरेव पुरुष इति ५० स्थान्युपनिमंत्रणे संगस्मयाक
रणं पुनरनिष्टप्रसंगात् चत्वारः खल्वमी योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञा
त्रिणकरणमुपदिशति स्थानिनात् तानि स्थानानि येषां संति ते स्थानिनो महेंद्रादयः तैरुपमंत्रणे तस्मिन् संगः स्मयश्च न
कर्तव्यः पुनरनिष्टप्रसंगतः तत्र पदे वास्यामिरूपमस्वयं तेन योगिनमेकं निर्धारयितुं यावतो योगिनः संभवंति तावतनेवाह चा
त्वार इति तत्र प्रथमकल्पिकस्य स्वपुनर्वाप्रीकृतं ज्योतिर्ज्ञानं परचित्तादिविषयं यस्य स तथा द्वितीयमाह ऋतंभरप्रज्ञ इति परे ५

तृतीयमाह भूतेंद्रियजयीति तेन हि स्थूलादिसंयमेन ग्रहणादिसंयमेन च भूतेंद्रियाणि जितानि तमेवाह सर्वेषु भावितेषु निष्पा
दितेषु भूतेंद्रियजयान्तरवितादितानादिषु कृतरक्षाबंधः यतस्तेभ्यो न च्यवते भावनीयेषु निष्पादनीयेषु विशोकादिषु परवै
राग्यपर्यंतेषु कर्तव्यसाधनवान् अनुरूपप्रयत्नस्य साधनविषयस्यैवमाध्यनिष्पादकत्वात् चतुर्थमाह चतुर्थ इति तस्य हि भगव
तो जीवन्मुक्तस्य चरमदेहस्य चित्तप्रतिसर्ग एकोर्थः तदेतेषु योगिषु उपनिमंत्रणविषयं योगिनमवधारयति तत्र मधुमती

भूतेंद्रियजयी तृतीयः सर्वेषु भावितेषु भावनीयेषु कृतरक्षाबंधः कृतकर्तव्यसाधनादि
मान् चतुर्थो यस्त्वतिक्रांतभावनीयस्तस्य चित्तप्रतिसर्ग एकोऽर्थः सप्तविधास्य प्रांतभू
मिप्रज्ञाः तत्र मधुमतीं भूमिं साक्षात्कुर्वतो ब्राह्मणस्य स्थानिनो देवाः सत्वशुद्धिमनुप
श्यंतः स्थानैरुपनिमंत्रयंते भो इहास्यतामिह रम्यतां कमनीयोयं भोगः कमनीयेयं क
न्या रसायनमिदं जरामृत्युं बाधते वैहायसमिदं यानममी कल्पद्रुमाः पुण्या मंदाकिनी सि
द्धा महर्षय उत्तमा अनुकूला अप्सरसो दिव्ये श्रोत्रचक्षुषी वज्रोपमः कायः स्वगुणैः
सर्वमिदमुपार्जितमायुष्मता प्रतिपद्यतामिदमक्षयमजरममरस्थानं देवानां प्रियमि
त्येवमभिधीयमानः संगदोषान् भावयेत् घोरेषु संसारांगारेषु पच्यमानेन मया ज
ननमरणांधकारे विपरिवर्तमानेन कथंचिदासादितः क्लेशतिमिरविनाशी योगप्र
दीपस्तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः स खल्वहं लब्धालोकः क
थमनया विषयमृगतृष्णया वंचितस्तस्यैव पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिं
धनीकुर्यामिति स्वस्ति वः स्वप्नोपमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य इत्येवं नि
श्चितमतिः समाधिं भावयेत् संगम
कृत्वा स्मयमपि न कुर्यादेवमहं देवानामपि प्रार्थनीय इति

मितिप्रथमकल्पिके तावन्न महेंद्रादीनां तत्प्राप्तिशंकैव नास्ति तृतीये यथा तैर्नोपनिमंत्रणीयः भूतेंद्रियवशित्वेनैव तत्प्राप्तेः चतुर्थे
ऽपि परवैराग्यसंपन्नतया संगशंका दूरोत्सारितैवेति पारिशेष्याद्द्वितीय एव ऋतंभरप्रज्ञस्तदुपनिमंत्रणविषय इति वैहायसं आकाश

९२

स्मयकरणे दोषमाह स्मयादयमिति स्मयात्सुस्थितंमन्यो नानित्यतां भावयिष्यति ततश्च प्रमादं धास्यतीत्यर्थः सुगममन्यत् उक्तान्
चिन्त्कृ चिन्तयमानः सर्वं स्यात् तासां च न निःशेषज्ञता अपि तु प्रकर्षमात्रं विवक्षया यथा सर्वं व्यंजनैर्भुक्तमिति अत्र हि यावंतो व्यंजनप्र
कारास्तैर्भुक्तमिति गम्यते न तु निःशेषैरिति अस्ति च निःशेषवचनः सर्वशब्दः यथा वनीतमत्र सर्वमशितं प्राप्तकेनेति तत्र हि निः
शेषमिति गम्यते तद्धि हृतिः शेषज्ञता लक्षणस्य विवेकजज्ञानस्य साधनं संयममाह क्षणेति क्षणपदार्थं निदर्शनपूर्वकमाह यथेति
लोष्टस्य हि प्रविभज्यमानस्य यस्मिन्नवयवे व्यवतारतम्यं व्यवतिष्ठते स यथापकर्षपर्यंतः परमाणुर्यथा तथापकर्षपर्यंतः कालः

स्मयादयं सुस्थितंमन्यतया मृत्युना केशेषु गृहीतमिवात्मानं न भावयिष्यति तथा चा
स्य छिद्रांतरप्रेक्षी नित्यं यत्नोपचर्यः प्रमादो लब्धविवरः क्लेशानुत्तंभयिष्यति ततः
पुनरनिष्टप्रसंगः एवमस्य संगस्मयावकुर्वतो भावितोऽर्थो दृढी भविष्यति भावनीय
श्चार्थोऽभिमुखीभविष्यतीति ५१ क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानं यथापक
र्षपर्यंतं द्रव्यं परमाणुरेवं परमापकर्षपर्यंतः कालः क्षणः यावता वा समयेन चलितः
परमाणुः पूर्वदेशं जह्यादुत्तरदेशमुपसंपद्येत स कालः क्षणः तत्प्रवाहाविच्छेदस्तु क्र
मः क्षणतत्क्रमयोर्नास्ति वस्तुसमाहार इति बुद्धिसमाहारो मुहूर्ताहोरात्रादयः क्षणः पूर्वापरभाग
विकलः कालकलेति यावत् तमेव क्षणं प्रकारांतरेण दर्शयति यावता वेति परमाणुमात्रं देशमतिक्रामेदित्यर्थः क्रमपक्षार्थमाह
तत्प्रवाहेति तत्पदेन क्षणाः परामृश्यंते न चैष दृश्यः क्रमो वास्तवः किंतु काल्पनिक इत्यस्य समाहारस्य समस्यायुगपदवस्थितेषु वास्तव
त्वेन विचारासहत्वादित्याह क्षणतत्क्रमयोरिति अयुगपद्भावि क्षणधर्मत्वात् क्रमस्य क्षणतत्क्रमयोर्वास्तवत्वं समाहारस्य
वैः स्थानिकैर्वैकल्पिकबुद्धिनिर्माणपरहिता लौकिकाः प्रतिक्षणवृत्त्युत्थिततद्दर्शनाभ्यांतावेकालमीदृशी वास्तवमभिमन्यंत इति ०॥

भा॰वा॰
९३

तत्किं क्षणोऽप्यवास्तवो नेत्याह क्षणस्तु वस्तुपतित इति वास्तव इत्यर्थः क्रमस्यावलंबनं अवलंबः सोऽस्यास्तीति क्रमेणावलंब्यते विवेके स्थि
तत्किं क्षणोऽपि केनेत्यर्थः क्रमस्य क्षणावलंबनत्वे हेतुमाह क्रमश्चेति क्रमस्यावास्तवत्वे हेतुमाह न चेति चो हेत्वर्थे यस्तु वैजात्यात्सहभा
वमुपेयात्तं प्रत्याह क्रमश्च न द्वयोरिति कस्मादसंभव इत्यत आह पूर्वस्मादिति उपसंहरति तस्मादिति तत्किमिदानीं शविषाणप्रमाणेन
वपूर्वोत्तरक्षणाः नेत्याह ये त्विति अन्वितास्सामान्येन समन्वागता इत्यर्थः उपसंहरति तेनेति वर्तमानस्यैवार्थक्रियासु योचितासुता
मर्थ्योदिति यद्यप्येतद्विवेकजं ज्ञानं निःशेषभावविषयमित्युपरिष्टाद्वक्ष्यते तथाप्यतिसूक्ष्मत्वात् प्रथमं तस्य विषयविशेष उपक्षिप्यते जा
तिः लौकिकानां जातिभेदोऽन्यताया ज्ञापकहेतुः तुल्या जातिः गोत्वं तुल्यश्च देशः पूर्वत्वादिः कालाक्षी स्वस्तिमत्योर्लक्षणभेदः प

सखल्वयं कालो वस्तुशून्यो बुद्धिनिर्माणः शब्दज्ञानानुपाती लौकिकानां व्युत्थितदर्शनानां
वस्तुस्वरूप इवावभासते क्षणस्तु वस्तुपतितः क्रमावलंबी क्रमश्च क्षणानंतर्यात्मा तं काल
विदः काल इत्याचक्षते योगिनः न च द्वौ क्षणौ सह भवतः क्रमश्च न द्वयोः सहभुवोरसं
भवात्पूर्वस्मादुत्तरस्य भाविनो यदानंतर्यं क्षणस्य स क्रमः तस्माद्वर्तमान एवैकः क्षणो न
पूर्वोत्तरक्षणाः संतीति तस्मान्नास्ति तत्समाहारः ये तु भूतभाविनः क्षणास्ते परिणामान्वि
ता व्याख्येयास्तेनैकेन क्षणेन कृत्स्नो लोकः परिणाममनुभवति तत्क्षणोपारूढाः ख
ल्वमी धर्मास्तयोः क्षणतत्क्रमयोः संयमात्तयोः साक्षात्करणं ततश्च विवेकजं
ज्ञानं प्रादुर्भवति तस्य विषयविशेष उपक्षिप्यते

इमिति द्वयोरामलकयोस्तुल्या आमलकत्वजातिर्वर्तुलादि
लक्षणं तुल्यं देशभेदः परमिति यदा तु योगिज्ञानं जिज्ञासुना केनचित्पूर्वामलकमन्यव्यग्रस्य योगिनो ज्ञातुरुत्तरदेशे उपावर्त्यते उत्तर 93
देशमामलकं ततोऽपसार्य विधाय वा तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः प्राज्ञस्य लौकिकस्य त्रिप्रमाणीनि
पुणस्य असंदिग्धेन च तत्त्वज्ञानेन भवितव्यं विवेकजज्ञानवतो योगिनः संदिग्धत्वानुपपत्तिः ०

अत उक्तं सूत्रकृता ततः प्रतिपत्तिः तत इति व्याचष्टे विवेकजज्ञानादिति क्षणतत्क्रमसंयमाज्जातं ज्ञानं कथमामलकं तुल्यजाति
लक्षणदेशादामलकांतराद्विवेचयतीति स्थूलमिति कथमिति उत्तरमाह पूर्वामलकस [illegible] क्षणो देशः पूर्वामलकेनैकक्षणो 63
देशः तेन सह निरंतरपरिणाम इतियावत् उत्तरामलकसहक्षणदेशोऽदुत्तरामलकनिरं [illegible] माद्भिन्नः भवतु देशयोर्भेदः
किमायातमामलकभेदस्येत्यत आह ते चामलके स्वदेशक्षणानुभवभिन्ने स्वदेशसहितो यः क्षणस्तस्यामलकस्य कालकर

जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः तुल्ययोर्देशलक्षणसारू
प्ये जातिभेदोऽन्यताया हेतुः गौरियं वडवेयमिति तुल्यदेशजातीयत्वे लक्षणमन्यत्व
करं कालाक्षी गौः स्वस्तिमती गौरिति द्वयोरामलकयोर्जातिलक्षणसारूप्याद्देशभे
दोऽन्यत्वकर इदं पूर्वमिदमुत्तरमिति यदा तु पूर्वमामलकमन्यव्यग्रस्य ज्ञातुरुत्तरदेश उ
पावर्त्यते तदा तुल्यदेशत्वे पूर्वमेतदुत्तरमेतदिति प्रविभागानुपपत्तिः असंदिग्धेन च
तत्त्वज्ञानेन भवितव्यमित्यत इदमुक्तं ततः प्रतिपत्तिः विवेकजज्ञानादिति कथं पू
र्वामलकसहक्षणो देश उत्तरामलकसहक्षणाद्देशाद्भिन्नस्ते चामलके स्वदेशक्षणानु
भवभिन्ने अन्यदेशक्षणानुभवस्तु तयोरन्यत्वे हेतुरिति ०॥

स्वदेशो न सहैतदन्यथ यद्रूपपरिणाम
त्वद्विनासास्वदेशक्षणस्तस्यानुभवः प्राप्तिर्वा ज्ञानं वा तेन भिन्ने आमलके ये योरामलकयोः पूर्वोत्तरयोर्देशाभ्यामेतदन्यथ येपा
रिणामक्षण आसीत्तयोर्देशांतरे तदन्यथ यपरिणामक्षणविशिष्टत्वमनुभवन्संयमी ते भिन्ने एव प्रत्येति संप्रति न देशपरिणामे
विपूर्वभिन्नदेशपरिणामाद्विशिष्टस्यैतद्देशपरिणामक्षणस्य संयमतः साक्षात्करणात्तदिदमुक्तमदेशक्षणानुभवस्तु तयो
रन्यत्वे हेतुरिति ६१

अनेनैव निदर्शनेन लौकिकपरीक्षकसंवादादिना परमाणोरपीदृशस्य भेदो योगीश्वरबुद्धिगम्यः अस्तीत्याह एतेनेति अपरे तु वर्णयन्ति
वर्णनमुदाहरन्ति यद्यपि वैशेषिका हि नित्यद्रव्यवृत्तयोऽन्त्या विशेषाद्व्यावृत्ताः तथा हि योगिनो मुक्तानां तुल्यजातिदेशकालानां व्यवधिरहि-
तानां परस्परतो भेदेन प्रत्येकं तत्त्वेन च प्रतियन्ति तस्मादस्ति कश्चिदन्त्यो विशेषः इति तथा च स एव नित्यानां परमाण्वादीनां द्रव्याणां भेदक
इति तदेतद्दूषयति तत्रापीति जातिदेशलक्षणान्युदाहृतानि मूर्तिः संस्थानं यथैकं विपुलावयवसंस्थानोपपन्नमपरस्तनुसंनि-
वेशोऽन्यत्रस्य द्रव्यः कुत्सितावयवसंनिवेश उपावर्तितं तदा तस्य संस्थानभेदेन भेदप्रत्ययः शरीरं वा मूर्तिः तत्संबन्धे नात्मनां संसारि-

**एतेन तद्दृष्टान्तेन परमाणौ तुल्यजातिलक्षणदेशस्य पूर्वपरमाणुदेशसहक्षणसाक्षात्कर-
णादुत्तरस्य परमाणोस्तद्देशानुपपत्तावुत्तरस्य तद्देशानुभवो भिन्नः सहक्षणभेदात्तयो-
रीश्वरस्य योगिनोऽन्यत्वप्रत्ययो भवतीति अपरे तु वर्णयन्ति येऽन्त्या विशेषास्तेऽन्यताप्रत्ययं
कुर्वन्तीति तत्रापि देशलक्षणभेदो मूर्तिव्यवधिजातिभेदश्चान्यत्वहेतुः क्षणभेदस्तु योगि-
बुद्धिगम्य एवेति अत उक्तं मूर्तिव्यवधिजातिभेदाभावान्नास्ति मूलपृथक्त्वमिति वार्षगण्यः**

णां मुक्तात्मनां वा भूतचरेण भावदशा तादृशेन भेद इति सर्वत्र भेदप्रत्ययस्यान्यथासिद्धिर्नान्त्यविशेषकल्पना व्यवधिर्भेदकारणं यथा
कुम्भपुष्करद्वीपयोर्देशान्तरव्यवधिरिति यतो जातिदेशादिभेदा लोकबुद्धिगम्या अत उक्तं क्षणभेदस्तु योगिबुद्धिगम्य एवेति एवका-
रः क्षणभेदमवधारयति न योगिबुद्धिगम्यत्वं तेन भूतचरेण देहसंबन्धेन मुक्तात्मनामपि भेदो योगिबुद्धिगम्य उक्तो यदुक्तं यस्तूत्त-
का भेदहेतुरुक्ता भेदहेतवो न सन्ति तस्य प्रधानस्य भेदो नास्तीत्याचार्योऽभिमेने यस्माद्वैकृतार्थं प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वादि-
ति तदाह मूर्तिव्यवधीति उक्तभेदहेतुवत्क्षणभेदेन तु जगन्मूलस्य प्रधानस्य पार्थक्यं भेदो नास्तीत्यर्थः ० ॥

तदेवं विषयैकदेशं विवेकजज्ञानस्य दर्शयित्वा विवेकजं ज्ञानं लक्षयति तारं विवेकजं ज्ञानमिति लक्ष्यनिर्देशः शेषं लक्षणं संसारसागरा-
त्तारयतीति तारकं पूर्वस्मात्प्रातिभाद्विशेषयति सर्वथा विषयमिति पर्यायाश्चावान्तरविशेषाः अत एव विवेकजं ज्ञानं परिपूर्णं नास्य
किंचित्किंचित्कथंचित्कदाचिद्गोचर इत्यर्थः आस्तां तावत् ज्ञानोत्तरं संप्रज्ञातोऽपि तावदस्यांशः तस्मादतः परं किं परिपूर्णमि-
त्याह अस्यैवांशो योगप्रदीपः संप्रज्ञातः किमुपक्रमः किमवसानश्चास्मिन्नित्याह मधुमतीमिति ऋतंभरप्रज्ञैव मधुमोदकारणा-

**तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् तारकमिति स्वप्रतिभोत्थम-
नौपदेशिकमित्यर्थः सर्वविषयं नास्य किंचिदविषयीभूतमित्यर्थः सर्वथाविषयम-
तीतानागतप्रत्युत्पन्नं सर्वं पर्यायैः सर्वथा जानातीत्यर्थः अक्रममित्येकक्षणोपारूढं
सर्वं सर्वथा गृह्णातीत्यर्थः एतद्विवेकजं ज्ञानं परिपूर्णमस्यैवांशो योगप्रदीपो मधुम-
तीं भूमिमुपादाय यावदस्य परिसमाप्तिरिति प्राप्तविवेकजज्ञानस्याप्राप्तविवेकज-
ज्ञानस्य वा ५२ ॥**

त्वात् यथोक्तं प्रज्ञाप्रसादमारुह्येति तद्वतीमिति मधुमतीं चियोगावस्थामुपादाय यावदस्य प-
रिसमाप्तिः समाधापरां तभूमिः प्रज्ञात्मत एव विवेकजं ज्ञानं तारकं भवति तदंशस्य योगप्रदीपस्य तारकत्वादिति तदेवं परंपर-
या कैवल्यस्य हेतुस्सविभूतीः संयमानुक्त्वा सत्त्वपुरुषान्यताज्ञानं साक्षात्कैवल्यसाधनमित्यत्र भवतारयति प्राप्तेति विवेक-
जं ज्ञानं भवतु मा वा भूत् सत्त्वपुरुषान्यताख्यातिस्तु कैवल्यप्रयोजिकेत्यर्थः नमःशिवाय ० ॥

भा॰वा॰ ९५ सत्यमितिद्वतिः सूत्रसमाप्तौ ॐ ईश्वरस्य पूर्वोक्तैः संयमैर्ज्ञानक्रियाशक्तिमतो ऽनीश्वरस्य वा सम्भवन्तौ केन संयमेन विवेकजज्ञानभागिन
इतरस्य वा तुल्यत्वज्ञातस्य न विभूतिषु काचिदपेक्षास्तीत्याह नहीति ननु यद्यनपेक्षिता विभूतयः कैवल्ये व्यर्थास्तर्हि तासामुपदेश इ
त्यत आह सत्त्वशुद्धिद्वारेणेति इत्थंभूतलक्षणे तृतीया नात्यन्तमहेतवः कैवल्ये विभूतयः किंतु तथा ह्यादित्यर्थः ज्ञानं विवेकजमु

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति यदा निर्धूतरजस्तमोमलं बुद्धिसत्त्वं पुरुषस्यान्य
ताप्रत्ययमात्राधिकारं दग्धक्लेशबीजं भवति तदा पुरुषस्य शुद्धिसारूप्यमिवापन्नं भ
वति तदा पुरुषस्योपचरितभोगाभावः शुद्धिः एतस्यामवस्थायां कैवल्यं भवति ईश्वरस्या
नीश्वरस्य वा विवेकजज्ञानभागिन इतरस्य वा नहि दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा
काचिदस्ति सत्त्वशुद्धिद्वारेणैतत्समाधिजमैश्वर्यं च ज्ञानं चोपक्रान्तं परमार्थतस्तु ज्ञाना
द्दर्शनं निवर्तते तस्मिन्निवृत्ते न सन्त्युत्तरे क्लेशाः क्लेशाभावात्कर्मविपाकाभावश्चरिता
धिकाराश्चैतस्यामवस्थायां गुणा न पुरुषस्य पुनर्दृश्यत्वेनोपतिष्ठन्ते तत्पुरुषस्य कैवल्यं
तदा पुरुषः स्वरूपमात्रज्योतिरमलः केवली भवति ५५ इति पातञ्जलभाष्यप्रवचने
विभूतिपादस्तृतीयः ३ पक्रान्तेयच्च पारंपर्येण कारणं तदौपचारिकं न मुख्यं परमार्थतस्तु ख्यातिरेव मुख्यमित्यर्थः ९५
ज्ञानादिति प्रसंख्यानादित्यर्थः अन्तरङ्गान्यङ्गानि परिणामाः प्रपञ्चिताः संयमाद्विभूतिसंयोगस्तासु ज्ञानं विवेकजमिति पादार्थसं
ग्रहश्लोकः इति श्रीवाचस्पतिमिश्रविरचितायां पातञ्जलभाष्यव्याख्यायां तत्त्ववैशारद्यां विभूतिपादस्तृतीयः समाप्तः ० नमो भग
वते वासुदेवाय नमः

तदेवं प्रथमद्वितीयतृतीयपादैः समाधिस्तत्साधनं तद्विभूतयः प्राधान्येन व्युत्पादिताः इतरत्त्वनुप्रासङ्गिकमथोपयोगितं कैवल्यं चोक्तं इदा
नीं तद्धेतुकं कैवल्यं व्युत्पादनीयं न चैतत्कैवल्यभागीयं चित्तं परलोकं च परलौकिकं विज्ञानातिरिक्तं चित्तकरणकसुखाद्यात्मक
शरीराद्युपभोक्तारमात्मानं च प्रसंख्यानपरमकाष्ठां च विना व्युत्पाद्य शक्यं वक्तुमिति तदेतत्सर्वमत्र पादे व्युत्पादनीयं इत्यत्र प्र
संगादुपयोगाच्च नानाविधचित्तप्रथमं सिद्धचित्तेषु कैवल्यभागीयं चित्तं निर्धारयितुकामः पञ्चतयीं सिद्धिमाह जन्मौषधिमन्त्रतपःसमाधि
जाः सिद्धयः व्याचष्टे देहान्तरितेति स्वर्गोपभोगभागी यात्कर्मणो मनुष्यजातीयाच्चरितात्कुतश्चिन्निमित्तात्लब्धपरिपाकात्कु
विदेवनिकायेऽजातमात्रस्येव दिव्यदेहान्तरितानां सिद्धिरणिमाद्या भवतीति ओषधिसिद्धिमाह असुरभवनेष्विति मनुष्यो हि

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः देहान्तरिता जन्मना सिद्धिः ओषधिभिरसु
रभवनेषु रसायनेनेत्येवमादि मन्त्रैराकाशगमनाणिमादिलाभः तपसा संकल्पसिद्धिः का
मरूपी यत्र तत्र कामग इत्येवमादि समाधिजाः सिद्धयो व्याख्याताः ०१ ॥

कुतश्चिन्निमित्तादसुरभ
वनमुपसंप्राप्तः कमनीयाभिरसुरकन्याभिरुपनीतं रसायनमुपयुज्याजरामरणत्वमन्यांश्च सिद्धीरासादयति इहैव वा रसाय
नोपयोगेन यथा माण्डव्यो मुनी रसोपयोगाद्विन्ध्यवासीति मन्त्रसिद्धिमाह मन्त्रैरिति तपःसिद्धिमाह तपसेति संकल्पसिद्धिमाह का
मरूपीति यद्यदेव कामयते तत्तन्निमादितः कियदस्य भवतीति यत्र कामयते श्रोतुं वा मन्तुं वा तत्र तत्रैव श्रृणोति मनुते वेति आदिशब्दद
र्शनादयः संगृहीता इति समाधिजाः सिद्धयो व्याख्याता अधस्तनेषु पादेषु अथ चैतासु सिद्धिषु औषधादिसाधनासु तेषां पिबकार्ये
द्विपाणां जात्यन्तरे परिणतिरिष्यते सा पुनर्नैतावतो यादृशं तदमात्रात् नहि तावन्मात्रमुपादानं नन्दनादिका दिव्यभावेस्य भवति नोख
लु विलक्षणं कारणं कार्यं विलक्षणाप्यालम्बानमस्माकं कस्मिकत्वं भूदित्याशंक्यापूरयितान्तेहति ० ॥

भा॰वा॰
९६ ग

तत्रकायेंद्रियाणामन्यजातीयपरिणतानांजात्यंतरपरिणामःप्रकृत्यापूरात् मनुष्यजातिपरिणतानांकायेंद्रियाणांयोदेवतिर्यग्जातिपरिणामःसखलुप्रकृत्यापूरात् कायस्यहिप्रकृतिःपृथिव्यादीनिभूतानिइंद्रियाणांचप्रकृतिरस्मितातदवयवानुप्रवेशआपूरःतस्माद्भवतिनहिधर्मादपूर्वपरिणामेति ननुयद्यापूरेणानुग्रहःकस्मात्पुनरसौनसदातनइत्यतआह धर्मादीति तदनैनतस्यैवशरीरस्यबाल्यकौमारयौवनवार्द्धकादीनिवन्यग्रोधधानायान्यग्रोधतद्भावश्चवह्निकणिकायास्तृणराशिनिवेशितायाव्याप्तो

तत्रकायेंद्रियाणामन्यजातीयपरिणतानांजात्यंतरपरिणामःप्रकृत्यापूरात्पूर्वपरिणामापायेउत्तरपरिणामोपजनस्तेषामपूर्वावयवानुप्रवेशाद्भवतिकायेंद्रियप्रकृतयश्चस्वंस्वंविकारमनुगृह्णंत्यापूरेणधर्मादिनिमित्तमपेक्षमाणाइति २ निमित्तमप्रयोजकंप्रकृतीनांवरणभेदस्तुततःक्षेत्रिकवत् नहिधर्मादिनिमित्तंतत्प्रयोजकंप्रकृतीनांभवतिनकार्येणकारणंप्रवर्त्यतइति कथंतर्हि वरणभेदस्तुततःक्षेत्रिकवत् यथाक्षेत्रिकःकेदारादपांपूर्णात्केदारांतरंपिप्लावयिषुःसमंनिम्नंनिम्नतरंवानापःपाणिनापकर्षत्यावरणंत्वासांभिनत्तितस्मिन्भिन्नेस्वयमेवापःकेदारांतरमाप्लावयंतितथाधर्मःप्रकृतीनामावरणमधर्मंभिनत्तितस्मिन्भिन्नेस्वयमेवप्रकृतयःस्वंस्वंविकारमा

भवत्न्वालासहस्रसमालिंगितगगनमंडलत्वंचव्याख्यानंप्रकृत्यापूरादित्युक्तंतत्रेदंसंदिह्यतेकिमापूरःप्रकृतीनांस्वाभाविकोधर्मादिनिमित्तोवेतिकिंप्राप्तंसतीष्वपिप्रकृतिषुकदाचिदापूरादधर्मादिनिमित्तप्रभवत्वाच्चतन्निमित्तएवेतिप्राप्तएवंप्राप्तआह निमित्तंक्षेत्रिकवत् सत्यंधर्मादयोनिमित्तंनतुप्रयोजकाःतेषामपिप्रकृतिकार्यत्वात् नचकार्यंकारणंप्रयोजयतितस्यतदधीनोत्पत्तितयाकारणपरतंत्रत्वात् स्वैतंत्र्यस्यचप्रयोजकत्वात् ० ९७

नखलुकुलालमंतरेणमृदंडचक्रसलिलादयउत्पित्सितेनोत्पत्त्रेनवाघटेनप्रयुज्यंतेकिंतुस्वतंत्रेणकुलालेनतच्चपुरुषार्थोपिप्रवर्तकः किंतुनद्दृश्येनेश्वरः उद्देश्यतामात्रेणपुरुषार्थःप्रवर्तकइत्युच्यतेउत्पित्सोस्तस्यपुरुषार्थस्याव्यक्तस्यस्थितिकारणत्वेपुक्तंनचैतावताधर्मादीनामनिमित्ततापतिबंधापनयनमात्रेणक्षेत्रिकवदुपपत्तेरीश्वरस्यापिधर्माधिष्ठानार्थप्रतिबंधापनयएवव्यापारोवेदितव्यः नदेतन्निगदव्याख्यानेनभाष्येणोक्तंप्रकृत्यापूरेणसिद्धौःसमर्थ्यसिद्धिविनिर्मितनानाकायवर्तिचित्तैक

यथावासएवक्षेत्रिकस्तस्मिन्नेवकेदारेनप्रभवत्यौदकान्भौमान्वारसान्धान्यमूलान्यनुप्रवेशयितुंकिंतर्हिमुद्गगवेधुकश्यामाकादींस्ततोपकर्षत्यपकृष्टेषुतेषुस्वयमेवरसाधान्यमूलान्यनुप्रविशंतितथाधर्मोनिवृत्तिमात्रेकारणमधर्मस्यशुद्ध्यशुद्ध्योरत्यंतविरोधात् नतुप्रकृतिप्रवृत्तौधर्मोहेतुर्भवतीति अत्रनंदीश्वरादयउदाहार्याः विपर्ययेणाप्यधर्मोधर्मंबाधतेततश्चाशुद्धिपरिणामइतितत्रापिनहुषाजगरादयउदाहार्याः यदातुयोगीबहून्कायान्निर्मिमीतेतदाकिमेकमनस्कास्तेभवंत्यथानेकमनस्काइति ३ निर्माणचित्तान्यस्मितामात्रात् ०॥ त्वनानात्वेविचारयति यदात्विति तत्रनानामनस्त्वेकायानांप्रतिविततमभिप्रायभेदादेकाभिप्रायानुरोधाभावपरस्परप्रतिसंधानंचनस्यात्तांपुरुषांतरवत् तस्मादेकमेवचित्तंप्रदीपवद्विसारितयाबहूनपिनिर्माणकायान्व्याप्नोतीतिप्राप्तआह निर्माणचित्तान्यस्मितामात्रात् ०॥

पद्याकर्त्रीवब्लु ... सर्वमेकैकास्याधारणचितान्वितं दृष्टं तथा यथा चैत्रमैत्रादिशरीरं तथा च निर्माणकायादृत्ति सिद्धं तेषामप्यधाति
स्विर्कमनइत्यभिप्रायेणाह अस्मितामात्रमितियद्युक्तमनेकचित्तत्वेएकाभिप्रायानुरोधस्वप्रतिसंधानंच नस्यातामितितत्रोत्तरं सूत्रं
प्रवृत्तिभेदेप्रयोजकं चित्तमेकमनेकेषां अयमभिप्रायः देवदत्तोयद्विचित्तमेकं नानाकायवर्तिमनोनायकं नतिरमास्यतत्रिर्माणेत्वदोषः
नचैकं गृहीत्वाकृतं प्रीतिस्त्विकं मनोभिः कृतं वा नायकनिर्माणेन तिनस्यैवमनसोनायकत्वादिति वाच्यं प्रमाणसिद्धस्वनियोग
वर्यनुयोगानुपपत्तेरिति अत्रपुराणं भवति एकस्तुप्रभुशक्त्यावैबहुधाभवतीश्वरः भूत्वायस्मात्यस्मात्तुबहुधाभवत्येकः पुनस्तुसः
तस्माच्चमनसोभेदाजायन्तेचैतएवहि एकधासद्विधाचैवत्रिधाचबहुधापुनः योगीश्वरः शरीराणिकरोतिविकरोतिचप्राम्

अस्मितामात्रंचित्तकारणमुपादायनिर्माणचित्तानिकरोतिततःसचित्तानिभवंति ४ प्र
वृत्तिभेदेप्रयोजकंचित्तमेकमनेकेषाम् बहूनांचित्तानांकथमेकचित्ताभिप्रायपुरःस
रप्रवृत्तिरितिसर्वचित्तानांप्रयोजकंचित्तमेकंनिर्मिमीतेततःप्रवृत्तिभेदः ५ तत्रध्या
नजमनाशयं पंचविधंनिर्माणचित्तंजन्मौषधिमंत्रतपःसमाधिजाःसिद्धयइति तत्रयदे
वध्यानजंचित्तंतदेवानाशयंतस्यैवनास्त्याशयोरागादिप्रवृत्तिर्नातःपुण्यपापाभिसंबं
धःक्षीणक्लेशत्वाद्योगिनइति इतरेषांतुविद्यतेकर्माशयोयतः यादृशेयान्केचित्सिद्धयंतस्य

प्रवरेतुसंहरेत्पुनस्तानिसूर्योरश्मिगणानिवेति तद्देतेनाभिप्रायेणाहबहूनांचित्तानामिति तदेवमुदितेषुपंचसुसिद्धचित्तेषु
अपवर्गभागीयंचित्तंनिर्धारयतितत्रध्यानजमनाशयं आशेरतइत्याशयाः कर्मवासनाःक्लेशवासनाश्चतएतेनविद्यंतेया
स्मिन्तदनाशयंचित्तमपवर्गभागीयंभवतीत्यर्थः यतोरागादिनिबंधनाप्रवृत्तिर्नास्ति अतोनास्तिपुण्यपापाभिःकस्मात्पुनरा ९७
रागादिजनिताप्रवृत्तिर्नास्तीत्यतआह क्षीणक्लेशत्वादिति ध्यानजस्यानाशयस्यभेदांतरेभ्योविशेषंदर्शयितुमितरेषामाशय
नामाह इतरेषांत्विति तत्रैवचहेतुपरंसूत्रमवतारयति यतइति ९७

कर्माशुक्लाकृष्णमितरेषाम् आशयवतामाह इतरेषांयदंस्थाने चतुष्पुसम्भवेता चतुष्पदायदपावद्बहिःसाधनसाध्यंतत्रसर्वेचास्तिकस्य
चित्पीडानहिव्रीह्यादिसाधनेऽपिकर्मणिपरपीडानास्ति अवघातादिसमयेपिपीलिकादिवधसंभवात् अंततोव्रीह्यादिवधेनतंवा
दिभेदोत्पत्तिप्रतिबंधात् अनुग्रहश्चदक्षिणादिनाब्राह्मणादेरिति शुक्लातपःस्वाध्यायध्यानवतामसंन्यासिनांशुक्लत्वमुपपाद
यति साहीति अशुक्लाकृष्णासंन्यासिनांसंन्यासिनोदर्शयति क्षीणेतिकर्मसंन्यासिनोहितत्कृचिद्बहिःसाधनसाध्येकर्मणिप्रवृत्ता
इतितचैवामस्तिकृष्णःकर्माशयःयोगानुष्ठानसाध्यस्यकर्माशयफलस्येश्वरेसमर्पणात्रशुक्लःकर्माशयःनिरत्ययफलोहिशुक्ल

कर्माशुक्लाकृष्णंयोगिनस्त्रिविधमितरेषां चतुष्पात्खल्वियंकर्मजातिःकृष्णाशुक्लकृ
ष्णाशुक्लाशुक्लाकृष्णाचेतितत्रकृष्णादुरात्मनांशुक्लकृष्णाबहिःसाधनसाध्यातत्र
परपीडानुग्रहद्वारेणकर्माशयप्रचयः शुक्लातपःस्वाध्यायध्यानवतांसाहिकेवले
मनस्यायत्तत्वादबहिःसाधनाधीनानपराननुपीडयित्वाभवति अशुक्लाकृष्णासं
न्यासिनांक्षीणक्लेशानांचरमदेहानामिति तत्राशुक्लंयोगिनएवफलसंन्यासादकृष्णं
चानुपादानात् इतरेषांतुभूतानांपूर्वमेवत्रिविधमिति ७ ततस्तद्विपाकानुगुणानामेव
वाभिव्यक्तिर्वासनानाम् ततइतित्रिविधात्कर्मणः तद्विपाकानुगुणानामेवेतियज्जाती

उच्यतेयस्यफलमेवनास्तिकुतस्तस्यनिरत्ययफलंइत्यर्थः तदेवंचतुष्टयीकर्मजातिमभिधायकतमाकस्येत्यवधारयति तत्राशुक्लमिति
कर्माशयंविविच्यक्लेशाशयगतिमाह ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानां यज्जातीयस्यपुण्यजातीयस्यापुण्य
जातीयस्यवाकर्मणोविपाकोदिव्योवानारकोवातज्जात्यानुगुण्यमनुशेरतेविपाकस्यानुगुणाः

तत एवाह या वासनाः कर्मविपाकमनुशेरते अनुकुर्वन्तीति दिव्यभोगजनितान्हि दिव्यकर्मविपाकानुगुणा वासना वा न हि मनुष्यभोगवासनाभि व्यक्तो दिव्यकर्मफलोपभोगः संभवः तस्मात्स्वविपाकानुगुणा एव वासनाः कर्मभिर्व्यंजनीया इति भाष्यार्थः स्यादेतत् मनुष्यस्य प्राय णानंतरमधिगतमार्जारभावस्यानंतरं तेषां मनुष्यवासनायाः एवाभिव्यक्त्या भवितव्यं न त्वव्यवहितसंभवोपदर्शनं तदहर्दिवसानुभूतं स्मर्यते व्यवहितं तद्दिवसानुभूतं च स्मर्यत इत्यत आह जातिदेशकालत्वात् भवतु वृषदंशवासनायाः जात्यादिव्यवहितायास्तस्याः फ लतः आनंतर्यं वृषदंशविपाकेन कर्मणा तस्या एव स्वविपाकानुगुणाया अभिव्यक्तेः तत्स्मरणसमुत्पादादित्याह वृषदंशविपाकोदय इ

या वासनाः कर्मविपाकमनुशेरते तासामेवाभिव्यक्तिः न हि दैवं कर्म विपच्यमानं नारकति र्यङ्मनुष्यवासनाभिव्यक्तिनिमित्तं भवति किं तु दैवानुगुणा एवास्य वासना व्यज्यंते नार कतिर्यङ्मनुष्येषु चैवं समानश्चर्चः ८ जातिदेशकालव्यवहितानामप्यानंतर्यं स्मृति संस्कारयोरेकरूपत्वात् वृषदंशविपाकोदयः स्वव्यंजकांजनाभिव्यक्तः स यदि जातिश तेन वा दूरदेशतया वा कल्पशतेन वा व्यवहितः पुनश्च स्वव्यंजकांजन एवोदियाद्द्रागि त्येवं पूर्वानुभूतवृषदंशविपाकाभिसंस्कृता वासना उपादाय व्यज्येत कस्मात् यतो व्यव हितानामप्यासां सदृशं कर्माभिव्यंजकं निमित्तीभूतमित्यानंतर्यमेव कुतश्च स्मृतिसंस्का

ति उदेत्यस्मादित्युदयः कर्माशयः पुनश्च स्वव्यंजकांजन एवोदियात् अभिव्यज्येत विपाकार्थं आभिमुख्यं क्रियत इत्यर्थः अभि संस्कारः क्रिया उपादाय गृहीत्वा व्यज्येत यद्वि व्यज्येत स्वविपाकानुगुणा एव वासना गृहीत्वा व्यज्येतेत्यर्थः आनंतर्यमेव फलतः कारणद्वारकमुपपादकार्यद्वारकमुपपादयति कुतश्च स्मृतीति एकरूपत्वं यथा सादृश्यं तदेवाह यथेति ९ ०॥ ९८

ननु अनुभवसरूपाश्चेत्संस्कारास्तथा सत्यनुभवाविशेषात्सर्वदैवेत्यतो विविशेषप्रभवः कथं चिरभाविनोऽनुभवात्पक्लप्तेरित्यत आह ते च कर्मवासनानुरूपाः यथा पूर्वस्थापि लाक्षणिककर्मनिमित्तमपि एवं क्षणिकानुभवनिमित्तोऽपि संस्कारः स्यात् स्वीकिं चिन्हेदाधिष्ठानं च सादृश्यं अन्यथा अभेदेऽनत्वे नमाद्दृश्यानुपपत्तेरित्यर्थः सुगममन्यत् स्यादेतत् व्यज्येरन् पूर्वपूर्वतरजन्मभिः संस्कृता वासना एवं दि वं पूर्वतरजन्मसद्भावे प्रमाणं त्वानादेवतु नास्ति न च जातमात्रस्य जंतोर्हर्षशोकदर्शनमात्रं प्रमाणं भवितुमर्हतीति पद्मादिसंकोचविका सवत्स्वाभाविकत्वेनाप्युपपत्तेरित्यत आह तासामनादित्वं चाशिषो नित्यत्वात् तासां वासनानामनादित्वं च न केवलमानंत

ते च कर्मवासनानुरूपाः यथा च वासनास्तथा स्मृतिरिति जातिदेशकालव्यवहितेभ्यः संस्कारेभ्यः स्मृतिः स्मृतेश्च पुनः संस्कारा इत्येते स्मृतिसंस्काराः कर्माशयवृत्तिलाभवशाद्व्यज्यंते अतश्च व्यवहितानामपि निमित्तनैमित्तिकभावानुच्छेदादानंतर्यमेव सि द्धमिति ९ तासामनादित्वं चाशिषो नित्यत्वात् तासां वासनानामाशिषो नित्यत्वादना दित्वं येयमात्माशीर्मा न भूवं भूयासमिति सर्वस्य दृश्यते सा न स्वाभाविकी कस्मात् जातमा त्रस्याननुभूतमरणधर्मकस्य द्वेषदुःखानुस्मृतिनिमित्तो मरणत्रासः कथं भवेत् ० ॥

र्यमिति चार्थः आशिषो नित्यत्वात् आत्माशिषो वासनानामनादित्वं नित्यत्वाव्यभिचारादिति न तु स्वाभाविकत्वेनाप्युपपत्तेरसिद्ध माशिषो नित्यत्वमित्यत आह येयमिति नास्ति कः कुत इति कस्मात् इतरं जातमात्रस्य तं तोदिते अतः पर्वेति तस्मिं जन्मन्यननुभूतमर णधर्मकस्य मरणमेव धर्मः सोऽननुभूतो येन सत्तथोक्तस्य मातुरंकात्स्खलतः कंपमानस्याग्निमंत्यक्राद्दिलांछितं तद्दूरः स्तनमतिगाढं वा लिंगाह भवतं वा जातस्य बालकस्य कंपभेदानुमितात् द्वेषानुवक्ते दुःखपास्मृतिस्तन्निमित्तो मरणत्रासः कथं भवेदि १०

ननूक्तं स्वभावादित्यत आह न च स्वाभाविकं वस्तुनिमित्तमुपादत्तेन ह्यातिशयोत्पत्तौ पूर्वकर्म भवति बालस्येदं शोकादृश्यमानः कंपो भय
निबंधनः ईदृशकंपत्वात् अस्मदादिकंपवत् बालकभयं दुःखस्मृति निमित्तं भयत्वात् अस्मदादिभयवत् आगामिप्रत्य
वायो नेद्रियाल दृणं च भयं न दुःखस्मृतिमात्रामेनुभवति अपितु यतो विभेमि तस्य प्रत्यवायहेतुभावमनुमायसंप्रत्यपि प्रत्यवायभ
यं च विदध्यादिति शंकते तस्माद्घज्जातीयादनुभूतचरात् दुःखानुबंधं दुःखमुपयादिनं तस्य स्मरणात् तज्जातीयस्यानुभूयमान
स्य तत् दुःखहेतुत्वमनुमायततो विभेति न च बालकेनास्मिन् जन्मनि स खल नस्यान्य दुःखहेतुत्वमवगतं न च नादृशं दुःखमु
पलब्धं तस्मात्प्राग्भवीयोनुभवःपरिशिष्यते तच्चैतदेवं प्रयोगमारोहति जातमात्रस्य बालस्य स्मृतिः पूर्वानुभवनिबन्धना स्मृतित्वा

न च स्वाभाविकं वस्तु निमित्तमुपादत्ते तस्मादनादिवासनानुविद्धमिदं चित्तं निमित्तवशात्का
श्चिदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपावर्तत इति घटप्रासादप्रदीपकल्पम् ११

न अस्मदादिस्मृतिवदिति न च संकोचविकासाव पि स्वाभाविकौ न हि स्वाभाविकं कारणांतरमपेक्षते वन्हेरौष्ण्यं प्रत्यपि कारणांतरा
पेक्षाप्रसंगात् तस्मादंशुमरीचिकरसंपर्कमात्रमेव कमलिनीविकासकारणं संकोचकारणं च संस्कारः स्थितिस्थापक इति
एवं स्थितादनुमितं हर्षादयो विप्रा विभवे हेतवो वेदितव्याः तदास्तां तावत्प्रकृतमुपसंहरति तस्मादिति निमित्तलब्धविपाकका
लं कमप्रतिलंभो भिव्यक्तिः प्रसंगतश्चित्तपरिमाणविप्रतिपत्तिं निराचिकीर्षुर्विप्रतिपत्तिमाह घटप्रासादेति देहप्रदेशवर्तिकार्यदर्श
नात् देहाद्बहिः सद्भावे चित्तस्य न प्रमाणमस्ति न चैतदणुपरिमाणं दीर्घशष्कुलीभक्षणादावपर्यायेण ज्ञानयं च कानुत्पादप्रसं
गात् न चाननुभूयमानक्रमकल्पनायां प्रमाणमस्ति न चैकमणुमनो नादेशैरिन्द्रियैरपर्यायेण संबद्धुमर्हतीति तत्त्वादिशेषव्याप्त्या काय ११
परिमाणं चित्तं घटप्रासादवर्तिप्रदीपवत्

संकोचविकासौ पुत्तिकाह ह्यदेहवर्तिस्योत्पत्त्येव शरीरपरिमाणमेवाकारः परिमाणं यस्येति अपरे प्रतिपन्नाः नन्वेवं कथमस्य दृष्टेः बीजसं
योगः न खल्वेतदनाश्रयं पंमत शरीरीत्यानां पितृदेहवर्तिनी लोहितरेतसी प्राप्नोति पक्वजेत्वात् नहि स्याण्वादिष्वगच्छत्सु छायागच्छति न
चागच्छति घटेतदाश्रयं चित्तं गच्छतितथा च न संसारः स्यादित्यत आह तथा चांतराभावः अतएव संसारश्च युक्त इति तथा च शरीरप
रिमाणत्वे देहांतरप्राप्त्ये पूर्वदेहत्यागश्च देहांतरप्राप्तिश्चांतरास्याति वाहिकशरीरसंयोगाद्भवतः ते न खल्वपदेहांतरसंचरेत् तथा
वयुपणं अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति सोयमंतराभावः अतएव संसारश्च युक्त इति तदेतदप्यमाणःस्वमतमाह वृत्तिरे
वास्य विभुनश्चित्तस्य संकोचविकासिनीत्याचार्यः स्वयंभूः प्रतिपेदे इदमत्राकूतं यद्यनाश्रयं चित्तं न देहांतरसंचारिक्षमं तदातिवा
हिकमाश्रयते तथापि देहांतरकल्पनायामनवस्थान चास्य देहान्निष्कर्षमातिवाहिकस्य संभवति निष्कृष्टस्य चेतसस्तत्संबंधा

संकोचविकासि चित्तं शरीरपरिमाणाकारमात्रमित्यपरे प्रतिपन्नास्तथा चांतराभा
वः संसारश्च युक्त इति ० ॥ नन्वस्तु तर्हि सूक्ष्मशरीरमेवास्य गोष्ठाश्च मदाप्रलयात्रियं तं चितानामधिष्ठानं वार
कौशिकशरीरमध्यवर्तितेन हि चित्तमासत्यलोकादावाचीवेल तत्र तत्र शरीरे संचरतिनिष्कर्षश्चास्यापपत्रश्चाकौशिकात्काया
न त्रहि तदंतराभावस्तस्य नियतत्वात् न चास्यातिसद्भावे प्रमाणमस्ति न खल्वेतदध्यक्षगोचरः न च संसारो सानुमानं आचार्य
मते नाप्युपपत्तेः आगमस्तु पुरुषस्य निष्कर्षमाह न च चित्तं वा सूक्ष्मशरीरं वा पुरुषः किंतु चितिशक्तिरप्रतिसंक्रमा न चास्याः नि
ष्कर्षः संभवतीत्यौपचारिको व्याख्येयः तथा च चित्तेः चित्तस्य च तत्र तत्र वृत्त्यभाव एव निष्कर्षार्थः एवं चस्मृतीतिहासपुराणेषु
मरणेनांतरं प्रेतशरीरप्राप्तिः तद्धिमोक्षस्य पिंडीकरणादिभिरयुक्तं तदनुजानीमः आतिवाहिकं त्वतस्यतम् व्यामहे तत्र
वाम्नास्ति कश्चिदागमः लब्धशरीर एव यमपुरुषैः प्रियायामवद्धो नीयेत न त्वातिवाहिकशरीरः तस्मादहंकारिकत्वाच्चेतसः अहंका
रस्य च गगनमंडलवत् त्रैलोक्यव्यापित्वाद्विभुत्वं मतम्: ० ॥

एवंवेदस्यवृत्तिरपिविभ्वीतिसर्वसन्तापनिरित्यतउक्तंवृत्तिरेवास्येति स्यादेतत् ननु चित्तमात्राधीनायां वृत्तेः संकोचविकासौ कुतः कादा-
चित्कावित्यत आह तच्चवृत्तयो धर्माद्यपेक्षं वृत्तौ निमित्तं विभजते निमित्तं चेति आदिग्रहणेनेन्द्रियधनादयोगृह्यन्ते श्रद्धादीन्य-
पिवीर्यस्मृत्यादयोगृह्यन्ते आन्तरत्वेसंमतिमाचार्याणामाह तथा चोक्तं विहारो व्यापारः प्रकृष्टत्वमुक्तं तयोर्बाह्याभ्यान्तरयोर्मध्ये ज्ञा-
नवैराग्येण ज्ञानितो धर्मः केनवाह्यसाध्येनेमेणातिशय्येते अभिभूयेते ज्ञानवैराग्यजो वेदधर्मो तमभिभवतः बीजभावाद्यतत्यतन्द्र

वृत्तिरेवास्यविभुनः संकोचविकासिनीत्याचार्यः तच्चधर्मादिनिमित्तापेक्षं निमित्तं चद्वि
विधं बाह्यमाध्यात्मिकं च शरीरादिसाधनापेक्षं बाह्यं स्तुतिदानाभिवादनादि चित्तमा
त्राधीनं श्रद्धाद्याध्यात्मिकं तथा चोक्तं ये चैते मैत्र्यादयो ध्यायिनां विहारास्ते बाह्यसाध
ननिरनुग्रहात्मानः प्रकृष्टं धर्ममभिनिर्वर्तयन्ति तयोर्मानसं बलीयः कथं ज्ञानवैराग्ये
केनातिशय्येते दंडकारण्यं च चित्तबलव्यतिरेकेण कः शारीरेण कर्मणा शून्यं कर्तुमु
त्सहेत समुद्रमगस्त्यवद्वा पिबेत् १० हेतुफलाश्रयालंबनैः संगृहीतत्वादेषामभावे
तदभावः हेतुर्धर्मात्सुखमधर्माद्दुःखं सुखाद्रागो दुःखाद्द्वेषस्ततश्च प्रयत्नस्तेन मन
सा वाचा कायेन वा परिस्पंदमानः ०॥ स्यर्थं अत्रैव सुप्रसिद्धमुदाहरणमाह दंडकारण्येति अर्थे नाप्य-
नवृत्तयो वासनाप्यश्च अनादयस्तत्केषामासामुच्छेदो न खलु चितिप्राप्तिरनादिरुच्छिद्यत इत्यत आह हेतुफलाभावः अनादेरपि १००
समुच्छेदो दृष्टः तद्यथा प्रागभावस्य नागतत्वस्येति सव्यभिचारत्वादसाधनं चितिप्राप्तिस्तु विनाशकारणाभावान्न विनश्यतीति त्वना-
नूक्तं च वासनानामनादीनामपि समुच्छेदकारणं सूत्रेणेति ०॥

तथाव्यक्तैरपि समनुगतैरस्तीति ०॥

अनुग्रहोपघातावपिधर्माधर्मादिनिमित्तमुपलक्षयतः तेन सुखदुःखाद्योऽपि संगृहीता भवंति नेत्री नायिका अत्रैव हेतुमाह मूल-
मिति प्रत्युत्पन्नता वर्तमानता ननु धर्मस्वरूपोत्पादः अत्रैव हेतुर्न हीति यदभिमुखीभूतं वस्तु कामिनीसंपर्कादि व्यापकाभावे
व्याप्यस्याभाव इति सूत्रार्थः उत्तरसूत्रमवतारयितुं शंकते नास्तीति असत इति तु संख्यातावान्तनिदर्शनाय वा अतीता धर्माणां
नासतामुत्पादो न सतां विनाशः किं तु सतामेव धर्माणामध्वभेदय वोदय व्ययाविति सूत्रार्थः अद्धिरेति अनुभूतामाप्ता योऽनव्य-

परमनुगृह्णात्युपहन्ति वा ततः पुनर्धर्माधर्मौ सुखदुःखे रागद्वेषाविति प्रवृत्तमिदं षडं
रसंसारचक्रमस्य च प्रतिक्षणमावर्तमानस्याविद्या नेत्री मूलं सर्वक्लेशानामित्येष हेतुः
फलं तु यमाश्रित्य यस्य प्रत्युत्पन्नता धर्मादेः न ह्यपूर्वोपजनः मनस्तु साधिकारमाश्र
यो वासनानां न ह्यवसिताधिकारे मनसि निराश्रया वासनाः स्थातुमुत्सहंते यदभिमुखी
भूतं वस्तु यां वासनां व्यनक्ति तस्यास्तदालंबनमेवं हेतुफलाश्रयालंबनैरेतैः संगृही
ताः सनाः एषामभावे तत्संश्रयाणामपि वासनानामभावः नास्त्यसतः संभवो न चा
स्ति सतो विनाश इति द्रव्यत्वेन संभवंत्यः कथं निवर्तिष्यंते वासना इति ११ अती
तानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणां भविष्यद्व्यक्तिकमनागतं अनुभूतव्यक्ति
कमतीतं स्वव्यापारोपारूढं वर्तमानं त्रयं चैतद्वस्तु ज्ञानस्य ज्ञेयं यदि चैतत्स्वरूपतो ना
भविष्यन्नेदं निर्विषयं ज्ञानमुदपत्स्यत तस्मादतीतानागतं स्वरूपतोऽस्तीति ०॥
किल तथा संप्रतिव्यक्ति नास्तीति यावत् तत्त्वत्रैकाल्येऽपि धर्मः सन्नित्याह यदि चेति न ह्यसत् ज्ञानविषयः संभवतीति नि-
रूपाख्यत्वात् विषयावभासं हि विज्ञानं नाहत्तिविषये भवति त्रैकाल्यविषयं च विज्ञानं योगिनां अस्मदादीनां च विज्ञानम-

सतिविषयभेदेनास्य ज्ञानं स्यात् उभयथैव तस्मादतीतानागते

एवमनुभवस्मृत्यानं विषयसत्त्वे हेतुहर्तुं उद्देश्यत्वादप्यनागतस्य विषयत्वेन सत्त्वमेवेत्याह किंच भोगभागीयस्येति कुशलो विनियु
णः अनुतिष्ठेयं चिचय घट्टन्निमित्तं तत्सर्वं नैमित्तिके सत्येव विशेषमाधत्ते यथा कांडलाववेदाध्यापादयः नत्वलब्धात्मकांडलावाद
योऽसंतमूलत्वादयं निःसत्त एवं तु तस्यामितिकारिकर्षवेति एवं कालात्वादयोपि सत एव छेदस्य वर्तमानभाव हेतवइत्याह सतश्चेति
यद्दितु वर्तमानत्वाभावादतीतानागतयोरस्वत्वं हंत भोः वर्तमानस्याप्यभाव अतीतानागतत्वाभावानुस्वार्थ विशिष्टतयानुसंत्वंत्र

किंच भोगभागीयस्य वापवर्गभागीयस्य वा कर्मणः फलमुत्पित्सु यदि निरूपाख्यमि(
ति तदुद्देशेन तेन निमित्तेन कुशलानुष्ठानं न युज्येत सतश्च फलस्य निमित्तं वर्तमानी
करणे समर्थं नापूर्वोपजनने सिद्धं निमित्तं नैमित्तिकस्य विशेषानुग्रहणं कुरुते नापू
र्वमुत्पादयति धर्मी चानेकधर्मस्वभावस्तस्य चाध्वभेदेन धर्माः प्रत्यवस्थिताः न
च यथा वर्तमानं व्यक्तिविशेषापन्नं द्रव्यतोस्त्येवमतीतमनागतं च कथं तर्हि स्वेनैव
व्यंग्येन स्वरूपेणानागतमस्ति स्वेन चानुभूतव्यक्तिकेन स्वरूपेणातीतमिति वर्तमा
नस्यैवाध्वनः स्वरूपव्यक्तिरिति न सा भवत्यतीतानागतयोरध्वनोरेकस्य चाध्व(
नः समये द्वावध्वानौ धर्मिसमन्वागतौ भवत एवेति नाभूत्वा भावस्त्रयाणामध्वनामि

याणमन्यविशिष्टमित्यभिप्रायेणाह धर्मी चेति प्रत्येकमवस्थानं प्रत्यवस्थितिरिति द्रव्यतइति द्रव्ये धर्मिणि सार्वविभक्ति १०१
कस्तसिः यद्यतीतानागतावतीतानागतत्वेन स्तः तर्हि वर्तमानसमयेतत्वाभावात्त्रयाणामित्यत आह एकस्य चेति प्रकृतमुप
संहरति नाभूत्वा भावइति १२॥

स्यादेतन्नु अयं तु नानाप्रकारो धर्मिधर्मावस्थापरिणामरूपो विश्वभेदप्रपंचो न प्रधानादेकस्मादुद्भवितुमर्हति न ह्यविलक्षणात्कार
णात्कार्यभेदः संभवइत्यत आह ते तः ते त्र्यध्वानो धर्मा व्यक्ताश्च सूक्ष्माश्च गुणात्मानो न त्रैगुण्यातिरिक्तमेषामस्ति कारणं वैचि
त्र्यं तु तदाहिताऽनादिक्लेशवासनानुगतादृष्टविस्यानुप योर्कवापुपुरातेवैश्वरूप्यात्प्रधानस्य परिणामोपपद्यतइति व्यक्तात्मान(
षि व्याद्यीनामेकादशेंद्रियाणां च वर्तमानानामतीतानागतत्वं षड्विशेषा यथायोगं भवंति संप्रतिविश्वस्यविद्यानित्यरूपे(
विभजन्तु नित्यरूपमाह सर्वमिदमिति दृश्यमोतं संनिवेशः संस्थानभेदवानुपरिणामइत्यर्थः अत्रैव षष्टितंत्रशास्त्रस्यानुशि

ते व्यक्तसूक्ष्मा गुणात्मानः ते खल्वमी त्र्यध्वानो धर्मा वर्तमाना व्यक्तात्मानोतीतानागताः
सूक्ष्मात्मानः षडविशेषरूपाः सर्वमिदं गुणानां संनिवेशविशेषमात्रमिति परमार्थ
तो गुणात्मानः तथा च शास्त्रानुशासनं गुणानां परमं रूपं न दृष्टिपथमृच्छति यत्तु दृष्टिपथं प्राप्तं
तन्मायेव सुतुच्छकमिति यदा तु सर्वे गुणाः कथमेकः शब्द एकमिंद्रियमिति १३ परि
णामैकत्वाद्वस्तुतत्त्वम् प्रख्याक्रियास्थितिशीलानां गुणानां ग्रहणात्मकानां कर(
णभावेनैकः परिणामः श्रोत्रमिंद्रियं ग्राह्यात्मकानां शब्दभावेनैकः परिणामः शब्दो

ष्टिः मायेव तु न माया सुतुच्छकं विनाशि यथा हि माया क्षणेऽन्यथा भवति एवं विकारा अप्याविर्भावतिरोभावधर्माणः प्रतिक्ष
णमन्यथा प्रकृतिर्नित्य तया मायाविधर्मिण परमार्थेति भवतु त्रैगुण्यस्यं त्र्यंपरिणामवैचित्र्यं एकस्तु परिणामः पृथिवीयमिति
वातोयमिति वा कुतः त्यात्मन एकत्वविरोधाद्धि त्याशंक्य सूत्रमवतारयति यदा तु सर्वे गुणा इति परिणामत्वं बहूनामप्येकः
परिणामो दृष्टः तद्यथा गवाश्वमहिषा मातंगा नौरुमानि त्रिशिनामेकोलवणत्वजातीयलक्षणः परिणामः कृतैलानला
नां च प्रदीपइति ०॥

एवं वद्भिर्विगुणानां परिणामैकत्वं तत्तत्तन्मात्रभूतभौतिकानां प्रत्येकं तत्त्वमेकत्वं ग्रहणात्मकानां सत्त्वैकगुणत्वप्रधानतया प्रका-
शात्मनामहंकारवान्तरकार्याणां करणभावेनैकः परिणामः श्रोत्रमिन्द्रियं तेषामेव गुणानां तमःप्रधानतया जडत्वेन ग्राह्यात्मकानां
शब्दतन्मात्रभावेनैकः परिणामः शब्दो विषयः शब्द इति शब्दतन्मात्रविषय इति जडत्वमाह ननु तन्मात्रस्य श्रोत्रविषयत्वं संभव
इति शेषं सुगमम् अथ विज्ञानवादिनं वैनाशिकमुत्थापयति नास्त्यर्थो विज्ञानविसहचर इति यदि हि भूतभौतिकानि विज्ञान
मात्राद्भिन्नानि भवेयुस्तत इत्यनिकारणमीदृशं प्रधानं कल्प्येत न तु तानि विज्ञानातिरिक्तानि सन्ति परमार्थतः तत्कथं प्रधानकार-

**शब्दादीनां मूर्तिसमानजातीयानामेकः परिणामः पृथिवीपरमाणुस्तन्मात्रावयवस्तेषां
चैकः परिणामः पृथिवी गौर्वृक्षः पर्वत इत्येवमादिः भूतान्तरेष्वपि स्नेहौष्ण्यप्रणामि-
त्वावकाशदानान्युपादाय सामान्यमेकविकारारंभः समाधेयः नास्त्यर्थो विज्ञानविस
हचरो स्ति तु ज्ञानमर्थविसहचरं स्वप्नादौ कल्पितमित्यनया दिशा ये वस्तुस्वरूपमपह्नु
वते ज्ञानपरिकल्पनामात्रं वस्तु स्वप्नविषयोपमं न परमार्थतोऽस्तीति य आहुः ० ॥**

ल्पनेत्यर्थं च ग्रहणानामिन्द्रियाणामहंकारविकाराणां कल्पनेति तथा हि तदस्यार्थस्य स्वरूपप्रकाशान्न ह्यस्यार्थो विज्ञानवि-
सहचरः साहचर्यं संबन्धः तदभावो विसहचरः विरहो वर्यः विज्ञानासंबन्धी नास्तीति व्यवहारयोग्य इत्यर्थः अस्ति तु ज्ञा-
नमर्थविसहचरं तस्य स्वयंप्रकाशकत्वेन स्वगोचरास्ति तां व्यवहारे कर्तव्ये जडमर्थं प्रत्यपेक्षाभावात् तदनेन वेद्यत्वसहोप-
लम्भनियमात् सूचितो विज्ञानवादिनां चैवं प्रयोगमारोहतः यद्वेद्यते येन वेदनेन तत्ततो न भिद्यते यथा ज्ञानस्यात्मा वेद्यते च
भूतभौतिकानीति विरुद्धव्याप्तोपलब्धिः निषेध्यभेदविरुद्धेनाभेदेन व्याप्तं वेद्यमानत्वं व्यापकमभेदमुपस्थापयत् तद्विरुद्धं
भेदं प्रतिक्षिपतीति १०२

तथा पद्येन नियतसहोपलंभं ततो नाभिद्यते यथैकस्माच्चंद्राद् द्वितीयश्चन्द्रः नियतसहोपलम्भश्चार्थो ज्ञानेनेति व्यापकविरुद्धोपलब्धिः नि-
षेध्यभेदव्यापकानियमविरुद्धो नियमोऽनियमं निवर्तयंस्तद्व्याप्तं भेदं प्रतिक्षिपतीति स्यादेतत् यद्यर्थो ज्ञानादभिन्नो ज्ञानानां कथं भिन्नवत्प्रतिभास-
नमित्यत आह कल्पितमिति यथाहुर्वैनाशिकाः सहोपलम्भनियमादभेदो नीलतद्धियोः भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय इति
कल्पितत्वं विशदयति ज्ञानपरिकल्पनेति निराकरोति नैतदिति तेन कथं यद्यत्र वचनाः स्युरिति संबन्धः प्रति ज्ञानमुपस्थितं प्रत्युपस्थितं कथं
तथेति यथा यथावभासते ग्राह्यग्राहकाकारस्वरूपत्वेन तथा तथा स्वयमुपस्थितं न तु कल्पनोपकल्पितं विज्ञानविषयतया ग्राह्यं स्वमाहात्म्येनेति

ते तथेति प्रत्युपस्थितमिदं स्वमाहात्म्येन वस्तु कथमप्रमाणात्मकेन विकल्पज्ञान-

कारणत्वं विज्ञानं प्रत्यर्थस्य दर्शयति यस्मादर्थेन स्वकीयया ग्राह्यशक्त्या विज्ञानमजनि तस्मादर्थस्य ग्राहकं तदेवं भूतं वस्तु कथमप्रमा-
णात्मकेन विकल्पवितानबलेन विकल्पस्याप्रामाणिकत्वात् तद्बलस्थापितस्तात्मनोऽप्रमाणात्मकत्वं तेन वस्तुस्वरूपमुत्सृज्योपल-
तं कृत्वाऽपह्नुवतेति कचित्पाठः तत्रापि सएवार्थः तदेवापलपन्तः श्रद्धातव्यवचनाः स्युरिति इदमत्राकूतं सहोपलम्भनियमश्चावेद्य-
त्वं च हेतू संदिग्धव्यतिरेकतया नैकान्तिकौ ० ॥

भा-वा-
१०३

तथाहि ज्ञानाकारस्य भूतभौतिकादेर्वेदनात् बाह्यत्वं स्थूलत्वं चभासेतेनतते ज्ञाने संभवतः तथाहि नानादेशव्यापितास्थौल्यं विच्छिन्नदेशताच
बाह्यत्वं न चैकविज्ञानस्य नानादेशव्यापिता विच्छिन्नदेशता चोपपद्यते न द्वेशान्वात द्वेशान्वलक्षणविरुद्धधर्मसंसर्गस्यैकत्रासंभवात् संभवे
वात्रैलोक्यास्यैकत्वप्रसंगात् अतएवास्तु विज्ञानभेद इति चेत् हंतभोः परमसूक्ष्मगोचराणां प्रत्ययानां परस्परवार्तानभिज्ञानां स्वगोचर
मात्रजागरूकाणां कुतस्त्योयं स्थूलावभासः न च विकल्पगोचरोभिलापः संसर्गाभावात् न च स्थूलमालोचितं यत्तज्जुपाधिकस्य विश
दताभवेत् तस्य वाविनः न चाविकल्पवत् विकल्पोपि स्वाकारमात्रगोचरः तस्य चास्थूलत्वात् न स्थूलगोचरोभवितुमर्हति तस्माद्बाह्ये

ह्लेन वस्तुस्वरूपमुत्सृज्य तदेवापलपंतः श्रद्धेयवचनाःस्युः ३ च प्रत्ययेस्थूलस्य बाह्यस्य चासंभवा

दलीकमेतद्व्याख्यातव्यं न चालीकं विज्ञानादभिन्नं विज्ञानस्य तद्वत्तुच्छत्वप्रसंगात् तथा च वेद्यत्वस्याभेदव्याप्यत्वाभावात् कुतो भेदप्र
तिपक्षत्वं सहोपलंभनियमश्च सतोरेव विज्ञानस्थौल्ययोः सतोरपिस्वभावाद्वा कुतश्चित्प्रतिबंधाद्वोपपद्यते तस्माद नेकांतिकत्वा
देतौ हेत्वाभासौ विकल्पमात्रमेव बाह्याभावे प्रस्तुताने न च प्रत्यक्षमाहात्म्यं विकल्पमात्रेणापोद्यते तस्मात्स्थैर्यसाधूक्तं
कथमप्रमाणात्मकेन विकल्पज्ञानबलेनेति एतेन प्रत्ययत्वमपि स्वप्नादिप्रत्ययदृष्टांतेन विरालंबनत्वसाधनमपास्तं १०३
प्रमेयविकल्पत्ववत्तयविव्यवस्थापनेन प्रत्युक्तः विस्तरस्तु न्यायकणिकायामनुसरणीय इति दिङ्मात्रं विस्तरेणेति ३

तदेवमुक्तसूत्रं भाष्यकृद्विज्ञानातिरिक्तस्थापने युक्तिमुक्त्वासौत्री युक्तिमवतारयति कुतश्चैतदिति वस्तुयं थाः पत्रात्तोत्वे यस्यैकत्वं
ततस्तयोर्भिद्यते यथा चैत्रस्य ज्ञानमेकं भिन्नेभ्यो देवदत्तविष्णुमित्रमैत्रप्रत्ययेभ्यो भिद्यते ज्ञानानानात्वेपि चार्थो न भिद्यत इति
भवति विज्ञानेभ्योन्यः अभेदश्चार्थस्य ज्ञानभेदेपि प्रमातॄणां परस्परप्रतिसंधानाद्वसीयते अस्ति हि रक्तद्विष्टविमूढमध्यस्था
नामेकस्यां योषिति प्रतीयमानायां प्रतिसंधानं यां त्वं पश्यसि तामेवाहं पश्यामीति तस्माद्वस्तुसाम्ये चित्तभेदात् ज्ञानभेदात् तयोरर्थज्ञान
योर्विभक्तः पंथाः स्वरूपभेदो यावः सुखज्ञानं कांतायां कांतस्य सपत्नीनां दुःखज्ञानं चैत्रस्य तु तामविंदतो मूढज्ञानं विषादः

कुतश्चैतदन्याय्यं १४ वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पंथाः बहुचित्तालंबनीभू
तमेकं वस्तुसाधारणं तत्खलु नैकचित्तपरिकल्पितं नाप्यनेकचित्तपरिकल्पितं किंतु
स्वप्रतिष्ठं कथं वस्तुसाम्ये चित्तभेदात् धर्मापेक्षं चित्तस्य वस्तुसाम्येपि सुखज्ञानं भव
त्यधर्मापेक्षं तत एव दुःखज्ञानमविद्यापेक्षं तत एव मूढज्ञानं सम्यग्दर्शनापेक्षं तत
एवमाध्यस्थ्यज्ञानमिति कस्य तच्चित्तेन परिकल्पितं न चान्यचित्तपरिकल्पितेन०
नार्थेनान्यस्य चित्तोपरागो युक्तः तस्माद्वस्तुज्ञानयोर्ग्राह्यग्रहणभेदभिन्नयोर्विभ०
क्तः पंथा नानयोः संकरगंधोप्यस्तीति सांख्यपक्षे पुनर्वस्तु त्रिगुणं चलं च गुणवृत्तमिति

स्यादेतत् यएकस्य चित्तेनपरिकल्पितः कामिनीलक्षणोर्थः तेनैवान्यापि चित्तमुपरज्यत इति साधारणमुपप०
द्यत इत्यत आह न चान्येति तथा सत्येकस्मिन्नीलज्ञाने भवति सर्व एव नीलज्ञानवन्तः स्युरिति तन्त्वर्थवादिनामपि को
यं सुखादिभेद भिन्नविज्ञानहेतुर्नित्यविलक्षणात्कारणात्कार्यभेदो युक्त इत्यत आह सांख्यपक्ष इति एकस्यैव बाह्यस्य

वस्तुनस्त्रैगुण्यवद्विज्ञानमपि सत्त्वरजस्तमोमयमिति

भा·वा·
१०४

एवमपि सर्वैवाविशेषेण सुखदुःखमोहात्मकं विज्ञानं स्यादित्यत आह धर्मादिनिमित्तापेक्षमिति रजःसहितं सत्त्वं धर्मापेक्षं सुखज्ञानं
जनयति सत्त्वमेव तु विगतरजस्कं विद्यापेक्षं माध्यस्थ्यज्ञानमित्यादि तेन धर्मादयो न सर्वे सर्वत्र पुरुषे संति किं तु कश्चित्क्वचिदिति अथ पु
वपन्नाख्यवस्थेति अत्र केचिदाहुः प्रावादुकाः ज्ञानसहभूरेवार्थो भोग्यत्वात्सुखादिवदिति एतदुक्तं भवति भवन्त्यर्थो ज्ञानान्न व्यति
रिक्तः तथाप्यसौ जडत्वात् ज्ञानमन्तरेण प्रकाशः प्रतिपत्तुं ज्ञानेन तु भासनीयः तथा च ज्ञानसमय एवास्ति नान्यदा प्रमाणाभावादिति
तदेतद्दूषयितुं तावदनूदयति भाष्यकारः त एतयेत्यादिना एतया युक्त्या सुखादिवत्साधारणमनेकज्ञानविषयत्वं बाधमाना नैपरिणामात्मक

धर्मादिनिमित्तापेक्षं चित्तैरभिसंबध्यमानं निमित्तानुरूपस्य च प्रत्ययस्योत्पद्यमानस्य तेन तेनात्मना हेतुर्भवति केचिदाहुः ज्ञानसहभूरेवार्थो भोग्यत्वात्सुखादिवदिति त एतया द्वारा साधारणत्वं बाधमानाः पूर्वोत्तरेषु क्षणेषु वस्तुरूपमेवापह्नुवते १५ न चैकचित्ततंत्रं वस्तु तदप्रमाणकं तदा किं स्यात् एकचित्ततंत्रं चेद्वस्तु स्यात्तदा चित्ते व्यग्रे निरुद्धे वा स्वरूपमेव तेनापरामृष्टमन्यस्याविषयीभूतमप्रमाणकमगृहीतस्वभावकं केनचित्तदानीं किं तत्स्यात् ४ अनुभूयते लौकिकपरीक्षकैः तच्चेदि ज्ञानेन सह भवेन्नूनमेवं
विधमेव चेदिदं प्रशस्यापरिकोपमवरोधावेनसोपि नापह्नूयेतेत्यर्थः मा वा भूदिदं प्रशस्यापह्नवो ज्ञानसहभूरेवास्त्वर्थः
तत्राप्याह न चैकं किं स्यात् यद्धि चरमाहि चित्तं तद्धापदद्व्यमग्रतयानच्युतेवर्तते यदा विवेकविषयमासीत् तदेव च १०४
चित्ते निरोधे समापद्येत तदा चेद् ज्ञानस्य याविवेकज्ञानस्य वा अभावाद्विवेको वा च्युतो वा ज्ञानभेदमात्रजीवनत्वात् एव
स्यादित्याह एकचित्तेति किं तत्स्यात् न स्यादित्यर्थः ४

संबध्यमानं च चित्तेन तदुत्तविवेको वा च्युतो वा कुत उत्पद्येत नियतकारणान्वयव्यतिरेकानुविधायि भावा हि कार्याणि न स्वका
रणं तरामदविनुमीशते मा भूदकारणत्वे तेषां कादाचित्कत्वव्याघातः न च तत् ज्ञानकारणमेव तत्कारणमिति युक्तं आशामोदक
स्य मोदकस्येवोपयुज्यमानस्य रसवीर्यविपाकादिसाम्यप्रसंगात् तस्मात्साधूक्तं संबध्यमानं वा पुनश्चित्तेनेति अपि च ये चा
ऽर्वाग्भागाः स सर्वो मध्यपरभागव्याप्तः ज्ञानाधीनेति अपि च योऽर्वाग्भागः स सर्वो मध्यपरभागव्याप्तः सद्भावे तस्यानुभूय
मानत्वात् मध्यपरभागो न तदिति व्यापकाभावादर्वाग्भागोऽपि न स्यादित्यर्थाभावात् कुतो ज्ञानसहभूरर्थ इत्याह ये चास्ये
ति अनुपस्थिता अज्ञाताः उपसंहरति तस्मादिति सुगमं शेषं स्यादेतत् न अर्थः स्वतंत्रः स च जडस्वभाव इति न कदाचि

संबध्यमानं वा पुनश्चित्तेन कुत उत्पद्येत ये चास्यानुपस्थिता भागास्ते चास्य न स्युरेवं नास्ति पृष्ठमित्युदरमपि न गृह्येत तस्मात्स्वतंत्रोऽर्थः सर्वपुरुषसाधारणः स्वतंत्राणि च चित्तानि प्रतिपुरुषं प्रवर्तन्ते तयोः संबंधादुपलब्धिः पुरुषस्य भोग इति १६ तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् अयस्कान्तमणिकल्पा विषया अयःसधर्मकं चित्तमभिसंबध्योपरञ्जयन्ति ० त्यकाशेन प्रकाशनेवाजडत्वमप्यस्यापगतमिति भावोप्यपगच्छे
त् तज्जीतु स्वभावमपहाय भावो वर्तितुमर्हतिन चेद्रियाद्याधेयो जडस्वभावस्यार्थस्य धर्मः प्रकाशन इति सांप्रतं अर्थध
र्मत्वे नीलत्वादिवत् सर्वपुरुषसाधारण इत्येकः शास्त्रार्थज्ञ इति सर्व एव विद्वांसः प्रसज्येरन् नजात्यः कश्चिदस्ति न चातीता
नागतयोर्धर्मः प्रत्युत्पन्नो युक्तः तस्मात्स्वतंत्रोऽर्थ उपलभविषय इति मनोरथमात्रमेतदित्यत आह तदुपरागे जडस्वभावोप्य
र्थ इन्द्रियप्रनाडिकया चित्तमुपरंजयति तदेवं भूतं चित्तं वृत्तिमुपसंक्रान्तप्रतिबिंबा चितिशक्तिश्चित्तमर्थोपरक्तं चेतयमानार्थेस
नुभवति न स्वार्थ किंचित् प्राकट्यादिकमाधत्ते नाप्यसंबद्धाच्चित्तेन तत्प्रतिबिंबसंक्रान्तेरुक्तत्वादिति यद्यपि सर्वगतत्वाच्चि
त्तस्य चेन्द्रियस्य चाहंकारिकस्य विषयेणास्ति संबन्धः तथापि यत्र शरीरे वृत्तिमच्चित्तं तेन सह संबंधो विषयाणामित्ययस्कान्तमणि

त्याशङ्क्याह अयःसधर्मकं चित्तमिति

भा-पा-
१०५

इन्द्रियप्रनाडिकया मिलितं बध्यो वर्जयन्ति अत एव चित्तं परिणामीत्याह वस्तुन इति तदेवं चित्तव्यतिरेकिणमर्थं समवस्थाप्य तेभ्यः परिणामिधर्मकेभ्यो व्यतिरिक्तमात्मानमादर्शयितुं तद्धर्म्यमपरिणामित्वमस्य वक्तुं पूर्वं चित्तस्य सूत्रं पठति यस्य तु तदेव चित्तं विषयस्तस्य सदा ज्ञातमित्यानुक्तिमनूद्य विशिनष्टि काम्यतावस्थितं चित्तमा निरोधात् सर्वदा पुरुषेणानुभूयत इति मन्तव्यम् कस्य हेतोः यतः पुरुषोऽपरिणामी परिणामित्वे हि तत्पुरुषस्यापि ज्ञाताज्ञातविषयो भवेत् नु ज्ञातविषयत्वमन्वयं तस्मादपरिणामी न तथा परिणामिभ्यो निविच्यत इति तदेतदाह यदि चित्तवदिति सदा ज्ञातत्वं तु मनसः सवृत्तिकस्य तस्यपः प्रभुः स्वामी भोक्तेति यावत् तत्प्रभोः पुरुषस्यापरिणामित्वमनुमापयति तथा चापरिणामित्वं तस्यापरिणामिनाष्ठितात् पुरुषस्य भेद इति भावः अत्रैव नास्तिकमुत्थापयति स्यादाशंकेति अ

येन च विषयेणोपरक्तं चित्तं स विषयो ज्ञातस्ततोऽन्यः पुनरज्ञातो वस्तुनो ज्ञाताज्ञातस्वरूपत्वात्परिणामि चित्तं यस्य तदेव चित्तं विषयस्तस्य १ सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् यदि चित्तवत्प्रभुरपि पुरुषः परिणमेत ततस्तद्विषयाश्चित्तवृत्तयः शब्दादिविषयवत् ज्ञाताः स्युः सदा ज्ञातत्वं तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्वमनुमापयति स्यादाशंका चित्तमेव स्वाभासं विषयाभासं च वैशेषिकानां चित्तात्मवादिनां च भविष्यत्यग्निवत् १८ न तत्स्वाभासं दृश्यत्वात् यथेतराणीन्द्रियाणि शब्दादयश्च दृश्यत्वान्न स्वाभासानि तथा मनोऽपि प्रत्येतव्यं ५०॥

यमर्थः स्यादेतदेवं यदि चित्तमात्मनो विषयः स्यात् अपि तु स्वप्रकाशमेतत् विषयाभासं पूर्वं चित्तं प्रतीत्यसमुत्पन्नं तत् कुतः पुरुषस्य सदा ज्ञातविषयत्वं कुतस्तरां वा परिणामितया परिणामिनः पृथक्तान्वेद इति ततत्वात् भवेदेतदेवं यदि स्वसंवेदनं चित्तं स्यात्त्वेतदस्ति तद्धि परिणामितया नीलादिवदनुभवव्याप्यं पश्चादनुभवव्याप्यं न ततः स्वाभासं भवितुमर्हतीत्यानिवृत्तिविरोधात् नहि तदेव क्रिया च कर्म च कारकं च नहि पाकः पच्यते छिदा वा छिद्यते पुरुषस्त्वपरिणामी नानुभवकर्मेति नास्ति नु स्वयंप्रकाशता नपुज्यते अपरस्यानप्रकाशताद्यस्य स्वयंप्रकाशता नानुभवकर्मता तस्माद्दृश्यत्वाद्दर्शनकर्म

ननु दृष्टयोनिः स्वयंप्रकाशश्च नहि यथा घटादयोऽग्निनाऽभ्यज्यन्ते एवमग्निरग्न्यन्तरेणेत्यत आह न चाग्निरत्रेति कस्मान्नहीति मानामाग्निरग्र्यं यात् प्रकाशिष्ठविज्ञानानुप्रकाशत इति न स्वयंप्रकाशत इति न व्यभिचार इत्यर्थः प्रकाशश्चायमिति अयमिति पुरुषस्वभावात् प्रकाशापवच्छिनत्ति क्रियारूपः प्रकाश इति यावत् एतदुक्तं भवति या या क्रिया सा सा सर्वा कर्तृकरणकर्मसंबंधेन दृष्टा यथा पाकोऽद्यवछेत् नाग्नितंदुलसंबंधेन तथा प्रकाशोऽपि क्रियेति तया पितया

न चाग्निरत्र दृष्टान्तः न ह्यग्निरात्मस्वरूपमप्रकाशं प्रकाशयति प्रकाशश्चायं प्रकाश्यप्रकाशकसंयोगे दृष्टो न च स्वरूपमात्रेऽस्ति संयोगः किं च स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः तद्यथा स्वात्मप्रतिष्ठमाकाशं न परप्रतिष्ठमित्यप्रतिष्ठमेवेत्यर्थः स्वबुद्धिप्रचारप्रतिसंवेदनात्सत्त्वानां प्रवृत्तिर्दृश्यते क्रुद्धोऽहं भीतोऽहममुत्र मे रागोऽमुत्र मे क्रोध इत्येतत्स्वबुद्धेरग्रहणे न युक्तमिति १९ भवितव्यं संबंधाभेदाश्रयो नाभेदे संभवतीत्यर्थः किं च स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः स्यादेतत् मा भूद्ग्राह्यं चित्तं नहि ग्रहणस्याकारणसंव्यापकस्य च निवृत्तौ चित्तनिवृत्तिरित्यत आह स्वबुद्धीति बुद्धिश्चित्तं प्रचारो व्यापारः सत्त्वानां प्राणिनश्चित्तस्य वृत्तिभेदैः क्रोधादिभिरादयः स्वास्य येन चित्तेन स्वविषयेण च सह प्रत्यात्ममनुभूयमानाश्चित्तस्याग्राह्यतां विह

पाय.

भा·वा·
९·६

एकरूपाणंस्वाभासंविषयाभासंचित्तमितिद्वयाणेनतावद्भूतेनैवव्यापारेणात्मानमवधारयतितेनैवविषयमपीतिवक्तुमर्हतिनघवि
लक्षणोव्यापारःकार्यभेदानुमेयोप्रत्तस्माद्व्यापारभेदोंगीकर्तव्यःनचवैनाशिकानामुत्पत्तिभेदातिरिक्तोस्तिव्यापारःनचैक
स्याएवोत्पत्तेर्विलक्षणयाःकार्यद्वैलक्षण्यसंभवःतस्याकस्मिकत्वप्रसंगात् नचैकस्योत्पत्तिद्वयसंभवःतस्मादर्थस्यचज्ञान
रूपस्यचावधारणंनैकस्मिन्समयइतितदेतद्भाष्येणोच्यते नचैकस्मिन्क्षणइति तथाचोक्तंवैनाशिकैःभूतिर्येषांक्रियासैव

एकसमये चोभयानवधारणं नचैकस्मिन्क्षणेस्वपररूपावधारणंयुक्तंक्षणिक
वादिनोयद्भवनंसैवक्रियातदेवचकारकमित्यभ्युपगमःस्यान्मतिःस्वरसनिरुद्धं
चित्तांतरेणसमनंतरेणगृह्यतइति २० चित्तांतरदृश्येबुद्धिबुद्धेरतिप्रसंगःस्मृतिसं
करश्च अथ यचित्तंचेच्चित्तांतरेणगृह्येतबुद्धिः केनगृह्यतेसाप्यन्ययासाप्यन्ययेत्य
तिप्रसंगःस्मृतिसंकरश्चयावंतोबुद्धिबुद्धीनामनुभवास्तावंत्यःस्मृतयःप्राप्नुवंति
तत्संकराच्चैकस्मृत्यनवधारणंचस्यादित्येवंबुद्धिप्रतिसंवेदिनंपुरुषमपलप
द्भिर्वैनाशिकैःसर्वमेवाकुलीकृतंतुभोक्तृस्वरूपंयत्रक्वचनकल्पयंतोनन्याये
नसंगच्छंते चोद्यतेइति तस्माद्दृश्यत्वमेवचित्तस्यसदातत्स्वाभासत्वमपीयनपनुद्रष्टेःरच्चद्रष्टारंपरिणामि
त्वंचदर्शयतीतिसिद्धंपुनर्वैनाशिकमुत्थापयति स्यान्मतिःमाभूद्दृश्यत्वेनस्वसंवेदनं एवमप्यात्मानसिध्यतिस्वसंता
नवर्तिनाचरमचित्तक्षणेनस्वरसनिरुद्धस्वजनकचित्तक्षणग्रहणादित्यर्थःसमंचततनुत्तानत्वेनाननत्वाव्यवहितत्वेनसम
नंतरंतेन चित्तं बुद्धिरितिचित्तमित्यर्थःनागृहीताचरमाबुद्धिःपूर्वबुद्धिग्रहणसमर्था नहिबुद्ध्यासंबद्धापूर्वाबुद्धिर्बुद्धाभवि १०६

नह्यगृहीतंद्रष्टुंदिनमवगंतुमर्हतितस्मादनवस्थेतिविज्ञानवेदनासंज्ञारूपसंस्काराःस्कंधाःसांख्ययोगादयःप्रवादाःसांख्याश्चयोगाश्च
तएवादयोयेषांवैशेषिकादिप्रवादानांतेसांख्ययोगादयःप्रवादाःसुगममन्यत् स्यादेतन्नयदिचित्तंनस्वाभासंनापिचित्तांतरवेद्यंआत्मनापिक
थंभोक्तृपतेश्चित्तनस्वल्वात्मनःस्वयंप्रकाशस्यास्यास्तिकाचिक्रियायाचतामंतरेणाकर्तृत्वादसंबद्धस्थितेनकर्मणातस्यभोक्तारतिप्रसं
गादित्याशयवानाह कुतिकथमितिसूत्रेणोत्तरमाहचित्तंयन्नद्वोचनुवृत्तिसारूप्यमितरत्रेतितस्थितःसमुत्थितंचित्तेःस्वबुद्धिसंवे
दनंबुद्धेःसदाकारापत्तौचनिप्रतिबिंबाधानरूपातद्रूपतापत्तौसत्यांयथाहिचंद्रमसःक्रियामंतरेणापिसंक्रांतचंद्रप्रतिबिंबममलंजलम

केचित्सत्त्वमात्रमपिपरिकल्प्यास्तिससत्त्वोयएतान्पंचस्कंधान्निक्षिप्यान्यांश्चप्र
तिसंदधातीत्युक्त्वाततएवपुनस्त्रस्यंतितथास्कंधानांमहन्निर्वेदायविरागायानुत्पा
दायप्रशांतयेगुरोरंतिकेब्रह्मचर्यंचरिष्यामीत्युक्त्वासत्त्वस्यपुनःसत्त्वमेवापह्नुवते
सांख्ययोगादयस्तुप्रवादाःस्वशब्देनपुरुषमेवस्वामिनंचित्तस्यभोक्तारमुपयंतीति
११ कथं चितेरप्रतिसंक्रमायास्तदाकारापत्तौस्वबुद्धिसंवेदनं अपरिणामिनीहि
भोक्तृशक्तिरप्रतिसंक्रमाचपरिणामिन्यर्थेप्रतिसंक्रांतेवतद्वृत्तिमनुपततितस्याश्च
प्राप्तचैतन्योपग्रहरूपायाबुद्धिवृत्तेरनुकारिमात्रतयाबुद्धिवृत्त्यविशिष्टाहिज्ञानवृ
चलमिवचंद्रमसमवभासयतिएवंविनापिचितिव्यापारंउपसंक्रांतचितिप्रतिबिंबंचित्तंस्वगतयाक्रिययाक्रियावतीमसंगता
मपिमपिसंगतांचितिशक्तिमवभासवत्भोग्यभावमापद्यवतभोक्तृभावमापादयतितस्मादितिसूत्रार्थःभाष्यमस्यार्थंसस
कृतत्रव्याख्यातंइतिनव्याख्यातमस्मा०

बुद्धिवृत्त्यविशिष्टत्वे ज्ञानस्य तेनागममुदाहरति तथा चोक्तं न पातालमिति शाश्वतस्य शिवस्य ब्रह्मणो विशुद्धस्वभावस्य चिति
च्छायापन्नां ममेति वृत्तिमेव चितिच्छायापन्नत्वाच्चित्तेऽप्यविशिष्टां गुहां वेदयंते तस्यामेव गुहायां तद्ब्रह्म तदयनयोग्यस्वपर
काशमनावरणमनुपसर्गमप्रधीनमनेचरमदेहस्य भगवत इति तदेवं द्रष्टृत्वेन चित्तस्य परिणामित्वादिति शिक्षः पुमानपरिणामिधर्मो
पपादितः संप्रति लोकप्रत्यक्षमप्यत्र प्रमाणयति अतश्चैतदिति अवश्यं चैतदित्यर्थः द्रष्टृदृश्योपरक्तं यथा हि नीलाद्युपरक्तं चित्तं नीलाद्यर्थप्रत्य
क्षेणावस्थापयति एवं द्रष्टृच्छायापन्नत्वादनुरक्तं चित्तं द्रष्टारमपि प्रत्यक्षेणावस्थापयति अस्ति हि ज्ञाताकारज्ञानं नीलमहं संप्र

तथा चोक्तं न पातालं न च विवरं गिरीणां नैवांधकारं कुक्षयो नोदधीनाम् गुहा यस्यां
निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिमविशिष्टां कवयो वेदयंते इति अतश्चैतदभ्युपगम्यते
१२ द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् मनो हि मंतव्येनार्थेनोपरक्तं तत्स्वयं च विषय
त्वाद्विषयिणा पुरुषेणात्मीयया वृत्त्याभिसंबद्धं तदेतच्चित्तमेव द्रष्टृदृश्योपरक्तं विष
य विषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेत
नं चेतनमिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते तदनेन चित्तसारूप्येण भ्रां
ताः केचित्तदेव चेतनमित्याहुः त्यर्थ इति तस्माज्ज्ञेयवज्ज्ञाताऽपि प्रत्यक्षसिद्धोऽपि न विविच्यावस्थापि
विच्यावस्थापयितो यथा जले चंद्रमसो बिंबं मत्वेनावतानत्प्रत्यक्षं न चास्य जलगतत्वेन तत्प्रमाणमिति चंद्ररूपेऽप्यप्रमाणं भवि
तुमर्हति तस्माच्चित्तप्रतिबिंबितत्तया चैतन्यगोचरा अपि चित्तवृत्तिर्नैव चैतन्यगोचरेति तदिदमाह सर्वार्थं त्वं चित्तस्येति तदेतदा
ह मनो हीति न केवलं तदाकारवत्यां मंतव्येनार्थेनोपरक्तं मनः अपि तु स्वयं चेति च कारो भिन्नक्रमः पुरुषेणात्मीयया नंतरं
द्रष्टव्यः तच्छायापत्तिः पुरुषस्य वृत्तिः इयं च चैतन्यच्छायापत्तिश्चित्तस्यैव नाशंकितव्या कथमन्यथा चित्ते चैतन्य
मेते आरोपयांबभूवुरित्याह तदनेनेति केचिद्वैनाशिका बाह्यार्थवादिनः 107

अपरे विज्ञानमात्रवादिनः ननु यदि चित्तमेव द्रष्टाकारं दृश्याकारं चानुभूयते हंत चित्तादभिन्नावेवाहं दृश्येदृष्टा यथाहुः अभि
न्नोऽपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति तत्कथमेतेऽनुकंपनीया इत्यत आह स
माधिप्रज्ञायामिति नैव खलु तत्काभिरूपपत्तिभिश्चित्तातिरिक्तं पुरुषमभ्युपगम्याप्यष्टांगयोगोपदेशेन समाधिप्रज्ञायामात्म
गोचरायामवतार्य बोधयितव्याः तद्यथा समाधिप्रज्ञायां प्रज्ञेयोऽर्थः आत्मा प्रतिबिंबीभूतोऽन्यः कस्मात्तस्यात्मनः आ
लंबनीभूतत्वात् अथ चित्तादभिन्नमेव कस्मान्नालंबनं भवतीति यदि युक्तिबोधितोऽपि विवेकात्याहदेनूतत्र हेतुमाह स चेदात्म

अपरे चित्तमात्रमेवेदं सर्वं नास्ति खल्वयं गवादिर्घटादिश्च सकारणो लोक इति
अनुकंपनीयास्ते कस्मात् अस्ति हि तेषां भ्रांतिबीजं सर्वरूपाकारनिर्भासं चित्तमि
ति समाधिप्रज्ञायां प्रज्ञेयोऽर्थः प्रतिबिंबीभूतस्तस्यालंबनीभूतत्वादन्यः स चेदर्थ
श्चित्तमात्रं स्यात्कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत तस्मात्प्रतिबिंबीभूतोऽर्थः प्रज्ञा
यां येनावधार्यते स पुरुष इति एवं ग्रहीतृग्रहणग्राह्यस्वरूपचित्तभेदात्त्रयमप्ये
तज्जातितः प्रविभजंते ते सम्यग्दर्शिनस्तैरधिगतः पुरुषः कुतश्चैतत् २२ तदसंख्ये
हूयार्थश्चित्तमात्रं स्यात्तत्तु ततो व्यतिरिक्तः ततः कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत स्वात्मनि वृत्तिविरोधादुपसंहरति तस्मा
दिति समीचीनोपदेशेनानुकंपिता भवंतीत्याह एवमेतदिति जातितः स्वभावतः त्रय्यर्थः चित्तातिरिक्तात्मसद्भावे हेत्वंतरमव
तारयति कुतश्चैतदिति तदिदं त्वात् यद्यप्यसंख्येयाः कर्मवासनाः क्लेशवासनाश्च चित्तमेवाधिशेरते ननु पुरुषं तथा च वास
नाधीनाविपाकाश्चितात्मा यत्तया चित्तस्य भोक्तृतामावहंतीति भोक्तुरर्थं च भोग्यमिति सर्वं चित्तार्थं प्राप्तं तथापि तच्चित्तमसंख्ये

यवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्
द्विशिष्टत्वार्थः ०

व्याचष्टे तदेतदिति स्यादेतच्चित्तं संहत्याविकर्तिव्यतिस्वार्थं च भविष्यति कः स्वविरोध इति यदि कश्चिद्ब्रूयात्तं प्रत्याह संह
त्यकारिणेति सुखैस्वचित्तमिति भोगमुपलक्षयति तेन दुःखचित्तमपि द्रष्टव्यं ज्ञानमित्यपवर्गउक्तः एतदुक्तं भवति दुःखसुखचि
त्ते प्रतिकूलानुकूलात्मके नात्मकेनात्मनि संभवतः स्वात्मनि वृत्तिविरोधात् न चान्योऽपि संहत्यकारी साक्षात्परंपरया वा सुखदु
दुःखे विदधानस्ताभ्यामनुकूलनीयः प्रतिकूलनीयो वा तस्मात्साक्षात्परंपरया वा न सुखदुःखयोर्याभ्यां प्रतिपन्ने स एवाभ्यामनु
कूलनीयः प्रतिकूलनीयो वा स च नित्योदासीनः पुरुषः एवमपवृज्यते येन ज्ञानेन तस्याविज्ञेयत्वं तत्रत्वात् स्वात्मनि च वृत्तिविरो

तदेतच्चित्तमसंख्येयाभिर्वासनाभिरेव चित्रीकृतमपि परार्थं परस्य भोगापवर्गार्थं न
स्वार्थं संहत्यकारित्वाद्गृहवत् संहत्यकारिणा चित्तेन न स्वार्थेन भवितव्यं न सुखचि
त्तं सुखार्थं न ज्ञानं ज्ञानार्थमुभयमप्येतत्परार्थं यश्च भोगेनापवर्गेण चार्थेनार्थवा
न्पुरुषः स एव परो न परः सामान्यमात्रं यत्तु किंचित्परं सामान्यमात्रं स्वरूपेणोदाह
रेद्वैनाशिकस्तत्सर्वं संहत्यकारित्वात्परार्थमेव स्याद्यस्त्वसौ परो विशेषः स न सं
हत्यकारी पुरुष इति २४ विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ० नमः ०

ध्यानज्ञानार्थत्वं न चान्यविषयादस्मादपवर्गसंभवो विदेहप्रकृतिलयानामपवर्गासंभवात् न तस्मात्तज्ज्ञानमपि पुरुषा
र्थमेव न तत्स्वार्थं नापि परमात्रार्थं संहतपरार्थत्वे चानवस्थाप्रसंगादसंहतपरार्थसिद्धिरिति तदेवं कैवल्यमूलबीजं युक्ति
मप्रमाणदर्शनमुक्त्वा तदुपदेशाधिकृतं पुरुषमनधिकृतपुरुषात्तद्व्यावृत्तमाह विशेषविनिवृत्तिः यस्यात्मभावे भावना
स्ति तस्यात्मयोगोपदेशादनुतिष्ठतो युंजानस्य तत्त्वप्रियाकान्वितसत्त्वपुरुषयोर्विशेषदर्शिनादात्मभावभावनानिवर्त
ते यस्यात्मभावभावनैव नास्ति कस्य तस्योपदेशानधिकृतस्यापरिनिष्ठितात्मतत्त्वपरलोकभावस्य नोपदेशो न विशेषदर्शी नात्मभावभावनानिवृत्तिरिति सूत्रार्थः ॥

तत्वात्मभावभावनायाः चित्तवर्तिन्याः कुतो वगमइत्यत आह यथा प्रावृषीति प्रागभवीयं तत्त्वदर्शनबीजमपवर्गभागीयं यत्कर्मोद्भू
तयोगानुष्ठानं तदेकदेशानुष्ठानं वा तदभिनिर्वर्तितमस्तीत्यनुमीयते तस्य चात्मभावभावनावश्यमेव स्वाभाविकी वक्तव्या
स्यात्संविनापि प्रवर्त्तते अनधिकारिणमागमिनो वचनेनदर्शयति यस्याभावादिदमिति पूर्वपक्षः नास्तिकमिफलं परलोकिकं तो॥

यथाप्रावृषि तृणांकुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणेन यस्य रो
महर्षाश्रुपातौ दृश्येते तत्राप्यस्ति विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्तितमि
त्यनुमीयते तस्यात्मभावभावना स्वाभाविकी प्रवर्तते यस्याभावादिदमुक्तं स्वभावं मुक्त्वा
दोषाद्येषां पूर्वपक्षे रुचिर्भवत्यरुचिश्च निर्णये भवति तत्रात्मभावभावना कोऽहमासं
कथमहमासं किंस्विदिदं कथंस्विदिदं के भविष्यामः कथं भविष्याम इति सा तु वि
शेषदर्शिनो निवर्तते कुतः चित्तस्यैवैष विचित्रः परिणामः पुरुषस्त्वसत्यामविद्या
यां शुद्धश्चित्तधर्मैरपरामृष्ट इति ततोऽस्यात्मभावभावना कुशलस्य निवर्तत इति २५
तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् तदानीं यदस्य चित्तं विषयप्राग्भारमज्ञान
निम्नमासीत् तदस्यान्यथा भवति कैवल्यप्राग्भारं विवेकजज्ञाननिम्नमिति २६ ०

भावाः परलोकाभाव इति तन्महद्विरहरुचिश्च निर्णये वेयं च विप्रतिपत्तिर्भवत्यात्मभावभावनाप्राग्व्याख्याता विशेषदर्शिनः
परमर्शमाह चित्तस्यैवेति तस्य विशेषदर्शिनः कुशलस्यात्मभावभावनाविनिवर्तत इति अथ विशेषदर्शिनः कीदृशं चित्तमित्यत
आह तदा चित्तं निगदव्याख्यातम् ०

भा·वा·
१·९

स्यादेतद्विशेषदर्शिनं चेद्विवेकनिम्नं न जातु चित्तं व्युत्थितं स्याद् दृश्यते चास्य भिन्नामदतो व्युत्थितमित्यत आह तच्छिद्रेषु प्रत्यये ति
प्रतीयते येन स प्रत्ययश्चित्तसत्त्वं तस्माद्विवेककल्पितेः तेन निम्नस्य जानामीति सा ह्यनुमोद्यो विविच्य दर्शितो न जानामीति मो
हस्तन्मूलावहंकारममकारममकारा एव हमस्मीति वा ममेति दर्शितौ क्षीयमाणानि च तानि बीजानि चेति समासः पूर्वसंस्कारेभ्यो
व्युत्थानसंस्कारेभ्यः स्यादेतन्नूत्पत्तिविवेकज्ञाने व्युत्थानसंस्कारा यदि प्रत्ययांतराणि प्रसुवते कस्तर्हि हानहेतुरेतेषां यतः प्र

तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः प्रत्ययविवेकनिम्नस्य सत्त्वपुरुषान्यताख्यातिमात्रप्रवाहिणश्चित्तस्य तच्छिद्रेषु प्रत्ययांतराण्यस्मीति वा ममेति वा जानामीति वा न जानामीति वा कुतः क्षीयमाणबीजेभ्यः पूर्वसंस्कारेभ्य इति २७ हानमेषां क्लेशवदुक्तं यथा क्लेशा दग्धबीजभावा न प्ररोहसमर्था भवंति तथा ज्ञानाग्निना दग्धबीजभावः पूर्वसंस्कारो न प्रत्ययप्रसूर्भवति ज्ञानसंस्कारास्तु चित्ताधि

त्ययांतराणि न पुनः प्रसुवीरन्नित्यत आह हानमेषामिति अपरिपक्वविवेकज्ञानस्य क्षीयमाणव्युत्थानसंस्काराः प्रत्ययांतरं
प्रसुवते न तु परिपक्वविवेकज्ञानस्य क्षीणाः प्रत्ययांतराणि प्रसोतुमर्हंति यथा विवेकच्छिद्रसमत्वत्रापि क्लेशा न संस्का
रांतरं प्रसुवते तत्कस्य हेतोः तदेते क्लेशा विवेकज्ञानवह्निदग्धबीजभावा इति एवं व्युत्थानसंस्कारा अपीति अपि व्यु
त्थानसंस्कारा विवेकज्ञानसंस्कारैर्निरोद्धव्याः विवेकसंस्काराणां निरोधसंस्कारैर्निरोधसंस्काराणां तु वाह्यविषयत्वं दर्शि
तं निरोधोपायः प्रागुपदर्शितं नीयत इत्यत आह ज्ञानसंस्कारास्त्विति परवैराग्यसंस्कारा इत्यर्थः ९

(109)
१०

तदेवं सूत्रकारो व्युत्थाननिरोधोपायं प्रसंख्यानमुक्त्वा प्रसंख्याननिरोधोपायमाह प्रसमाधिः ततः प्रसंख्यानात्र किंचित्सर्वं भाव
धिष्ठातृत्वादि प्रार्थयते प्रत्युत तत्रापि क्लिष्टत्वात् तिपरिणामित्वदोषदर्शनेन विरक्तः सर्वथा विवेकख्यातिरेव भवति तामेतदेव
विवृणोति तत्रापीति यदा व्युत्थानप्रत्ययाभावे पुनः तदा नायं ब्राह्मणः सर्वथा विवेकख्यातिः यत तस्य न प्रत्ययांतराणि भवंति तत
सर्वथा विवेकख्यातिरिति तदास्य धर्ममेघः समाधिर्भवति एतदुक्तं भवति प्रसंख्याने विरक्तस्तन्निरोधमिच्छन् धर्ममेघं समा
धिमुपासीत तदुपासने च सर्वथा विवेकख्यातिर्भवति तथा यतन्निरोधमुपारयतीति तस्य च प्रयोजनमाह ततः कस्मात्पुनः

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः यदायं ब्राह्मणः प्रसंख्यानेऽप्यकुसीदस्ततोऽपि न किंचित्प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयान्नास्य प्रत्ययांतराण्युत्पद्यंते तदास्य धर्ममेघो नाम समाधिर्भवति २८ ततः क्लेशकर्मनिवृत्तिः तल्लाभादविद्यादयः क्लेशाः समूलकाषं कषिता भवंति कुशलाकुशलाश्च कर्माशयाः समूलघातं हता भवंति क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात् यस्माद्विपर्ययो भवस्य कारणं न हि क्षीणविपर्ययः कश्चित्केनचित्क्वचिज्जातो दृश्यत इति ३० तदा सर्वावरणमलापेतस्य ज्ञानस्यानंत्याज्ज्ञेयमल्पम् ॥ जीवन्नेव विमुक्तो भवतीत्युक्तं यस्मा
दिति क्लेशकर्मवासनेद्धः किल कर्माशयो जात्यादिनिदानं न चासति निदाने निदानी भवितुमर्हति यथाहात्र भगवानक्षपा
पादः वीतरागजन्मादर्शनादिति अथैवं धर्ममेघे सति कीदृशं चित्तमित्यत आह तदा सर्वेति आक्रियते चित्तसत्त्वमे
भिरिति आवरणानि मलाः क्लेशकर्माणि सर्वं वृत्ते आवरणमलाच्चेति सर्वावरणमलाः तेभ्योऽपेतस्य चित्तसत्त्वस्य ज्ञान
स्य ज्ञापनेनेति अनया व्युत्पत्त्या आनंत्यादपरिमेयत्वाज्ज्ञेयमल्पम् ०

यथा हि शरदि घनपटलमुक्तचंद्राविंब; सवितुः प्रद्योतमानस्य प्रकाशानंत्यात्प्रकाश्याः घटादयोल्पाः प्रकाश्यंते एवमपगतजलमसत्त्विनसत्त्वस्य प्रकाशानंत्याद्ल्पं प्रकाश्यमिति तदेतदाह सर्वैरिति एतदेव व्यतिरेकमुखेन स्फोरयति आवरकेण तमसाभिभूतमिति क्रियाशीलेन रजसा प्रवर्तितमत एव क्वचिदेव प्रदेशाद्ग्रहणक्षममित्यर्थः अत एव सर्वान्धर्माननुपश्येत् मेहति वर्षति प्रकाशानेनेति प्रकाशानेनेति धर्ममेघ इत्युच्यते न च परमेषु धर्ममेघः समाधिः सवासनक्लेशकर्माशयप्रशमहेतुः अथ स ल्पं ध्येयमस्ति कस्मात् नज्ञायते पुनर्जन्मेत्यत आह यत्रेदमुक्तमिति कारणसमुच्छेदादपि चेत्कार्यं क्रियते तर्हि अंधो मणिं विधा

सर्वैः क्लेशकर्मावरणैर्विमुक्तस्य ज्ञानस्यानंत्यं भवति तमसाभिभूतमावृतं ज्ञानसत्त्वं क्वचिदेव रजसा प्रवर्तितमुद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतमलं भवति तदा भवत्यस्यानंत्यं ज्ञानस्यानंत्याज्ज्ञेयमल्पं संपद्यते यथा आकाशे खद्योतः यत्रेदमुक्तं अंधो मणिमविध्यत्तमनंगुलिरावयत् अग्रीवस्तं प्रत्यमुंचत्तमजिह्वोभ्यपूजयदिति ३१ ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानां तस्य धर्ममेघस्योदयात्कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते न हि कृतभोगापवर्गाः परिसमाप्तक्रमाः क्षणमप्यवस्थातुमुत्सहंते ३३

धर्ममेघोदयादिभ्यो भवेयुः प्रत्यूहाः तथा चानुपपन्नार्थतायामाभाणकौ लौकिकः उपपन्नार्थः स्यात् अविध्यदिदं धौमणिमिति आवयत् ग्रथितवान् प्रत्यमुंचत् पिनद्धवान् अभ्यपूजयत् स्तुतवानिति ननु धर्ममेघस्य परा काष्ठा ज्ञानप्रसादमात्रं परं वैराग्यं समूलघातमपहंतु व्युत्थानसमाधिसंस्कारान् क्लेशकर्माशयान् गुणास्तु स्वत एव विकारकरणशीलाः कस्मात्तादृशमपि पुरुषं प्रति देहेंद्रियादि नारभंत इत्यत आह ततो गुणानां शीलमिदं गुणानां यत्परार्थं प्रति कृतार्थान्प्रति न प्रवर्तंते इति भावः नमः गणपतये ०

अपरांतेति परिणामक्रमं पृच्छति अथ कोयमिति क्षणक्रमः परिणामक्रमः क्षणप्रतियोगी क्षणः प्रतिसंबंधी यस्य स तथोक्तः क्षणप्रचयाश्रय इत्यर्थः न जातु क्रमः क्रमवंतमंतरेण शक्यो निरूपयितुं न चैकस्यैव क्षणस्य क्रमः तस्मात् क्षणप्रचयाश्रयः परिशिष्यते तदिदमाह क्षणानंतर्येति परिणामक्रमे प्रमाणमाह परिणामस्येति नवस्य हि वस्त्रस्य प्रयत्नसंरक्षितस्यापि चिरेण पुराणता दृश्यते सोयं परिणामस्यापरांतः पर्यवसाने तेन हि परिणामस्य क्रमः ततः प्रागपि पुराणताया सूक्ष्मसूक्ष्मतरसूक्ष्मतमस्थूलस्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमस्थूलतरस्थूलतमत्वादीनां पौर्वापर्यमनुमीयते एतदेव व्यतिरेकमुखेन दर्शयति नहीति अननुभूतः प्राप्तः क्रमः क्षणानामपरांतयोः

अथ कोयं क्रमो नामेति क्षणप्रतियोगी परिणामापरांतनिर्ग्राह्यः क्रमः क्षणानंतर्यात्मा परिणामस्यापरांतेनावसानेन गृह्यते क्रमः न ह्यननुभूतक्रमक्षणपुराणता वस्त्रस्यांते भवति नित्येषु च क्रमो दृष्टः द्वयी चेयं नित्यता कूटस्थनित्यता परिणामनित्यता च तत्र कूटस्थनित्यता पुरुषस्य परिणामनित्यता गुणानां यस्मिन्परिणम्यमाने तत्त्वं न विहन्यते तन्नित्यं उभयस्य च तत्त्वानभिघातान्नित्यत्वं तत्र गुणधर्मेषु बुद्ध्यादिषु परिणामापरांतनिर्ग्राह्यः क्रमो लब्धपर्यवसानो नित्येषु धर्मिषु गुणेष्वलब्ध

क्रांतेष्वेष क्रमः प्रधानस्य न संभवति तस्य नित्यत्वादित्यत आह नित्येषु चेति बहुवचनेन सर्वनित्यव्यापितां क्रमस्य प्रतिजानीते तत्र नित्यानां प्रकारभेदं दर्शयन् नित्यानित्यव्यापितां क्रमस्य उपपादयति द्वयीति ननु कूटस्थं स्वभावाद्प्रच्युतमस्तु नित्यं परिणामि सद्वैस्वरूपात् च्यवमानं कथं नित्यमित्यत आह यस्मिन्निति धर्मलक्षणावस्थानामुदयव्ययधर्मत्वं धर्मिणस्तु तत्त्वाद्विघात एवेति अथ किं परिणामापरांतनिर्ग्राह्यतास्य क्रमस्य नेत्याह तत्र गुणधर्मेषु बुद्ध्यादिष्विति यतो लब्धपर्यवसानः धर्माणां विनाशात् प्रधानस्य तु परिणामक्रमो न लब्धपर्यवसानः ०

ननु प्रधानस्य धर्मरूपेण परिणामादस्तु परिणामक्रमः पुरुषस्य त्वपरिणामिनः कुतः परिणामक्रम इत्यत आह कूटस्थेति तत्र बद्धानां चिता व्यतिरेकाभिमानात् परिणामाध्यासः मुक्तानां वास्तिक्रियामुपादायावास्तवोऽपि परिणामो मोहकल्पितः शब्दस्य पुरःसरतया तत्सृष्टो विकल्पोऽस्तिक्रियामुपादत्त इति गुणेष्वलब्धपर्यवसानः परिणामक्रम इत्युक्तं तदसहमानः पृच्छति अथेति स्थित्येति महाप्रलयावस्थायां गत्येति सृष्टौ एतदुक्तं भवति यद्यानन्त्यात्र परिणामसमाप्तिः संसारस्येष्टं हन्त भोः कथं महाप्रलयसमये सर्वेषामात्मनां सहसा समुच्छिद्येत कथं च सृष्ट्यादौ सहसोत्पद्येत संसारः तस्मादेकैकस्यात्मनो मुक्तिक्रमेण स

कूटस्थनित्येषु स्वरूपमात्रप्रतिष्ठेषु मुक्तपुरुषेषु स्वरूपास्तिता क्रमेणैवानुभूयत इति तत्राप्यलब्धपर्यवसानः शब्दपृष्ठेनास्तिक्रियामुपादाय कल्पित इति अथास्य संसारस्य स्थित्या गत्या च गुणेषु वर्तमानस्यास्ति क्रमसमाप्तिर्न वेति अवचनीयमेतत् कथं अस्ति प्रश्न एकान्तवचनीयः सर्वो जातो मरिष्यतीति ओं भो इति अथ सर्वो मृत्वा जनिष्यत इति विभज्यवचनीयमेतत् प्रत्युदितख्यातिः क्षीणतृष्णः कुशलो न जनिष्यत इतरस्तु जनिष्यते ३२ र्वेषां विमोक्षादुच्छेदः सर्वेषां संसारस्य क्रमेणेति प्रधानपरिणामपरिसमाप्तिः एवं च प्रधानस्याप्यनित्यत्वप्रसंगः न चापूर्वसत्त्वप्रादुर्भाव इष्यते येनानन्त्यं स्यात् तथा सत्यनादित्वव्याहतेः सकलशास्त्रार्थभंगप्रसंग इति भावः उत्तरमाह अवचनीयं अनुत्तरार्हमेतत् एकान्तत एव तस्यावचनीयतां दर्शयितुमेकान्तवचनीयं प्रश्नं दर्शयति अस्ति प्रश्न इति सर्वो जातो मरिष्यतीति प्रश्नोत्तरं ॐ भो इति सत्यं भो इत्यर्थः अविभज्यवचनीयमुक्त्वा विभज्यवचनीयं प्रश्नमाह अथ सर्व इति विभज्यवचनीयतामाह विभज्येति ० ११२

विभज्यवचनीयमेव प्रश्नान्तरं विस्पष्टार्थमाह तथा मनुष्येति अयं त्ववचनीय एकान्ततः न हि सामान्येन कुशलाकुशलपुरुषसंसारस्यान्तवत्त्वमनन्तवत्त्वं वा शक्यमेकान्ततो वक्तुं यथा प्राणभृन्मात्रस्य श्रेयस्त्वमश्रेयस्त्वं वानेकान्ततः शक्यमवधारयितुं यथा जातमात्रस्य मरणमेकान्ततो विभज्य पुनः शक्यावधारणमित्याह कुशलस्येति अयमभिसन्धिः क्रमेण मोक्षे सर्वेषां मोक्षात् संसारोच्छेद इत्यनुमानं तथागमसिद्धमोक्षाश्रयं तथा चाभ्युपगतमोक्षप्रतिपादकागमप्रमाणभावः कथं तमेवागमं प्रधानविकारानित्यतायामप्रमाणीकुर्यात् तस्मादागमबाधितविषयमेतदनुमानं न प्रमाणं स्थापने हि श्रुतिस्मृतीतिहासपुराणेषु सर्गप्रतिसर्गपरम्परायाः अना

तथा मनुष्यजातिः श्रेयसी न वा श्रेयसीत्येवं परिपृष्टे विभज्यवचनीयः प्रश्नः पशूनधिकृत्य श्रेयसी देवानृषींश्चाधिकृत्य नेति अयं त्ववचनीयः प्रश्नः संसारोऽयमन्तवानथानन्त इति कुशलस्यास्ति संसारक्रमपरिसमाप्तिर्नेतरस्येति अन्यतरावधारणे दोषः तस्माद्व्याकरणीय एवायं प्रश्न इति ३३ गुणाधिकारक्रमसमाप्तौ कैवल्यमुक्तं तत्स्वरूपमवधार्यते पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ० दित्वमनन्तत्वं चेति अपि च सर्वेषामेवात्मनां संसारस्य न तावद्युगपदुच्छेदः संभवी न हि खण्डितरूपाणामप्यनेकजन्मपरम्पराभ्यासप्रकृष्टमस्याध्यविवेकख्यातिप्रतिष्ठा किं पुनः प्राणभृन्मात्रस्य स्थावरजंगमादेरेकदा कस्मान्नैश्यं भवितुमर्हति न च कारणयौगपद्ये कार्ययौगपद्यं युज्यते क्रमेण तु विवेकख्यातावसंख्येयानां क्रमेण मुक्तौ न संसारोच्छेद आनन्त्याज्जन्तूनामसंख्येयत्वादिति सर्वमवदातं कैवल्यरूपावधारणपरस्य सूत्रस्यावान्तरसंगतिमाह गुणाधिकारेति पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ० ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

भा॰वा॰
११२

कृतकरणीयतया पुरुषार्थशून्यानां यः प्रतिप्रसवः स्वकारणे प्रधाने लयः तेषां कारणात्मनां गुणानां व्युत्थानसमाधिनिरोध
संस्कारा मनसि लीयन्ते मनोऽस्मितायामस्मिता लिंगे लिंगमलिंगे इति योऽयं गुणानां कार्यकारणात्मकानां प्रतिसर्गः तत्कैवल्यं यं कं
चित्पुरुषं प्रति प्रधानस्य मोक्षः स्वरूपप्रतिष्ठा पुरुषस्य वा मोक्ष इत्याह स्वरूपेति अप्रतिष्ठि महाप्रलयेपि स्वरूपप्रतिष्ठा चितिश
क्तिः न वासौ मोक्ष इत्यत आह पुनरिति सोऽयं मोक्ष इति शास्त्रपरिसमाप्तौ मुक्त्यर्हे चितं परलोक मे यत्नसिद्ध्यो धर्मघनः समा

कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्यकारणात्मनां गुणानां त
त्कैवल्यं स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वानभिसंबन्धात्पुरुषस्य चितिशक्तिरेव केव
ला तस्याः सदा तथैवावस्थानं कैवल्यमिति ३४ इति श्रीपातंजले योगशास्त्रे सां
ख्यप्रवचने कैवल्यपादश्चतुर्थः संपूर्णः शुभमस्तु सर्वजगताम्

धिः इयं च मुक्तिः प्रतियादि
तास्मिन्यादे प्रसंगाद्विचारयद्युक्तं निद्रानं तापानामुदितमथ तापाच्छकचिताः सहांगैरध्याभिर्विहितमिह योगद्वयमपि
कृतो मुक्तेरध्वा गुणपुरुषभेदः स्फुरदतो विविक्तं कैवल्यं परिगलिततापा चितिरसौ इति श्रीवाचस्पतिमिश्रविरचितायां पातं
जलभाष्यव्याख्यायां कैवल्यपादश्चतुर्थः समाप्तः शुभमस्तु सर्वजगतां संवत् १८२१ माघशुक्ल ४ ११२

No 24